यह लाडवागड संघ काष्ठासंघ से भी संबद्ध है किन्तु यापनीय संघ के साथ इसका संबन्ध प्रमाणित नहीं होता। क्योंकि पुन्नाट और पुन्नाग का एक अर्थ नहीं है। इस संघ के आचार्यों की पट्टावलि में उनके समकालीन शासकों का विवरण मिलता है। इस संघ के एक अति प्राचीन आचार्य दिगम्बर कहे जाते हैं। किन्तु बाद के कुछ संभवतया भट्टारक थे।

जयसेन नाम के कुछ अन्य भी आचार्य हुए हैं।

१. एक जयसेन धर्मघोष के गुरु थे। प्रथम शताब्दी इ. के मथुरा के शिलालेख में इनका उल्लेख है।

२. जिनसेन ने अपने महापुराण (ल. ८३८ इ.) में अपने गुरु जयसेन का निर्देश किया है।

३. जिनसेन ने अपने हरिवंशपुराण में अपने पुन्नाट संघ के पूर्वजों की एक लम्बी सूची दी है उनमें एक जयसेन उनके प्रगुरु हैं।

४. एक जयसेन ने कुन्दकुन्द के ग्रन्थों पर टीका रची है। मैंने प्रवचनसार की प्रस्तावना में उनपर विचार किया है। उनका समय ११५० इ. के बाद है।

५. प्रद्युम्नचरित के कर्ता महासेन लाडवागड संघ के थे, उन्होंने अपने प्रगुरु का नाम जयसेन लिखा है। यदि इनको धर्मरत्नाकर का रचयिता मानने का भाव हो, तो वह कोई अनुचित नहीं है।

६. एक प्रतिष्ठापाठ के रचयिता भी जयसेन हैं जिनका उपनाम वसुबिन्दु है। वे अपने को कुन्दकुन्द का अग्रशिष्य कहते हैं।

नरेन्द्रसेन ने अपने सिद्धान्तसार संग्रह के अन्त में एक विस्तृत प्रशस्ति दी है। यह प्रशस्ति धर्मरत्नाकर की प्रशस्ति से बहुत मेल खाती है। दोनों में कुछ पद्य भी समान हैं। इसमें भी लाडवागड संघ का मूल भगवान् महावीर के गणधर मेतार्य को बतलाया है। फिर दिगम्बर धर्मसेन का नाम आता है। धर्मसेन के शिष्य शान्तिषेण, उनके गोपसेन, उनके भावसेन और उनके जयसेन हुए। यही जयसेन धर्मरत्नाकर के कर्ता हैं। जयसेन के पट्टपर क्रम से ब्रह्मसेन वीरसेन और गुणसेन हुए। गुणसेन के शिष्य नरेन्द्रसेन थे।

विषयसूची

विषय | श्लोकाङ्क

१. पुण्यपापफलवर्णन

विषय	श्लोकाङ्क
३. आ[illegible] का फल	
आहारदान की प्रशंसा	१–२*१
आहार के अभाव से वर्णाश्रमों का नाश	३
आहार के प्रकार	४
आहारदाता की प्रशंसा	५, ९–१२, १५–१६
आहार दान के फल	६–८
दान से गुणों की प्रकटता	१३–१४
सब दानों में आहारदान श्रेष्ठ	१७–१७*३
[illegible] से कल्याणपरंपरा	१८
दाताओं के प्रकार	१९–२२
दान न देनेवाला चिड़िया के समान	२२*१–२
दान के बारेमें दृष्टान्त	२३–२४
निदानभावना से रहित होकर दान देना	२५
दान कार्यसाधक	२६–२७
दान पाथेय के समान	२८
धर्म से अचिन्त्य फलप्राप्ति	२८*१–२
दान से अनन्त सुख	२९
चार क्षेत्रों में दानरूप बीज बोना	३०
जिनमन्दिर बनानेवाले इन्द्र से श्रेष्ठ	३१
सब लोग उनके दास	३२
वे अप्सराओं के प्रिय	३३
जिनमन्दिर निर्माण के फल	३४–३७, ४३, ४८
जिनप्रतिमा, मंदिर तथा सिद्धान्त ग्रंथों के निर्माण का फल	३८–३९
जिनमन्दिर निर्माण से दुर्गति से उद्धार	४०
मंदिर निर्माण एक श्रेष्ठ पुण्यकर्म	४१
मन्दिरनिर्माता विरला	४२
मन्दिर के जीर्णोद्धार के फल	४४–४७
जिनप्रतिमानिर्माण का फल	४९–५१, ५३, ५४, ५६
प्रतिमाप्रतिष्ठा का फल	५२, ५५, ५७
जिनेन्द्र[illegible]ों से प्रार्थना	५८
४. साधुपूजा का फल	
[illegible]नसंपादन की आवश्यकता	१
[illegible] की आवश्यकता	२
मुनिसंघ की प्रशंसा	३ ६

११. प्रथम प्रतिमा का विस्तार

१२. दूसरी प्रतिमा का विस्तार

१९. सल्लेखना का वर्णन

विषय	श्लोकाङ्क
कषायों से संतप्त होकर मरने से आत्मघात	११*७
सल्लेखना से अहिंसा	११*८
मरण के समय मन मलिन होने से सब अनुष्ठान व्यर्थ	११*९
सल्लेखना के अभाव में व्रत व्यर्थ	११*१०
सब कुछ छोड देना	११*१२—१३
मृत्यु की तीर्थरूपता	१२
अनशन बडा तप	१२*१
समाधि से सर्वसिद्धि	१२*२—४
सल्लेखना की हानि के अतिचार	१२*५
बालपण्डित का मरण	१२*६
सल्लेखना से लोकमान्य पद	१३
मुनियों और गृहस्थों की सल्लेखना समान	१४
क्षुधापरीषहजय	१५
तृषापरीषहजय	१६
शीतपरीष.जय	१७
उष्णपरीषहजय	१८
दंशादिपरीषहजय	१९
नग्नतापरीषहजय	२०
रतिपरीषहजय	२१
स्त्रीपरीषहजय	२२
चर्यापरीषहजय	२३
निषद्यापरीषहजय	२४
शय्यापरीषहजय	२५
क्रोधपरीषहजय	२६
वधपरीषहजय	२७
याचनापरीषहजय	२८
अलाभपरीषहजय	२९
रोगपरीषहजय	३०
तृणस्पर्शपरीषहजय	३१
मलपरीषहजय	३२
सत्कारपरीषहजय	३३
प्रज्ञापरीषहजय	३४
अज्ञानपरीष.जय	३५
अदर्शनपरीषहजय	३६
परीषहजय का फल	३७
संसार की नश्वरता	३८

विषय	श्लोकाङ्क
मृत्यु की अलंघनीयता	३८*१
संसार की हेयता	३९-४२, ४६
आस्रव	४३
संवर	४४
कर्मनिर्जरा	४५
रत्नत्रयकी प्राप्ति के लिये प्रयत्न करना	४७
धर्म के विषय में प्रयत्न करना	४८
धर्मध्यान के प्रकार	४९
सल्लेखना का फल	५०

२०. उक्तानुक्तशेषविशेष-सूचक

अवसर का विषय	१
अंगप्रविष्ट और प्रकीर्णक श्रुत	२
आत्मवान् पुरुष के गुण	२*१
तत्त्वज्ञान में बाधक दोष	२*२
संशय का परिणाम	३
धार्मिकों का अवमान न करना	४–४*१
गृहस्थों के छह कार्य	४*२
देवसेवा का अभिप्राय	४*३
गुरु की उपासना	४*४–५
स्वाध्याय	४*६
प्रथमानुयोग	४*७
चरणानुयोग	४*८–९
द्रव्यानुयोग	४*१०
जीवस्थान आदिके प्रकार	४*११
तप	४*१२–१३
संयम	५
व्रतधारण	६
दुष्ट व्यवहार का त्याग	७
समितिपालन	८
कषायों का स्वरूप व परिणाम	८*१–१३
कषायों के उपशम का साधन	१४–१५
देवों के देव की शरण में जाना	१६
इन्द्रियविषयक असंयम	१७–१८
व्रती श्रावक का कार्य	१८*१
वैराग्य आदि का स्वरूप	१८*१

ॐ

— श्रीवीतरागाय नमः —

श्री-जयसेनाचार्य-विरचितः

धर्मरत्न करः

[१. प्रथमो ऽवसरः]

[पुण्यपापफलवर्णनम्]

1) लक्ष्मीं निरस्तनिखिलापदमाप्नुवन्तो
लोकप्रकाशरवयः प्रभवन्ति भव्याः ।
यत्कीर्तिकीर्तनपरा जिनवर्धमानं
तं नौमि कोविदनुतं सुधिया सुधर्मम् ॥ १

2) अन्योन्यदूरसुविरुद्धमतैः समग्रै-
र्मूकत्वराक्षसभयादिव वादिसंघैः ।
या स्तूयते कृतसमानमतैः सदैव
सा क्षालयत्विह रजांसि सरस्वती वः ॥ २

(हिन्दी अनुवाद)

जिसके अनन्त ज्ञान-दर्शनादि गुणों का यशोगान करने में तत्पर रहनेवाले भव्य-भविष्य में रत्नत्रय स्वरूप से परिणत होनेवाले-संपूर्ण आपदाओं को नष्ट करनेवाली लक्ष्मी को (अनन्तज्ञानादि चतुष्टयरूप अन्तरंगलक्ष्मी तथा समवसरणादि बाह्यलक्ष्मी को) प्राप्त करते हुये लोकप्रकाशक सूर्य अर्थात् सर्वज्ञ होते हैं। विद्वज्जनों के द्वारा-गणधरादिकों के द्वारा-स्तुतियोग्य उन वर्धमान जिन की तथा सुधर्मकी-उत्तम जिनधर्म की-शुभबुद्धि से मैं स्तुति करता हूँ॥१॥

गूंगापनरूपी राक्षसके भय से मानो एक दूसरेसे दूर तथा अत्यन्त विरुद्ध मत को प्रतिपादन करनेवाले समस्त वादीसमूह जिसकी समानमत होकर अर्थात् एकमत से सदा प्रशंसा करते हैं ऐसी वह मान्य सरस्वती-जिनवाणी-आपके ज्ञानावरणादि कर्मोंरूप धूलि:को धो दें॥२॥

---

१) 1 P ओंनमः सिद्धेभ्यः, D श्रीगणेशायनमः.

3) भवाटवीभीतभ व्यव्रजस्य
विमुक्तिपुर्याप्तिसमु‍त्सुकस्य ।
सुनिर्भया विश्रमहेतवो[1] जे
हरन्तु ते मे ऽनयस्तमांसि ॥ ३

4) मागापरित्यागगुणेन पुंसा
स्वल्पश्रुतेनाप्युपगीयमानः[1] ।
सर्वज्ञधर्मः प्रणिहन्ति पापं
सौपर्णमुद्रेव विषं विचित्रम् ॥ ४

5) चिन्तामणिप्रभृतयो ऽपि हिता भवन्तो
धर्मेण तैः कथमसावुपमां प्रयातु ।
किं भानुमान् भुवनमध्यगतार्थभासी
खद्योतकप्रभृतिभिर्भवतूपमेयः ॥ ५

6) अन्यैरनुक्तमिति जैनमतं न हेयं
नान्योक्तमात्रमिति सत्पुरुषैरुपेयम् ।
युक्तं शिशूक्तमपि किं न बुधो ऽभ्युपैति
चिन्तामणिं त्यजतु बालसमर्पितं किम् ॥ ६

जो मुक्तिरूप नगरी की प्राप्ति में अतिशय उत्कंठा रखनेवाले तथा संसाररूप वनसे डरनेवाले भव्यसमूह को अतिशय निर्भय होकर विश्राम देते हैं, वे मुनिजन मेरे अज्ञानरूप अन्धकार को नष्ट करें ॥३॥

जिस प्रकार मन्त्रशास्त्र को अल्प मात्रा में भी जाननेवाले मान्त्रिक के द्वारा दी जाने-वाली सर्पविषनाशक मुद्रिका विचित्र–विविध प्रकारके--विष को नष्ट किया करती है, उसी प्रकार मुक्तिमार्ग का–रत्नत्रय का – त्याग न करनेवाले अतिशय अल्प शास्त्रज्ञ के द्वारा भी वर्णित सर्वज्ञ प्रतिपादित धर्म–जिनधर्म–प्राणियोंके पाप को नष्ट किया करता है ॥४॥

चिन्तामणि आदि (कामधेनु और कल्पवृक्ष) भी धर्म के आश्रय से ही हित किया करते हैं। अत: यह जिनधर्म उनके साथ उपमा को कैसे प्राप्त हो सकता है ? लोक के मध्य में अवस्थित सर्व पदार्थों को प्रकाशित करनेवाला सूर्य क्या जुगनूं आदि (दीप) पदार्थों के साथ कभी उपमा को प्राप्त हो सकता है ? नहीं हो सकता है ॥ ५ ॥

दूसरों ने–अन्य मतानुयायिओं ने–नहीं कहा है, इस हेतु से जैनमत का त्याग करना योग्य

---

३) 1 P °विश्रमणस्थिति ये । ४) D °गायमानः ।

7) त्रैलोक्ये सचराचरे ऽप्यभिमतं संपादयन् प्राणिनां
ख्यातिं स्वां प्रभुतां च नास्तिकमतं निर्मूलयन् मूलतः ।
धर्मो भानुरिवाखिलाङ्गिरुचितं मार्गं सदोद्योतयन्
स्वं[1] निर्भासयति[2] प्ररूढतिमिरस्तोमं[3] प्रविध्वंसयन् ॥ ७

8) श्रीतीर्थाधिपचक्रवर्तिहलभृल्लक्ष्मीश[2]मुख्याः परा
धर्मादेव जगत्त्रयोत्तमयशः[3]श्वेतीकृताशान्तराः[4] ।
अद्यापि प्र[5]तपत्पवित्रितजगन्नामान एवंविधा
आसन्[6] कम्पितखेचरेश्वरसुरक्ष्मापाल[7]चक्रा अपि[8] ॥ ८

नहीं है । अथवा दूसरों ने उसका उपदेश किया है, इस हेतु से सज्जनों को उसे ग्रहण भी नहीं करना चाहिये । सो ठीक भी है—क्योंकि बालक के भी योग्य वचन को क्या बुद्धिमान मनुष्य नहीं स्वीकारता है? और क्या बालक के द्वारा दिये गये चिन्तामणि रत्न को चतुर पुरुष छोड देता है ? नहीं छोडता है । अभिप्राय यह है कि, जिस प्रकार लोक में बालक के भी योग्य वचन को रुचिपूर्वक ग्रहण किया जाता है उसी प्रकार अल्पज्ञ होने पर भी मेरे द्वारा कहे जानेवाले हितकारक जैनधर्म को ग्रहण करना योग्य है ।।६।।

नास्तिक मत को—जीव, पाप, पुण्य व स्वर्गादि परलोक नहीं है, केवल देह ही आत्मा है, ऐसा माननेवाले मत को— मूलसे उखाडकर फेंकनेवाला यह धर्म (जिनधर्म) जीव और अजीवों से भरे हुये इस त्रैलोक्य में प्राणियों को इष्ट वस्तुओं की प्राप्ति कराता हुवा अपनी ख्याति और प्रभाव को इस प्रकार से प्रकट करता है जिस प्रकार कि सर्व प्राणियों को रुचनेवाले मार्ग को सदा प्रकाशित करनेवाला, और बढे हुये अन्धकार के समूह को नष्ट करनेवाला सूर्य प्राणियों को प्रिय ऐसे मार्ग को प्रकाशित करके बढे हुये अन्धकार के समूह को नष्ट करता हुआ अपनी ख्याति और प्रभाव को प्रगट करता है ।।७।।

जिन्होंने विद्याधर चक्रवर्ती, इन्द्र और राजाओं के समूह को भी कंपित किया है, जिन्होंने प्रतापयुक्त अपने नाम से जगत् को पवित्र किया है तथा जिन्होंने जगत्त्रय में फैले हुये अपने उत्तम यश से दिशाओं के मध्यभाग को धवलित किया है ऐसे श्रीतीर्थंकर, चक्रवर्ती, बलभद्र और लक्ष्मीश (नारायण) आदि पुरुषरत्न धर्म के ही प्रभाव से जगत् में उत्पन्न हुये हैं ।।८।।

---

७) 1 आत्मानम्. 2 प्रकाशयति. 3 उत्कटतिमिरसमूहम् । ८) 1 बलभद्र. 2 नारायण 3 यशसा. 4 दिशानां मध्याः. 5 प्रतापात्यय (?). 6 समुत्पन्नास्तिष्ठन्ति. 7 पृथ्वीपालराजा. 8 समूहा अपि

9) करचरणादौ तुल्ये[1] दृश्यन्ते दुःखदूनमनसो[2] ऽन्ये[3] ।
तत्राधर्मः[4] स्फूर्जति सातिशयं[5] निश्चयाज्जगति ॥ ९

10) समे ऽपि यत्ने पुरुषाः प्रकृष्टे लभन्त[1] एके हि फलं विशालम् ।
परे[2] तु कष्टं[3] परितो ऽपि पुष्टं[4] समर्थ्यते[5] सद्भिरिहाप्यदृष्टम्[6] ॥ १०

11) पाथोदाः परिपूरयन्ति परितः पाथोभि[1]रेतां धरां
काले यत्पवनो वहत्यपि तथा शीतं च तापं क्वचित् ।
तत्रापि प्रतपत्यवारित[2]रसः संसारि[3]धर्मो ध्रुवं
नैवं चेद[4]गमिष्यदेकतमतामोंभूर्भुवः[5]स्वस्त्रयी ॥ ११

12) पतति नरकं प्रायो लोको ऽनि[ल]िप्सुरपि[1] ध्रुवं
वृजिनभरतो[2] जानानः[3] संस्तदीयगति[4] यथा ।
नृपतिवनिताधीनं धन्यं परे[5] भुवनार्चितं
सुरपतिपुरं पुण्यावासाः[6] प्रयान्त्यपरे[7] तथा ॥ १२

इस जगत् में हाथ, पाँव आदि के समान होने पर भी कुछ लोग मन में दुःख से व्यथित दीखते हैं। यह निश्चय से अधर्म का ही प्रभाव है ॥९॥

समान रूप से महान यत्न करने पर भी कितने ही सज्जनों को प्रचुर सुखरूप फल मिलता है, किन्तु दूसरों को सब ओरसे कष्टही कष्ट प्राप्त होता है। अतः इस शुभाशुभ फल की प्राप्ति में अदृष्ट (दैव) कारण है ऐसा सज्जन समर्थन करते हैं ॥१०॥

योग्य वर्षा कालमें—वर्षा के समय में—मेघ पानीसे इस पृथ्वीको चारों ओर से परिपूर्ण करते हैं, योग्य कालमें वायु क्वचित् शीतपना और क्वचित् उष्णता को धारण करती हुयी बहती है। इस प्रकार मेघादिक जो यह कार्य करते हैं उस में भी निश्चय से अनिवार्य पराक्रम से संयुक्त उस संसारी प्राणियों के धर्म (पुण्य-पाप) का ही प्रताप समझना चाहिये। कारण कि यदि ऐसा न होता तो तीनों लोक समानता को प्राप्त हो जाते, सो ऐसा नहीं ॥११॥

जिस प्रकार नरक में पडने का इच्छुक न हो कर भी प्राणी पापभार के कारण उसकी गति को—नारकवेदना को—जानता हुआ भी नरक में पडता है, उसी प्रकार अन्य पुण्यशाली जन

---

९) 1 समाने सति. 2 पीडित. 3 पापिनः. 4 तेषु अन्येषु. 5 यथा भवति। १०) 1 लभन्ते. 2 अन्ये 3. लभन्ते. 4 बहुतरम्. 5 कथ्यते. 6 धर्माधर्मलक्षणं दिष्टं केवलेन कथितम्. ११) 1 D 'पाथोस्ति', P जलैः. 2 उदयः. 3 संसारिधर्मः. 4 यदि धर्मस्य गुणा न भवन्ति तदा एकरूपस्त्रिलोको. 5 ओं एवं [भूः] अधो भुवः मध्यः स्वः ऊर्ध्वः। १२) 1 अगन्तुकामोऽपि, न पतितुकामोऽपि. 2 पापसामर्थ्यात्. 3 जानन् सन्. 4 पापस्य गतिं. 5 एके पुण्यात्मानः. 6 पुण्यवन्तः. 7 अप्रेरिता अपि पुण्यवन्तः।

13) यथाङ्गमध्यक्षसुखे हि धर्मस्तथा परोक्षे ऽपि च मोक्षसौख्ये ।
भोगोपभोगादिसुखाय धर्मो[1] मित्रादियत्नो ऽपि निमित्तमात्रम् ॥ १३

14) ये वाञ्छन्ति ततो ऽकलङ्कपदवीं ये त्रैदशं[1] मानुषं
सौख्यं विश्वजनैकविस्मयकरं कल्याणमालाधरम्[2] ।
धर्मस्तैरुचितो विधातु[3]मनिशं तस्मा[4]द्विनै[5]तन्न य[6]त्
छायाच्छन्नदिगन्तरस्तरुवरो दृष्टो न बीजा[7]द्विना ॥ १४

15) धर्माज्जन्म कुले कलङ्कविकले कल्यं[1] वपुर्यौवनं
सौभाग्यं चिरजीवितव्यरुचिरं[2] रामा रतिर्वा[3] परा ।
सामर्थ्यं शरणार्थिरक्षणपरं स्थानं प्रधानं सुखं
स्वर्निःश्रेयस[4]संभवं वरमपि प्राप्येत किं नो नृभिः ॥ १५

राजा व स्त्री की अनुकूलतायुक्त लोकपूज्य धन्य अवस्था को प्राप्त होते हैं। तथा पुण्य के आवास–विशाल पुण्य के धारक–दूसरे कितने ही इन्द्रपुर (स्वर्ग) को प्राप्त होते हैं ॥१२॥

धर्म जैसे प्रत्यक्ष सुख का कारण है वैसे ही वह परोक्ष स्वरूप मोक्षसुख का भी कारण है। भोगोपभोगादि सुख के लिये धर्म ही कारण है। इस सुख के लिये मित्रादिकों का यत्न भी निमित्तमात्र है ॥१३॥

जो भव्य जीव अकलंक पदवी को–ज्ञानावरणादि कर्म-कलंक से रहित मोक्षपद को–चाहते हैं, जो देवों संबंधी सुख को चाहते हैं, जो मनुष्यगति के सुख को चाहते हैं तथा जो संपूर्ण जन को आश्चर्य उत्पन्न करनेवाले व जन्मादि पाँच कल्याणरूपी माला को धारण करनेवाले सुख को–तीर्थंकर विभूति को–चाहते हैं उन्हें निरन्तर धर्मका आचरण करना योग्य है। कारण यह कि धर्म के विना संसारभय दूर नहीं होगा। ठीक है, अपनी छाया से दिशाओं के मध्यभाग को व्याप्त करनेवाला उत्तम वृक्ष कभी बीज के विना नहीं देखा गया है। तात्पर्य, जैसे बीज के बिना वृक्ष संभव नहीं है वैसेही धर्म के बिना सुख भी संभव नहीं है ॥१४॥

पूर्वाचरित धर्म से निर्दोष कुलमें जन्म होना है, शरीर सदा नीरोग तथा तरुण रहता है, दीर्घ आयु से रमणीय सौभाग्य अर्थात् सर्वजनप्रियता प्राप्त होती है, दूसरी रति के समान सुन्दर स्त्री प्राप्त होती है, शरण में आये हुये लोगों के रक्षण में तत्पर ऐसा सामर्थ्य प्राप्त होता है, उत्कृष्ट स्थानकी प्राप्ति होती है, तथा स्वर्ग में और मोक्ष में उत्पन्न हुये उत्तम सुख की प्राप्ति होती है। ठीक है, धर्म के द्वारा मनुष्य क्या नहीं प्राप्त करते हैं? अर्थात् धर्माचरण से जीवों को सब ही उत्तम वस्तुओं की प्राप्ति होती है ॥१५॥

---

१३) 1 P °धर्मात्। १४) 1 देवत्वम्. 2 कथंभूतं सौख्यम्. 3 कर्तुं योग्यः. 4 धर्मात्. 5 पूर्वोक्तं सुखम्. 6 यतः कारणात्. 7 D °बीजं विना। १५) 1 नीरोगम्. 2 मनोज्ञम्. 3 इव. 4 स्वर्गमोक्ष।

16) जायन्ते जन्तवो[1] जातौ[2] धर्मात् सिद्धगताविव ।
पापादतीव निन्द्यायामन्ये[3] श्वभ्रगताविव[4] ॥ १६

17) इक्ष्वाक्वादिसमन्वयेषु[1] विबुधा विश्वार्चनाधामसु[2]
सुत्रामप्रमुखाश्च[3] येषु जननं[4] काङ्क्षन्ति तेषु स्वयम् ।
जायन्ते नृभवे समे[5]ऽपि सुकृतात् केचित् पुनर्दुष्कृता-
न्निन्द्यैरप्यतिनिन्दितेषु[6] सकले तुल्ये ऽपि लग्नादिके[7] ॥ १७

18) गर्भे केचिदपूर्णरूपवपुषो बाल्ये ऽपरे यौवने
रामारम्यतरे तरां निरुपमे धर्मार्थकामक्षमे ।
वृद्धत्वे ऽनवनं[1] प्रयान्ति गहनं सर्वत्र कालाननं[2]
यत्तत् पापविजृम्भितं[3] मतिमतां पूजास्पदैर्वर्णितम्[4] ॥ १८

धर्माचरण करने से प्राणी सिद्धगति के समान उच्च जाति में उत्पन्न होते हैं और दूसरे–पापीजन–पाप से नरकगति के समान अतिशय निन्द्य जाति में उत्पन्न होते हैं ॥१६॥

मनुष्य जन्म के समान होनेपर भी कितने ही मनुष्य पुण्योदय के प्रभाव से जिन कुलों में स्वयं इंद्र–सामानिकादिक देव भी उत्पन्न होने की इच्छा करते हैं उन लोकपूजा के स्थानभूत इक्ष्वाकु एवं कुरुवंश आदि उत्तम कुलों में जन्म लेते हैं । और कितने ही मनुष्य अपने दुष्कर्म से समस्त लग्न, मुहूर्त व दिनादिके समान होनेपर भी निन्द्य जनों के द्वारा भी निन्दनीय ऐसे नीच कुलों में उत्पन्न होते हैं ॥ १७॥

कितने ही प्राणी अपूर्ण रूप व शरीरसे युक्त होते हुए गर्भ में; दूसरे कितने ही बाल्यावस्था में; कितने ही स्त्री के आश्रयसे अतिशय रमणीय प्रतीत होनेवाली तथा धर्म, अर्थ एवं काम के सेवन में समर्थ ऐसी यौवन अवस्था में; और कितने ही वृद्धावस्था में अनवन–अरक्षण (मृत्यु) –को प्राप्त होते हैं। इस प्रकारसे सर्वत्र जो भयानक कालका मुख खुला हुआ है, अर्थात् किसी भी अवस्था में जो प्राणी का संरक्षण संभव नहीं है, यह सब पाप का प्रभाव है; ऐसा बुद्धिमानों की पूजा के स्थानभूत पूज्य पुरुषों के द्वारा कहा गया है ॥१८॥

१६) 1 जीवाः. 2 सुजातिविषये उत्पद्यन्ते. 3 निन्द्यायां गतौ. 4 नरकगतौ । १७) 1 वंशेषु. 2 संसार पूजागृहेषु. 3 इन्द्रादयः. 4 वंशेषु जन्म. 5 तुल्ये. 6 निन्द्यैर्जनैरतिनिन्दितेषु वंशेषु. 7 लग्ने मुहूर्ते दिने रात्रौ समानेऽपि । १८) 1 अरक्षं रक्षारहितम्. 2 कृतान्तस्य मुखम्. 3 विलसितं व्यापितं वा. 4 पूज्यैः ।

19) सेव्यन्ते गर्भवासे भटबुधधनिभिः केचिदन्ये[1] शिशुत्वे
लोकैरालोक्यमाना अहमहमिकया बालचन्द्रेण तुल्याः ।
वत्स्यन्ते[2] ऽमा[3] शुभार्थैः स्वजनपरिजनैर्यौवने वार्द्धके ऽन्ये
कीर्तिव्याप्तत्रिलोका अपि रिपुनिवहैः[4] पालिताज्ञाः सदैव ॥ १९

20) आनीयन्ते गृहे स्वे[1] कथमपि[2] कैः कैर्नोचितैः संभ्रियन्ते[3]
उत्सार्यन्ते[4] ततो ऽन्ये[5] विचलितचित्ताः कैर्न कैरप्यनिष्टैः ।
धन्यास्तद्वान्त्यनिष्टं[6] परमिह[7] शिष्टा गृह्णते सर्वथेष्टं
पापानां वैपरीत्या[8]दिदमपि कष्टं कस्य वच्मो[9] विचार्यम् ॥ २०

21) नन्द्या जीयाश्च भूया[1]स्त्रिभुवनजनताखण्डलो[2] नित्यमेवं
गन्धर्वैर्गीयमानः सुललितवचनैर्मागधैः पठ्यमानः[3] ।
प्रातः प्रात[illegible]गतसुकृतागोचरैः[4] प्रार्च्यमानो
निद्रा[5]मुन्निद्रपुण्य[6]स्त्यजति नृपशतैर्नम्यमानाङ्घ्रिपद्मः ॥ २१

कितने ही जीव गर्भवास में ही शूर, विद्वान् और धनिकों से सेवित होते हैं, अन्य कितने ही जीव बाल्यावस्था में बालचंद्र के–द्वितीया के चन्द्रमा के–समान वृद्धिगत होते हुये लोगों के द्वारा अहमहमिका से–मैं पूर्व में, मैं पूर्व में, इस प्रकारकी आतुरतासे–देखे जाते हैं, कितने ही जीव तारुण्यावस्था में स्वजन और परिजनों के साथ शुभ धनादि पदार्थों से संयुक्त होकर सुखपूर्वक रहते हैं, तथा जिनकी आज्ञा को शत्रुसमूह शिरोधार्य करते हैं ऐसे कितने ही पुण्यशाली जन अपनी कीर्ति से त्रिलोक को व्याप्त करते हुये वृद्धावस्था में सदैव सुख से रहते हैं ॥१९॥

पुण्यशाली जीवों को कौन कौन से मनुष्य अपने घर पर नहीं लाते हैं व उनका समुचित पदार्थों के द्वारा भरण-पोषण नहीं करते हैं ? अर्थात् पुण्यात्मा पुरुषों को कितने ही मनुष्य अपने घर पर लाकर उन का अनेक उत्तमोत्तम वस्तुओं के द्वारा पोषण किया करते हैं । इस के विपरीत अस्थिरचित्त पापी प्राणिओं को कौनसे मनुष्य अनिष्ट वस्तुओं के साथ अपने घरसे नहीं निकाल देते हैं ? अर्थात् पापी जनों को लोग अपने घरसे बाहर निकाल दिया करते हैं । प्रशस्त जन यहाँ अनिष्टका वमन करते हैं, उसे नष्ट करते हैं और शिष्ट जन सर्वथा इष्ट को ग्रहण करते हैं । इस प्रकार विपरीतता से पापियों को प्राप्त होनेवाले शोचनीय कष्ट की वार्ता किससे कही जाय ? ॥२०॥

आप धनादि से समृद्ध होवें, आपको विजय प्राप्त हो, आप तीनों लोगों की जनता के

१९) 1 पुण्यवन्तः. 2 D *वश्यन्ते, सेव्यन्ते. 3 सार्धम्. 4 समूहैः । २०) 1 स्वकीये. 2 महता कष्टेन. 3 पोष्यन्ते. 4 निजगृहान्निष्कास्यन्ते. 5 पापिजनाः. 6 तदनिष्टं वान्ति त्यजन्ति छर्दयन्ति. 7 जगति. 8 विरुद्धत्वात्. 9 कथयामः । २१) 1 भव. 2 इन्द्रः. 3 स्तुत्यमानः (?). 4 कथंभूतैर्विलासैः. 5 निद्रां त्यजति. 6 प्रकाशितपुण्यः, पुण्यवानित्यर्थः ।

22) रे रे पापिष्ठ कुण्ठिन्नलसतममहाराजनिर्लज्जचेट[1]
कष्टं प्रोत्थाप्यसे त्वं गृहपतिशयने संवृते[2] रे मयैवम् ।
मञ्चं कश्चिज्जहाति[3] श्रवणपथमनोन्मन्थिनीं वाचमित्थं
शृण्वन्[4] कुस्वामिचेट्या[5] व्यपगतसुकृतः प्रातरुद्गीयमानः ॥ २२

23) यद्देहार्धचरी हरं[1] गिरिसुता वक्षःस्थिता वाच्युतं[2]
लक्ष्मीर्यच्च मनोभवं रतिरहो नैवामुचत्[3] प्रेमतः ।
कामिन्यः सुभगं विलोक्य च बलाद् यत्कामयन्ते ध्रुवं
तत्संवर्धितधर्मकल्पतरुजं वर्ण्यं[4] फलं धीधनैः[5] ॥ २३

इन्द्र होवें; इस प्रकार गन्धर्व लोगोंके द्वारा पुण्यवान् पुरुष का सदा कीर्तन किया जाता है तथा प्रतिदिन प्रातःकाल होनेपर भाट लोगों के द्वारा वह पुण्यवान् अतिशय मधुर शब्दों से स्तुत होता है तथा पापीजनों को अप्राप्य ऐसे विलासों से वह (पुण्यपुरुष) पूजा जाता है । इस प्रकार जिसका पुण्य सदा जागृत है–उदय को प्राप्त है–वह सैंकडों राजाओं के नमस्कार को स्वीकार करता हुआ प्रतिदिन प्रातःकाल में निद्राका परित्याग करता है–जागृत होता है ॥२१॥

कोई पुण्यहीन मनुष्य, " अरे पापिष्ठ कुण्ठिन्, अत्यन्त आलसी महाराज का निर्लज्ज दास, इस घर के मालिक की शय्या समेटनेपर मैं तुझे कष्ट से उठाती हूँ" इस प्रकार प्रातःकाल में दुष्ट स्वामी की दासी से कहे गये कान और मन को दुःख देनेवाले शब्दोंको सुनता हुआ शय्याका त्याग करता है–सोनेसे उठता है ॥२२॥

पार्वती ने जो शंकर के आधे शरीर में अवस्थित होकर प्रेम के वश उसे नहीं छोडा· लक्ष्मीने जो विष्णु के वक्षःस्थलपर स्थित होकर स्नेहवश उसे नहीं छोडा, रति ने भी जो उसी प्रेम के वशीभूत होकर कामदेव को नहीं छोडा, तथा काम की अभिलाषा करनेवाली कितनी ही स्त्रियाँ भी जो किसी सुंदर पुरुष को देखकर बलपूर्वक उसकी अभिलाषा किया करती हैं; वह सब निश्चयसे वृद्धिगत किये गये उस धर्मरूप कल्पवृक्ष का फल है, ऐसा विद्वज्जन वर्णन करते हैं ॥२३॥

---

२२) 1 दास. 2 मया स्वामिशय्या संहारे कृते । सति. 3 त्यजति. 4 किं कुर्वन् इत्थं वाचमुद्गीयमानं शृण्वन्. 5 कुत्सितदास्या चेटिकया । २३) 1 ईश्वरं. 2 नारायणम्. 3 अत्यक्तवती पूर्वम्. 4 वर्णनीयम् 5 पण्डितजनैः ।

24) रूपं निशामयति[1] जल्पति यच्च पथ्यं[2]
यद्दुर्भगो[3] हितधिया तनुते[4] ऽपरस्य ।
तत्तद् विषायतितरां[5] ज्वलनायते[6] वा
पापं विडम्बयति कैर्न नरान् प्रकारैः ॥ २४

25) हृच्छोष[1]कासगलगण्डशिरो ऽर्तिकुष्ठ-
श्लेष्मानिल[2]प्रभृतिरोगगणैर्न जातु[3] ।
लक्ष्म्या[4] भवन्ति सुकृतात् सुचिरायुषश्च
नाप्यल्पमृत्युमिह[5] ते प्रविलोकयन्ते[6] ॥ २५

26) अन्ये[1] समस्तावयवप्रकम्प-
प्रलीनचेष्टाः परिशिष्ट[2]कष्टाः ।
इतीव संचिन्तयता न नीता[3]
यमेन हा[4] प्राणिवधोद्यमेन[5] ॥ २६

पुण्यहीन मनुष्य हितबुद्धि से जो दूसरे के सौन्दर्यको सुनाता है–उसकी प्रशंसा करता है, हितकारक भाषण करता है, तथा और भी जो वह उसका हितबुद्धि से कार्य करता है; वह सब उसे (दूसरे को) अतिशय विष अथवा अग्निके समान संतापजनक प्रतीत होता है । ठीक है– पाप मनुष्यों को किन किन प्रकारों से प्रतारित नहीं करता है ? वह उन्हें अनेक प्रकार से कष्ट दिया करता है ॥२४॥

पुण्यशाली प्राणी हृच्छोष (यक्ष्मा), कास (खाँसी), गण्डमाला, मस्तकशूल, कुष्ठ, कफ और वात आदि (पित्त आदि) रोगसमूहों से कदापि पीडित नहीं होते, इसीलिये वे दीर्घायु भी होते हैं । लोक में वे कभी अल्पमृत्यु को नहीं देखते, अर्थात् उनका अकाल में मरण नहीं होता है ॥२५॥

इसके विपरीत पापी जन संपूर्ण अवयवों में कम्प उत्पन्न होने से किसी भी कार्य के करने में असमर्थ होते हैं । तथा उनको अधिकसे अधिक सर्व प्रकार का कष्ट भोगना पडता है । ऐसा विचार करके ही मानो प्राणिवध में उद्यत रहनेवाला यम उन्हें नहीं ले जाता है । वे महान् दुख को भोगते हुये दीर्घकाल तक जीवित रहते हैं ॥२६॥

---

२४) 1 श्रावयति, वर्णयति. 2 हितम्. 3 भाग्यरहितः. 4 विस्तारयते. 5 हीनकर्म विषाय भवति. 6 अग्निवज्जायते । २५) 1 हृद्दाह. 2 वायु. 3 न पीडिते. 4 लक्ष्म्या सार्धं चिरायुषा भवन्ति-चिह्निताः पीडा न भवन्ति (?). 5 संसारे. 6 न पश्यन्ति । २६) 1 पुण्यहीनाः. 2 अधिककष्टाः. 3 किं न नीता अपि तु नीताः. 4 कष्टम्. 5 कथंभूतेन यमेन हिंसाकारकेण ।

27) रूपिण्य एव सुकृतेन मदालसाश्च
यूनां[1] मनांसि रमयन्त्य[2] उदग्रकान्तेः[3] ।
भार्या भवन्ति भुवने कृतिनां सुमित्रा[4] ।
गौर्यः श्रियोऽपि रतयोऽप्युचितैर्विलासैः ॥ २७

28) जायेत प्रमिताक्षरा[1] वचसि सा सा चारुहासिन्यपि
सा स्रग्विण्यपि[2] पार्वणेन्दुवदना[3] सा मञ्जुभाषिण्यपि[4] ।
सा वंशस्थतया[5] हरेत ललना[6] चेतः सतां पश्यता-
माश्चर्यं तनुमध्यया[7] न च तया केषां समुत्पाद्यते[8] ॥ २८

29) कर्पूरोत्थशलाकिका नयनयोः सौभाग्यरत्नावली
उद्यच्छैल[1]तरङ्गिणीसुखपुरी रूपावधिः कामिनी ।
शृङ्गारद्रुममञ्जरी रतिनिधिः सत्कान्तिमञ्जूषिका[2]
कामी मूर्च्छति यद्दृशैव[3] विहितात्[4] सा जायते पुण्यतः ॥ २९

लोक में पुण्यशाली पुरुषों के समुचित हावभावादि विलास से संयुक्त सुमित्रा, गौरी लक्ष्मी और रति जैसी स्त्रियाँ हुआ करती हैं; जो अतिशय सुंदर और मद से आलसयुक्त होकर अपनी उत्कृष्ट कान्ति से युवावस्था में उनके मन को रमाया करती हैं ॥२७॥

पुण्यशाली जन के जो स्त्री होती है वह संभाषण में प्रमिताक्षरा—मितभाषिणी—होकर प्रमिताक्षरा नामक वृत्त के समान, चारुहासिनी—मधुर हास्य से संयुक्त—होकर चारुहासिनी नामक वृत्त के समान, स्रग्विणी—मालासे विभूषित—होकर स्रग्विणी छन्द के समान, पार्वणेन्दुवदना—पूर्णमासी के चन्द्रमा के समान आल्हादजनक सुन्दर मुख से संयुक्त—होकर इन्दुवदना नामक वृत्त के समान, मंजुभाषिणी होकर—मधुर व मृदु भाषण करती हुयी—मंजुभाषिणी नामक छन्द के समान तथा वंशस्थता से—कुलीनता से- वंशस्थ वृत्त के समान देखनेवाले सत्पुरुषों के मन को हरा करती है। ठीक है—वह तनुमध्या—कटिभाग में कृश—होकर तनुमध्या नामक छन्दके समान किनको आश्चर्य नहीं उत्पन्न किया करती है ? अर्थात् जिस प्रकार तनुमध्या छंद सुनने व पढनेवाले सज्जनों को आश्चर्य उत्पन्न किया करता है उसी प्रकार वह कृशोदरी कामिनी भी देखनेवाले गृहस्थों को आश्चर्य उत्पन्न किया करती है॥२८॥

वह पुण्यवान् पुरुष की स्त्री आँखों को कर्पूरशलाका के समान आनन्ददायक होती है,वह

---

२७) 1 तरुणानां वा वृद्धमुनीनाम्. 2 P °दमयन्ति, D°दमयन्त्य. 3 प्रधानमनोज्ञदीप्तेः सकाशात्. 4 सौभाग्यवत्यः । २८) 1 मर्यादीभूताक्षरा. 2 पुष्पमालायुक्ता वेणी. 3 पूर्णचन्द्रवदना. 4 मनोज्ञ. 5 वंशोत्पन्नतया. 6 P °ललिता. 7 क्षीणमध्यतया. 8 मुग्धम् । २९) 1 शीलस्य भावः शैलम्. 2 पेटिका. 3 दृष्ट्या यत्नेन. 4 पूर्वकृतात् पुण्यात् ।

30) तासां[1] पश्यन्ति रूपं कथमपि न परे किंतु ते[2] यान्ति योगं
शुन्या[3] वा रामयामा[4] सकृदपि वचने निर्विरामं[5] भषन्त्या।
चामुण्डायाः स्वरूपं निजतनुगुणतो वारवारं हसन्त्या
मन्ये निःसंश्रयस्यांहसं[6] इव कृतया वेधसा[7] वासहेतोः ॥ ३०

31) यत्कोटिसंख्य[1]रिपुदारणसंख्यमध्ये
ऽसंख्यातवारमुपलब्धजया भवन्ति।
यच्चाज्ञयैव परिपान्ति[2] नरा जगन्ति
जेगीयते कृतिजनैस्तदिदं सुधर्मात् ॥ ३१ ॥

32) चक्री बाहुबलीश्वरेण तुलितो बाहुद्वयेनाहवे[1]
कैलासोऽपि च रावणेन जयिना गोवर्धनो विष्णुना।
यच्चापि प्रसभं[2] पृथातनुभुवा[3] तूर्णं[4] च तीर्णोऽर्णव[5]-
स्तद्विस्फूर्जितमूर्जितं[6] त्रिभुवने सद्धर्मचिन्तामणेः ॥ ३२

पुण्यपुरुष की मानो सौभाग्य रत्नमाला के समान होती है, वह सौन्दर्य की मर्यादारूप स्त्री ऊँचे पर्वत से निकलनेवाली नदी के समान सुखदायक होती है, वह शृंगाररूप वृक्षकी मंजरी जैसी होती है, वह रतिसुख की निधि व उत्तम कान्ति की पिटारी है। जिसकी दृष्टि से ही कामी मूर्छित हो जाता है, ऐसी वह स्त्री पूर्व जन्म में किये हुये पुण्य के प्रभावसे ही प्राप्त होती है ॥२९॥

अन्य जन किसी भी प्रकारसे भाग्यहीन स्त्रियों का रूप नहीं देखना चाहते, परन्तु कितने ही पापियों को ऐसी स्त्रियों का योग प्राप्त होता है। यदि उससे एक बार भी भाषण किया जाता है तो वह निरन्तर कुत्तीके समान भौंका करती है। वह अपने शरीर गुणके प्रभावसे चामुण्डासी प्रतीत होती है। वह बार बार हसती है। मानो ब्रह्मदेवने निराश्रय पापको रहने के लिये ही उसे बनाया है ॥३०॥

जहाँ करोडों शत्रुओं का विदारण किया जाता है ऐसे भयानक युद्ध में पुण्यवान पुरुष जो असंख्यात बार जयशाली होते हैं तथा आज्ञामात्रसे जो जगत्का संरक्षण करते हैं; वह सब उस उत्तम धर्म का ही प्रभाव है, जो विद्वान् जनों के द्वारा वारंवार गाया जाता है ॥३१॥

युद्धमें बाहुबलि कुमारने अपने दो बाहुओं के द्वारा जो भरत चक्रवर्ती को उठाया था तथा रावणने जो कैलास पर्वत को और जयशाली विष्णु (कृष्ण)ने जो गोवर्धन पर्वत को उठाया-

---

३०) 1 सुन्दरीणां निर्जितदेवाङ्गनानाम्. 2 पापिनः. 3 कुक्कुर्या कुक्कुरभार्यया. 4 सार्धम्. 5 सतत-हसवारं, वारंवारमित्यर्थः. 6 पापस्य. 7 ब्रह्मणा। ३१) 1 संग्राममध्ये. 2 परिरक्षन्ति। ३२) 1 संग्रामे. 2 हठात्कारेण. 3 अर्जुनेन भुजाभ्यां समुद्रस्तरितः यदा द्रौपदी धातकीखण्डे शत्रुणा हृता. 4 शीघ्रं नीता. 5समुद्र. 6उत्कटम्।

33) धराधरैर्वारिधिभिः समग्रामभ्युद्धरन्त्येव धरां कृतार्थाः[1] ।
प्रत्यंशुभिस्तूलमिवापरे[2] स्युस्तृणस्य कुब्जीकरणे ऽसमर्थाः ॥ ३३

34) स्याद् द्वात्रिंशत्सहस्रैः प्रणयविनतिभिः सेवितो भूपतीनां
त्रिस्तावद्भिः[1] सुरस्त्रीविसर[2]विजयिनां कान्तकान्ताजनानाम् ।
रत्नैर्द्विःसप्तसंख्यैरनिधन[3]सुधनैः[4] संनिधानैर्निधानै-
र्मर्त्यानां मूर्धवर्ती मणिरिव सुकृतान्निर्मिताच्चक्रवर्ती ॥ ३४

35) भूपा व्रजन्ति चलचामरवीज्यमानाः
श्वेतातपत्रधवलीकृतविश्वदेशाः[1] ।
लीलां द्युनायकभवां[2] च विलम्बमाना
जम्पानयानचतुरङ्गचमूवृतास्ते ॥ ३५

36) स्रवत्स्वेद[1]स्रवन्तीभिरभितो ऽप्यचला[2] इव ।
अनिला[3] इव वेगेन धावन्त्यन्ये[4] तदग्रतः ॥ ३६

था, इसी प्रकार पृथापुत्र अर्जुन ने जो लवणसमुद्र को शीघ्र पार किया था; उन सब को समृद्धिशाली इस त्रिभुवन में सद्धर्म रूप चिन्तामणि का ही प्रभाव समझना चाहिये ॥३२॥

सुकृती–पुण्यशाली–पुरुष पर्वत और समुद्रों सहित समस्त पृथ्वी को प्रत्यंशुओंके साथ रुईके समान उठाया करते हैं,परन्तु पुण्यहीन जन तिनके के भी मोडने में समर्थ नहीं होते हैं ॥३३॥

स्नेहसे नम्र हुये बत्तीस हजार राजाओंसे सेवित, देवांगनाओं के समूह को जीतनेवाली छियानबे हजार सुन्दर स्त्रियों से आराधित, तथा चौदह रत्नों एवं अक्षय उत्तम धन को धारण करनेवाली नौ निधियों से सम्पन्न जो चक्रवर्ती मनुष्यों के मस्तक पर स्थित चूडामणि के समान होता है वह भी पूर्वजन्म में किये हुये सुधर्म के प्रभावसे ही होता है ॥३४॥

ढुरते हुये चंचल चामरों से सुशोभित और श्वेत छत्र से समस्त पृथिवीप्रदेशों को धवलित (श्वेत) करनेवाले वे राजा लोग जो इन्द्र जैसी लीला का आलम्बन लेते हुये सुसज्जित पालकी व चतुरंग सेना से – हाथी, घोडा, रथ और पादचारी सैन्य से – वेष्टित होकर गमन किया करते हैं वह सब धर्मका ही प्रभाव है ॥३५॥

इसके विपरीत जो पापी हैं वे उनके आगे वायुके समान वेगसे दौडते है । उस समय

---

३३) 1 परिपूर्णार्थाः. 2 प्रतिकिरणैः. 3 पापाः । ३४) 1 ९६००० द्वात्रिंशत्सहस्रत्रिगुणीकृतानां स्त्रीणाम्. 2 कान्ति. 3 विनाशरहितैः परिपूर्णैः. 4 परिपूर्णैः । ३५) 1 समस्तप्रदेशाः. 2 इन्द्रलीलाम् । ३६) 1 प्रस्वेदनदीं वहन सन् अचलः पर्वत इव. 2 पर्वता इव. 3 पवन इव. 4 पापिनः ।

37) सप्ततुङ्गतलभूमिराजिते चारुरत्नचयरोचिरञ्चिते[1]।
मूर्तपुण्य इव सत्सुधासिते धाम्नि[2] धर्मनिलयाः[3] समासते[4] ॥ ३७

38) कोलैः[1] खातमृदन्नराशिनिचिता तार्णी[2] कुटी संकटा
वात्यामात्रवशा[3] रुजां वशगतैर्बालैः शकृन्मण्डिता[4]।
द्वारे ऽरंकुवता[5] खरेण रचिता वा वाङ्मयी पापिनो[6]
दृष्टा[7] चेश्वरहर्म्यकार्यरतया सम्यक् कदाभार्यया[8] ॥ ३८

39) खाद्यं स्वाद्यं शुचिसुरभितं पानकं चापि लेह्यं
भङ्गैरेषामुपचितमलं भुञ्जते स्वादु भोज्यम्।
स्वर्णादीनामिह सुकृतिनः स्थालकच्चोलकेषु
तेषां पुण्यैरमृतमिव यन्निर्मितं सूपकारैः ॥ ३९

40) त्र्यहोषितं[1] तैलघृतव्रताश्रितं करे कृतं नीरसमप्यगोग्यम्।
विधाय[2] कर्माणि धनाढ्यमन्दिरे कदन्नमस्ते[4] यदि भुञ्जते परे[5] ॥ ४०

उनके अंगसे चूते हुये पसीने की जो नदियाँ निकलती हैं उनसे वेष्टित वे पर्वतों के समान प्रतीत होते हैं ॥३६॥

पूर्वोपार्जित पुण्यके धारक पुरुष मूर्तिमान् पुण्य के समान होते हुये उत्तम चूने से धवल दिखनेवाले, सुन्दर रत्नसमूह की कान्तिसे युक्त, ऊंची सात तलभूमियों से शोभायमान महल में आनन्दसे निवास करते हैं ॥३७॥

इसके विपरीत घूसोंसे खोदी गयी मिट्टीरूप अन्न की राशिसे व्याप्त, संकुचित, झंझावातसे भरी हुई रोग के वशीभूत हुये–रोगी–बालकों के साथ मलसे मण्डित और द्वार पर शब्द करनेवाले गधे के द्वारा रची गयी कर्कश ध्वनिसे परिपूर्ण; ऐसी पापीकी घाससे निर्मित झोंपडी ईश्वर के गृहकार्य में निरत कुत्सित स्त्री के द्वारा देखी जाती है ॥३८॥

पुण्यशाली जन उन के पुण्यसे जिसे रसोइयोंने अमृतके समान निर्मित किया है ऐसे खाद्य, स्वाद्य, पवित्र और सुगंधित पानक और लेह्य–चाटने योग्य–इन चार भेदरूप मधुर भोजन का उपभोग सुवर्ण, चाँदी आदिकी थाली तथा कच्चोलक (प्याला) आदि पात्रों में किया करते हैं॥३९॥

जो पापी हैं वे धनाढ्यों के घरपर अनेक कार्यों को करके तीन दिनके बासे तथा तेल

---

३७) 1 D °रञ्जिते. 2 गृहे. 3 धर्मसंयुक्ताः 4 तिष्ठन्ति । ३८) 1 घूसविशेषैः 2 तृणमयी जीर्णा झूपडिका. 3 वधूतै. [वातधूलिः] (?) वातमण्डलः तस्य वशा. D°वात्यानात्र. 4 गूथेन मण्डिता. 5 शब्दायमानेन. 6 पापयुक्तपुरुषस्य. 7 सा तृणरचिता कुटी स्वकीयतया पापिनो भार्यया परगृहे कार्यरतया कदाचिदागत्य दृष्टा. 8. कुत्सिता भार्या कदाभार्या। ३९) 1 विकारः वा उद्वर्तनविशेषैः. 2 परिपूर्णम्. 3 सुकृतीनाम्. 4 भोजनम्। ४०) 1 त्रिदिनकृतमन्नं तैलघृतादिरहितं रूक्षमन्नमित्यर्थः. 2 कृत्वा. 3 कुत्सितमन्नम्. 4 दिनान्ते. 5 पापिजनाः।

41) पत्रैर्नागरखण्डपत्तनभवैः कर्पूरवल्ल्यादिजैः[1]
पूगैरीशपुरादिजैर्विरचितं सच्चूर्णसंभावितम् ।
कङ्कोलादिफलैरलंकृतमलं कर्पूरवेधोल्बणं
ताम्बूलं भुवि भोगमूलमपरे[4] खादन्ति रामार्पितम् ॥ ४१

42) नामाप्यन्ये[1] न जानन्ति ताम्बूलमिति भक्षणम् ।
केन संपाद्यतां तेषां पापोपहतजन्मनाम् ॥ ४२

43) वैडूर्यमुक्ताफलपद्मरागरत्नोच्चया द्वीपसमुद्रजा ये ।
धन्यस्य धामैव च धाम तेषां परं धुनीनामिव वारिराशिः ॥४३

44) कपर्दिनः कथंचित्स्युः सार्धचन्द्राः कपालिनः ।
चित्रं वृषदरिद्राश्च स्थाणवो[4] भूतिमण्डिताः ॥ ४४

और घीसे रहित नीरस व कुत्सित तुच्छ अन्न को हाथ में लेकर सूर्यास्त के समय खाया करते हैं ॥ ४० ॥

पुण्यशाली पुरुष नागरखण्ड नामक नगर में उत्पन्न हुये, कर्पूरवल्ली व नागवल्ली आदि के पत्रों से रचे गये, ईशपुर आदिक नगरों में उत्पन्न हुयी सुपारियों से मिश्रित, जिसमें उत्तम चूना लगाया गया है, कंकोल, इलायची व जायपत्री आदिकों से अलंकृत–सुगंधित, कर्पूर चूर्ण से युक्त ऐसे तांबूल को जो कि भोग का मूल कारण है और जो स्त्रियोंने अपने हाथसे दिया है, खाया करते हैं ॥ ४१ ॥

किन्तु पापी लोग खाना तो दूर रहा वे तो ताम्बूल का नाम भी नहीं जानते हैं। पाप से जिनका जन्म व्यर्थ हुआ है ऐसे लोगोंको ताम्बूल भला कौन देता है ? कोई भी नहीं ॥४२॥

जैसे नदियों का निवास स्थान समुद्र है वैसे द्वीप तथा समुद्र में उत्पन्न हुये इन्द्र-नील मणि, मुक्ताफल व पद्मराग आदि रत्नों के समूह पुण्यशाली पुरुषोंके घर को ही अपना घर समझ कर वहीं रहा करते हैं ॥४३॥

वृषदरिद्र – धर्महीन (वृषभहीन) – मनुष्य कथंचित् स्थाणु (शंकर) के समान हैं, यह आश्चर्य की बात है। स्थाणु (शंकर) जैसे कपर्दी–जटाजूट से संयुक्त हैं वैसे ही भाग्यहीन मनुष्य भी कपर्दी पैसों के अभाव में बाल न बनवा सकने से जटा जूट के धारक–होते हैं, शंकर यदि

४१) 1 उत्पन्नैः. 2 इन्द्रैः. 3 उत्कटम्. 4 पुण्यसंयुक्ताः । ४२) 1 पापाः. 2 दीयते. 3 पीडित । ४३) 1 रत्नोच्चयानाम्. 2 नदीनाम्. 3 समुद्र । ४४) 1 कोपीनकथंचित्स्युः (?). 2 ईश्वरस्य. 3 दरिद्रपक्षे पुण्यरहिताः, ईश्वरपक्षे एकवृषभोदयः. 4 ईश्वरा : ।

45) पट्टं चीनं द्वीपजं काञ्चिबालं[1]
वासोजातं[2] जायते पुण्यक्लृप्तम्[3] ।
प्रालम्बाद्यं[4] भूषणं पुण्यगेहे–
र्भूषा मन्ये [5]प्रत्युतैषां[6] च देहैः ॥ ४५

46) रथ्यां[1] निपातमलकर्पटखण्डक्लृप्तं
कौपीनमेव बहुनागफणं[2] हि वासः[3] ।
येषां[4] गले तरलहार इवैकतन्तु–
स्तेषां[5]मलं[6] सिचय[7]भूषणवर्णनाभिः ॥ ४६

47) तैलानि चारुकुसुम[1]नश्रयवासितानि
स्नानानि सन्ति भुवनेश्वरदुर्लभानि ।
गन्धाः सुगन्धसुरभीकृतविश्वदेशा
जात्यादिपुष्पनिचयास्त्रिदिवोद्भवा[2] वा ॥ ४७

सार्धचंद्र – अर्धचन्द्र से सुशोभित – हैं तो भाग्यहीन जन भी सार्धचन्द्र होते हैं – गलहस्त देकर दूर किये जाते हैं, शंकर यदि कपाली – कर्पट (खोपडी) के धारक – हैं तो पुण्यहीन जन भी कपाली – खप्पर में भिक्षा माँगनेवाले – होते हैं, तथा जिस प्रकार शंकर भूतिमण्डित – भस्म से सुशोभित – हैं उसी प्रकार पापी जन भी भूतिमण्डित – योग्य वस्त्रादि के अभाव में धूलिधूसरित – हुआ करते हैं। तात्पर्य यह कि धर्म से विहीन प्राणी अतिशय दरिद्र व निन्दा के पात्र होते हैं ॥४४

पुण्यवान लोगों को पुण्योदय से चीनपट्ट (चीन देश का उत्तम वस्त्र) तथा द्वीप में उत्पन्न हुआ कांचिवाल इत्यादि विविध प्रकार के वस्त्रों का समूह प्राप्त होता है। उनके गले में सरल और लंबा मुक्ताहार होता है। उनके पुण्ययुक्त देहोंसे ही मानो उनकी भूषा होती है ॥ ४५

इसके विपरीत जो दरिद्री हैं उन की लंगोटी मार्ग में गिरे हुये मलिन वस्त्र के टुकडों से बनी हुयी होती है, शरीर के ऊपर का वस्त्र अनेक भागों से बना हुआ होता है, तथा गले में चंचल हार के समान एक तन्तुवाला वस्त्र रहता है। उनके वस्त्र और अलंकारों का वर्णन निरर्थक है। ॥४६॥

पुण्यात्मा जन को सुंदर पुष्पसमूह के संसर्ग से सुवासित तेल, राजाओं को भी दुर्लभ ऐसे स्नान, अपनी सुगंधि से सर्व प्रदेशों को सुगंधित करने वाले गंध – चूर्ण अथवा इत्र आदि –

---

४५) 1 [illegible]लम्. 2 वस्त्रसमूहम्. 3 पुण्यरचितं पुरुषस्य. 4 हाराद्यम्. 5 व्याघुट्य. 6 पुण्यसहितानाम्। ४६) 1 मार्गपतितवस्त्रखण्डरचितम्. 2 फट्टं वस्त्रम्. 3 वस्त्रम्. 4 पुण्यरहितानाम्. 5 पापिनाम्. 6 पूर्जं [र्यं] ताम्. 7 वस्त्र। ४७) 1 मनोज्ञपुष्पसमूहवासितानि. 2 स्वर्गोद्भूता इव।

48) अभ्यङ्गाय सदाश्रुपातकुशलः स्नेहो ऽपि संजायते
देहस्यैव निघर्षणाय[1] विहितं पापात् खलोद्वर्तनम् ।
पङ्कः स्नानविशुद्धये ऽपि कुसुमं गन्धाय शीर्षे तृणं
भाले कर्करघर्षजं च तिलकं तत्कर्मणो[2] निर्मितम् ॥ ४८

49) सुखोष्ण[1]भोज्यैः शयनैः परार्घ्यैः[2]
स्तनावपीडं च रतैः प्रियाणाम् ।
सदंशुकैः पुण्यवतां प्रतीत–
मुपायनै[3]रर्चयतीव[4] शीतम् ॥ ४९

50) चन्द्रः[1] पल्लवसंस्तरः सुमनसो दिव्या प्रियासंनिधिः
श्रीखण्डं चलचामरोत्थपवनः सन्माधवीमण्डपः ।
धारागेहमुदञ्चदम्बु परितो हारा हिमांशु[2]प्रभा
ग्रीष्मस्फारिजगत्प्रतापमपि तं[3] भिन्दन्ति धन्यस्य[4] ते[5] ॥ ५०

तथा मानो स्वर्ग में उत्पन्न हुये ऐसे मालती आदिक वेलियों के पुष्पसमूह प्राप्त होते हैं ॥४७॥

इस के विपरीत जो पुण्यहीन हैं उन्हें अभ्यंगस्नान के लिये स्नेह (तेल) तो मिलता नहीं है, तब उसके अभाव में उनकी आँखों से शोक का जो अश्रुपात होता है वही उनके अभ्यंग स्नान के लिये स्नेह है; पाप से उनके देह का जो घर्षण होना है वही उनका खली का उद्-वर्तन होता है, उनके अंग में जो कीचड लगता है वह उनका उबटन है और मस्तक पर जो वे तृण भार धारण करते हैं वही उनका गंध है तथा भालप्रदेश में कंकड का घर्षण होने से जो चिन्ह प्रकट होता है वही तिलक है। ये सब प्रकार पाप ने दीनों का उपहास करने के लिये निर्मित किये हैं ॥ ४८॥

संतुष्ट शीतकाल मानो पुण्यशाली पुरुषों की, सुखप्रद कुछ उष्ण (ताजे) भोज्य पदार्थ, बहुमूल्य शय्याएं, स्तनों को मर्दित करते हुये किये गये प्रिय स्त्रियों के सम्भोग और उत्तम वस्त्र; इन उपहारों के द्वारा पूजा ही करता है, ऐसा प्रतीत होता है ॥४९॥

कपूर, कोमल पत्तों की शय्या, दिव्य पुष्प, स्त्री का सान्निध्य, चन्दन, चंचल चामरों की पवन, उत्तम माधवी लताओं का मण्डप, चारों ओर पानी फेंकनेवाला धारागृह तथा चंद्र की कांति को धारण करनेवाले हार ये भाग्यशाली के उत्तमोत्तम पदार्थ – जिसका कि प्रताप लोक में सर्वत्र फैला हुआ है ऐसे पराक्रमी ग्रीष्मकाल को भी नष्ट किया करते हैं ॥५०॥

४८) 1 उद्वर्तनाय. 2 तस्य पापिनः क्रीडार्थं, पापिजनभोगाय । ४९) 1 कथंचित् उष्ण. 2 उत्तमैः. 3 प्राभृतैः. 4 शीतं विनयं करोति। ५०) 1 कर्पूरः. 2 चन्द्रस्य. 3 ग्रीष्मम्. 4 पुण्यवतः. 5 चन्द्रादयः ।

51) आसीनानां[1] हिमगिरिनिभे हर्म्यपृष्ठे कदाचि-
त्क्रीडोल्लासादुपवनविहरणैरन्यदा वृष्टिदृष्टैः ।
गर्जं गर्जं तरुणरमणीकण्ठमाश्लेषयन्त्यो[2]
मेघैर्वर्षा इव सुकृतिनामाचरन्तीह दौत्यम्[3] ॥ ५१

52) तप्ताश्चण्डरुचेः करैरतिखरैर्ग्रीष्मस्य मध्यंदिने
कष्टं कर्दममर्दिनो[1] घनजलैर्वर्षासु भिन्नाङ्गकाः[2] ।
शीतार्ता निशि दन्तवीणनमित्र प्राप्ता हिमर्तौ[3] परे[4]
पापात्संकुचिताः श्ववत्[5] कथमहो तिष्ठन्ति भूशायिनः[6] ॥ ५२

53) अशेषताराग्रहभानुचन्द्राः
स्फुरन्ति दिक्चक्रलसत्प्रतापाः ।
हितेन[1] देवा दिवि[2] शं[3] भजन्ते
सदा सुरस्त्रीमुखमुग्धचित्ताः[4] ॥ ५३

पुण्यवान् लोग हिमालय पर्वत के समान धवल उन्नत भवन के ऊपर बैठते हैं, कभी क्रीडा करने की उत्कण्ठा उत्पन्न होने पर वे उद्यान में विहार करते हैं। वर्षा ऋतु, वर्षाकाल में देखे गये मेघ जब गर्जना करते हैं तब उनके द्वारा तरुणी स्त्रियों को उन पुण्यवान् पतियों के कण्ठ को आलिंगन कराती है। इस प्रकार वह वर्षा मानो पुण्यवान् पुरुषों के दूतकार्य को ही करती है ॥५१॥

इसके विपरीत दरिद्र जन पाप के प्रभावसे ग्रीष्म ऋतु में दिन के मध्यभाग में सूर्यकी अत्यन्त तीक्ष्ण किरणों से संतप्त होते हैं, वर्षाकाल में कीचड से लिप्त रहने वाले उन दीन लोगों का शरीर मेघ के पानी से भीगा रहता है, शीतकाल में जब वे ठंड से पीडित होते हैं तब उनके दांत वीणा के समान बजते हैं तथा शैत्य से अतिशय पीडित होने पर वे अपने शरीर को कुत्ते के समान संकुचित कर जिस किसी प्रकार पृथिवी पर सो जाते हैं। इस प्रकार पापोदय से उन्हें ग्रीष्मादि ऋतुओं में दुःख भोगने पडते हैं ॥५२॥

जिनका प्रताप संपूर्ण दिशाओं में व्याप्त हो रहा है तथा जिनका चित्त देविओं के मुखों पर आसक्त है ऐसे सब तारा, मंगलादिक ग्रह एवं सूर्य-चंद्र ये देव देवगति में उस हित-कर धर्म के प्रभाव से ही सुख का उपभोग करते हैं ॥५३॥

---

५१) 1 पुण्यजनानाम्. 2 रमणीनां पुरुषकण्ठे आश्लेषयन्त्यो वर्षाः. 3 दूतीभावो दौत्यम् । ५२) 1 पापिनः. 2 आर्द्रशरीराः. 3 शीतकाले. 4 पापिनः 5 कुक्कुरवत्. 6 जीवाः । ५३) 1 पुण्येन. 2 स्वर्गे. 3 सौख्यम्. 4 लग्नचित्ताः ।

54) यद्देवकोटिमुकुटार्चितपाद[illegible]ो
देवीभिरप्यहरहः[1] समुपासितश्च ।
शारीरमानससुखं स्वदते[2] द्युनाथ-[3]
स्तत्सर्वमङ्कुरितमुत्तमधर्मबीजात् ॥ ५४

55) ईर्ष्याविषादमदमत्सरमानहीनं
सर्वार्थसिद्धिमरुतो[1] ऽनुभवन्ति सौख्यम् ।
यत्सर्वथाप्युपमया रहितं विशालं
तद्धर्मवृक्षकुसुमं मुनयो वदन्ति ॥ ५५

56) मृत्यूत्पत्तिविवर्जितं निरुपमं दृग्ज्ञानवीर्योर्जितं
व्याधिव्रातविवर्जितं[1] शिवपदं नित्यात्मसौख्याश्रितम् ।
त्रैलोक्यप्रभुवल्लभं कथमपि प्राप्येत यद् दुर्लभं
प्रध्वस्ताखिलकर्मतो बुधजनास्तद् बुध्यतां धर्मतः ॥ ५६

जिसके चरण करोडों देवों के द्वारा पूजे जाते हैं तथा देवांगनाएँ जिसकी प्रतिदिन सेवा किया करती हैं ऐसा स्वर्ग का स्वामी इन्द्र जो शारीरिक और मानसिक सुखोंका उपभोग करता है वह सब उत्तम धर्मरूपी बीज से ही अंकुरित हुआ है । अर्थात् सुखरूप अंकुर धर्मरूप बीज से ही उत्पन्न होता है ॥ ५४ ॥

सर्वार्थसिद्धि के देव ईर्ष्या, विषाद, उन्माद, मत्सर तथा गर्व से रहित हो कर जो सर्वथा अनुपम महान् सुख का अनुभव करते हैं वह उस धर्मरूपी वृक्षका ही पुष्प है; ऐसा मुनिजन कहते हैं ॥ ५५ ॥

जो मोक्षपद मरण व जन्म से रहित, अनुपम, केवलदर्शन, केवलज्ञान और अनंत सुख से उत्कर्ष को प्राप्त; अनेक रोगसमूह से रहित, शाश्वतिक आत्मसुख से सम्पन्न और त्रैलोक्यप्रभु जिनेश्वर को अतिशय प्रिय है उस दुर्लभ मोक्षपद को जो विद्वान् जन समस्त कर्मों को नष्ट करते हुये किसी प्रकार से प्राप्त करते हैं उसे धर्म के प्रभाव से ही समझना चाहिये ॥ ५६ ॥

५४) 1 दिने दिने. 2 भुनक्ति. 3 इन्द्रः । ५५) 1 देवाः । ५६) 1 रहितम् ।

57) पुण्यापुण्यद्रुमफलमलं सम्यगालोचयन्तः[1]
कर्तुं योग्यं ह्यहितमथनं पुण्यमेव प्रवीणाः ।
यत्कल्याणैः प्रभुतममिदं संगमं संविधातुं[2]
तद्[3] भो भव्या दुरितसुरतिस्[4]त्यज्यतां[5] नीतिहन्त्री ॥ ५७

इति श्री-जयसेन-मुनि-विरचिते धर्मरत्नाकरनामशास्त्रे
पुण्यपापफलवर्णनप्रकाशकः प्रथमो ऽवसरः[6] ॥ १ ॥

पुण्यवृक्ष के फल की और पापवृक्ष के फल की मन में अतिशय भलीभाँति आलोचना करते हुये प्रवीण पुरुष अहित को नष्ट करने वाले उस पुण्य को ही करने योग्य समझते हैं यह पुण्य गर्भ, जन्म, तप, केवलज्ञान और मोक्षरूप पाँच कल्याणों का संगम करने में पूर्णतया समर्थ है। अतएव हे भव्यजन, आप नीतिका नाश करनेवाली पाप की प्रीति छोड दें ॥ ५७ ॥

इस प्रकार जयसेन मुनिविरचित धर्मरत्नाकर नामक शास्त्र में पुण्य-पाप फलोंका वर्णन करनेवाला प्रथम अवसर समाप्त हुआ है ॥ १ ॥

५७) 1 पश्यन्तः सन्तः. 2 कर्तुम्. 3 तस्मात्. 4 पापेषु सुष्ठु रतिः. 5 त्यजनीयम् । 6 P only प्रथमोवसरः ।

[२ द्वितीयोऽवसरः]

[अभयदानादिफलम्]

58) दानशीलार्चनावृद्ध्यै तपोधर्मस्य भावनाः ।
अगारिणां[1] यतः साध्ये[2] किंचित्कस्यापि साधनम्[3] ॥ १

59) प्रसिद्धम्–
यस्मादभ्युदयः[1] पुंसां निःश्रेयसफला[2]श्रयः ।
वदन्ति विदिताम्नायास्तं धर्मं धर्मसूरयः ॥ १*१

60) दानमाद्यमभयं भय[1]मुक्तैर्व्याहृतं[2] तदनु[3] चाहृ[4]तिनाम ।
ज्ञानसंज्ञमथ भेषजरूपं तच्चतुर्थमिति मुक्तिनिमित्तम् ॥ २

गृहस्थों के लिये दान, शील और जिनपूजा इनकी वृद्धि के लिये तपोधर्म की भावना निर्दिष्ट की गई है। चूंकि साध्यप्राप्ति के लिये कोई किसीका तो कोई किसीका साधन रहता है ॥ १ ॥

प्रसिद्ध भी है –

जिससे पुरुषों को मोक्षरूप फल के आधारभूत अभ्युदय की प्राप्ति होती है उसे जैनागम के ज्ञाता धर्माचार्य धर्म कहते हैं ॥ १*१ ॥

सब प्रकार के भय से रहित हुए गणधरादिकों ने पहला अभयदान, तदनंतर दूसरा आहारदान, तीसरा ज्ञान नामका दान और चौथा औषधदान ये दान के चार भेद निर्दिष्ट किये हैं। वह दान मुक्ति का कारण है ॥ २ ॥

---

१) 1 गृहस्थानाम्. 2 नित्यकरणीये 3 मोक्ष (?) । १*१) 1 धर्मात्. 2 मोक्ष । २) 1 भयरहितैर्मुनिभिः. 2 कथितम्. 3 तदनन्तरं. 4 अन्नदानम् ।

61) सत्त्वानामुपकाराय गुणिनां क्लिश्यतामपि[1] ।
यथा[2] तथा दयालुं[3] हि ददतं को ऽवमन्यते[4] ॥ ३

62) सर्वे ऽप्यास्तिकवादिनो यदभयं संमेनिरे[1] निर्मदा
विश्वेषां च यथा तथा प्रियतमं यत्प्राणितव्यं[2] नृणाम् ।
दानं ज्ञानतपोव्रतादि विफलं सर्वं विनैतेन[3] यत्
तस्मादाद्यमिदं मतं च निखिलं यच्चारु[4] तत्तत्फलम्[5] ॥ ४

63) प्रत्यक्षमर्थ[1]मिहलोकसुखं च वाञ्छन्
लोकं श्रयन् परिहरन् किल कायपीडाम्[2] ।
कायात्मतो परिणतां चितमध्यवस्यन्[3]
तामत्र नास्तिकबको[4] ऽपि दयां प्रमाति[5] ॥ ५

सम्यग्दर्शनज्ञानादि गुणों से संयुक्त गुणिजनों का तथा क्लेश को प्राप्त हुए दुखी जीवों का भी उपकार करने के लिये जो दयालु सत्पुरुष जिस किसी प्रकार से उन्हें उनके अनुकूल दान दे कर निर्भय करता है ऐसे दाता का भला कौन तिरस्कार करेगा? कोई भी ऐसे दाता का तिरस्कार नहीं कर सकता है ॥ ३ ॥

पाप, पुण्य एवं इह-पर लोक आदिक तत्त्वोंपर श्रद्धा न करनेवाले जो भी आस्तिक हैं मद से रहित उन सब को वह अभयदान अभीष्ट है । जैसे जीवन मनुष्यों को प्रिय है वैसे ही वह सब ही प्राणियों को अत्यन्त प्रिय है। इस अभयदान के बिना चूंकि अन्य दान, ज्ञान, तप एवं व्रत आदिक सब धर्माचार व्यर्थ होते हैं; इस लिये अभयदान को आद्य दान—मुख्य दान—माना गया है । इस दानका फल चारुता है अर्थात् इससे सौंदर्य प्राप्त होता है ॥ ४ ॥

जो केवल प्रत्यक्ष दिखते हुए पदार्थ को और इस लोक संबंधी सुख को ही स्वीकार करता है, जो लोक व्यवहार का आश्रय ले कर शरीर पीडा को दूर करता है, तथा जो शरीराकार से परिणत हुए चैतन्य को जानता है वह नास्तिक (चार्वाक) रूप बगुला भी दया को प्रमाण मानता है । तात्पर्य—केवल इहलोक का सुख प्राप्त करने के लिये नास्तिकों ने भी दया अर्थात् अभयदान को माना है ॥ ५ ॥

३) 1 क्लेशयुक्तानाम्. 2 यथा योग्यं तथा येन केन प्रकारेण. 3 दयां कुर्वन्तम्. 4 कः अवज्ञां करोति । ४) 1 आमनन्ति, कथयन्ति. 2 जीवितव्यं. 3 जीवितव्येन अभयदानेन इत्यर्थः. 4 मनोज्ञम्. 5 तस्य अभयदानस्य । ५) 1 पदार्थम्. 2 जीविव्यथां परिहरन्. 3 कायस्थैर्यं प्रति उद्यमं कुर्वन्. 4 नास्तिकमतान [नु] वादी. 5 प्रमाणं करोति ।

64) उक्तं च-
लोकवद् व्यवहर्तव्यो लौकिको[1] ऽर्थः परीक्षकैः ।
लोकव्यव[2]हारं प्रति सदृशौ बाल[3]पण्डितौ ॥ ५*१

65) ज्ञानात्स्वस्य ज्ञानदानं परेषां सर्वं वित्तात्स्वस्य वित्तप्रदानम् ।
यस्मात्तस्मादात्मवज्जीववर्गश्चिन्त्यः शश्वन्नात्र[1] किंचित्प्रमृग्यम् ॥ ६

66) भानुभ्रष्टमहो[1] यदि प्रभुमृते[2] राज्यं च संजायते
राजीवं[3] च जलाशयेन रहितं चित्रं तथापाश्रयम्[4] ।
पुंभा[5]मापगतं कुलं यदि धराहीनस्तथानोकहः[6]
प्राणित्राणविवर्जितो[7] ऽपि नियतं जायेत धर्मस्तदा ॥ ७

67) यथा शरीरं न हि जीववर्जितं मुखारविन्दं न यथाप्रलोचनम्[1] ।
दयाविहीनं क्रियमाण[2]मर्थिभिर्न धर्मकर्मा[3]पि विराजते तथा ॥ ८

कहा भी है-पदार्थ का स्वरूप जैसा लौकिक जन मानते हैं वैसा ही परीक्षकों को भी मानना चाहिये। लौकिक व्यवहार के प्रति बाल और पंडित समान हैं। अभिप्राय यह कि तात्त्विक विवेचन का परीक्षक जन भले ही परीक्षा कर के प्रमाण या अप्रमाण माने, परंतु लौकिक व्यवहार को उन्हें जैसा कि वह प्रचलित है वैसा ही मानना चाहिये ॥ ५*१ ॥

जो अपने पास ज्ञान है उससे अन्यजनों के लिये ज्ञानदान तथा जो अपने पास धन है उससे अन्य जनों के लिये धन का दान देना चाहिये। सर्व जीवसमूह को सदा अपने समान ही समझना चाहिये। इस विषय में अन्य कुछ विचार नहीं करना चाहिये ॥ ६ ॥

यदि कभी सूर्य के बिना दिन हो सकता है, राजा के बिना राज्य हो सकता है, जलाशय के बिना कमल उत्पन्न हो सकता है, आधार (भित्ति आदि) बिना चित्र रह सकता है, पुरुष और स्त्री के बिना कुल चल सकता है तथा पृथ्वी के बिना वृक्ष उत्पन्न हो सकता है तो प्राणिरक्षण के बिना निश्चय से धर्म भी हो सकता है। तात्पर्य यह कि प्राणिदया के बिना धर्म असंभव है ॥ ७ ॥

जिस प्रकार जीवरहित शरीर (शव) शोभा नहीं पाता तथा नेत्ररहित मुखकमल शोभा नहीं पाता है उसी प्रकार धर्माभिलाषी जनों के द्वारा दया के बिना किया जानेवाला धर्मकार्य भी शोभा नहीं पाता है ॥ ८ ॥

५*१) 1 D °लौकिकार्थपरी. 2 D °लोकानां व्यवहारं च सदृशौ. 3 अज्ञान। ६) 1 नात्र कश्चित् विचारोऽज्ञः। ७) 1 दिनम्. 2 प्रभुं विना. 3 कमलम्. 4 अपगताश्रयं कुड्यादि-आश्रयरहितम्. 5 पुरुषं विना पुत्रं विना वा. 6 वृक्षः. 7 जीवरक्षादिरहितम्। ८) 1 नेत्ररहितम्. 2 पुरुषैः. 3 धर्मकार्यम्।

68) वदतु विशदवर्णं[1] पातु[2] शीलं प्रपूर्णं
जप(य)तु विशदवर्णं[3] दानतश्चापि कर्णम्[4] ।
तपतु तप उदीर्णं नीरसं वात्तु[5] शीर्णं[6]
विफलमभयतीर्णं[7] भस्मनीवोपकीर्णम्[8] ॥ ९

69) गुरुजनपदाम्भोजध्यानं मरुद्गण[1]पूजनं
बहुजनमतं न्यायस्थानं कुलस्थितिपालनम् ।
अमलिनगुणग्रामाख्यानं विशुद्धयशोऽर्जनं[2]
अवति[3] यदि नो जीवानेतत्तत[4]स्तुषखण्डनम् ॥ १०

70) शिखी मुण्डी ब्रह्मव्रतधरमहाभैक्षचरणो
भदन्तो[1] दान्तो[2] वा भ्रमयतु जगत्तीव्रकिरणः ।
क्षमी ध्यानी मौनी वनचरसहावासकरण–
स्तमोनृत्तं यद्वद्विफलमखिलं[3] यन्नकरुणः[4] ॥ ११

मनुष्य निर्मल अक्षरों से परिपूर्ण सुन्दर भाषण करे, शील का पूर्णतया पालन करे, स्पष्ट अक्षरों का अर्थात् अर्हत्-सिद्धादिकों के वाचक मन्त्रों का जप करे, दान से निर्मल कीर्ति-धारक कर्ण को भी जीत ले, उत्तम तप करे तथा नीरस, गले हुए अन्न भक्षण भी करे तो भी अभयदान से रहित होने से ये सब कार्य धूल में मिल जाने के समान विफल है ॥ ९ ॥

मनुष्य यदि जीवों का रक्षण नहीं करता है तो गुरुजनों के चरण कमलों का ध्यान करना, देवों की पूजा करना, सर्व जनों को मान्य ऐसा न्यायस्थान का पद प्राप्त होना अर्थात् न्यायाधीश का पद प्राप्त होना, अपनी कुल मर्यादा–सदाचारों–का पालन करना, निर्मल गुण-समूह का वर्णन करना तथा निर्मल यश भी प्राप्त कर लेना ये सब कार्य तुष कंडन के–धान्य-कणों से रहित भूसा के कूटने के–समान व्यर्थ है ॥ १० ॥

मनुष्य यदि दया से रहित–निर्दय–है तो वह भले ही चोटी को धारण कर ले, शिर मुंडा ले, ब्रह्मचर्य व्रत को धारण करके भिक्षु जैसा आचरण करे, भद्रतायुक्त हो, जितेन्द्रिय हो, सूर्य के समान तेजस्वी हो कर विश्व का भ्रमण करता रहे, क्षमावान् हो, ध्यान करनेवाला हो, मौन को धारण करता हो तथा भीलों के साथ वन में रहनेवाला हो तो भी उसका यह सब आचरण अन्धकार में किये जानेवाले नृत्य के समान निष्फल होता है ॥ ११॥

९) 1 पटुवक्षरम्. 2 रक्षतु. 3 ब्राह्मणादिनिर्मलवर्णम्. 4 D °कीर्तिः. 5 भक्षयतु. 6 सडितम्. 7 अभयदानरहितम्. 8 घृतादिक्षिप्तम् । १०) 1 देव. 2 उपार्जनम्. 3 रक्षति. 4 कारणात् । ११) 1 ज्ञानवान्. 2 जितेन्द्रियः. 3 पूर्वोक्तं समस्तं विफलम्. 4 निर्दयः ।

71) दयया भवति समस्तं सफलं दानादि पूर्वनिर्दिष्टम् ।
दृष्ट्येव[1] बोधतपसी[2] विद्धा इव धातवो रसेन ॥ १२

72) चिरायुष्यं रूपं तरुणरमणीनेत्रसुभगं
विभोगाः साभोगा[1] गुरुरिव जगज्जीवशरणः ।
रणे वारण्ये वा यम[2]भयविधायिन्यपभयो[3]
भय[4]त्यागाद्भावी[5] निरवधिसुखैकान्तवसतिः[6] ॥ १३

73) धर्मस्य जीवितमिदं[1] च रहस्यमेतत्[1]
सर्वस्वमप्युपचयो[2] ऽचलवासभूमिः ।
आचन्द्र[-]धासितशासनमेतदेव
माङ्गल्यकोटिसमलंकृतजन्मलग्नम्[4] ॥ १४

74) जन्मसु सारं नृत्वं[1] पुरुषार्थस्तत्र[2] तत्र ननु धर्मः ।
तस्मिन्[3] दया विशाला सकलश्रीसहचरी[4] सारा[5] ॥ १५

उपर्युक्त श्लोकों में जिन दानादि धर्मकर्मों का वर्णन किया गया है वे यदि दया के साथ किये जाते हैं तो सब ही वे सर्व सफल होते हैं । जैसे—सम्यग्दर्शन के साथ ज्ञान व तपश्चरण तथा रसायन से वेधी गयी लोह आदि धातुएं सफल हुआ करती हैं ॥ १२ ॥

जिसने प्राणियों को अभयदान दे कर उन्हें निर्भय किया है उसे दीर्घ आयुष्य, युवान स्त्री के नेत्रों को लुभानेवाला सौन्दर्य तथा इन्द्रियों को तृप्त करनेवाले विपुल विशिष्ट भोग भी प्राप्त होते हैं । वह गुरु—माता-पिता—के समान जगत् के जीवों का रक्षण करता है । यम के भयको—मृत्युकी आशंकाको—उत्पन्न करनेवाले युद्ध में अथवा वन में भी निर्भय रहता है तथा भय से रहित हो जाने के कारण वह भविष्य में अमर्याद सुखोंका—मुक्ति सुखों का—एकान्त स्थान होता है ॥ १३ ॥

यह अभयदान धर्म का जीवित व रहस्य अर्थात् धर्म का निचोड व उसका सर्वस्व है । अर्थात् अभयदान देने से ही धर्म का पूर्ण आचरण होता है । इससे धर्म की वृद्धि होती है । यह अभयदान निश्चल वसति की—मोक्ष की—आधार भूमि है । जब तक जगत में चन्द्र-सूर्य हैं तब तक रहनेवाला धर्म का यह शुभ्र शासन है, और यही अभयदान करोडों मंगलों से अलंकृत हुआ धर्म का जन्मलग्न है ॥ १४ ॥

देव, नारकी और पशु आदि जन्मों में—पर्यायों में—मनुष्यपना सार है, उस मनुष्य

१२) 1 सम्यग्दर्शनेन. 2 ज्ञानतपसी द्वे । १३) 1 सविस्तारा:. 2 यमकृते भये. 3 भयरहितः. 4 अभयदानात्. 5 भविता. 6 निरवधिसुखैकवासः । १४) 1 अभयदानम्. 2 लक्ष्मीसमूहम्. 3 आज्ञा. 4 अभयदानम् । १५) 1 नृत्वे. 2 पुरुषार्थे. 3 धर्मे. 4 सखी. 5 समीचीना ।

75) न दृष्टिहीनं[1] वदनं[2] विराजते विलासिवृन्दं[3] न वि[illegible]तवर्जितम् ।
विलासिनी रूपविलासदूरिता यथा न धर्मो न तथा दयां विना ॥ १६

76) पितृ[illegible]ी[1] पुत्रः कुलपुत्री परगृहाटनसवित्री[2] ।
धर्मो दयाप्रहीणः प्रहीणधर्माः[3] स्[illegible] वन्त्येतान्[4] ॥ १७

77) विनय[illegible]कलान् संख्यातीतान्[1] विनेयजन[illegible]न्[2] न हि
न हि [illegible][3][illegible]हीणमतीन् यतीन् ।
मतिमपि न वा श्रेयोबन्ध[4]प्रसिद्धि[5]पराङ्मुखीं
न च करुण[illegible][6] धर्मं स्तुवन्ति कथंचन ॥ १८

78) ब्रूते मूकः श्रवणसुखदं वीक्षते ऽन्धो ऽपि रूपं[1]
पङ्गुः प्रौढं[2] चतुरचरणं धावते चेद्धरित्र्याम् ।
एडो[3] बाढं[4] यदि च शृणुया[5]दुच्यमानाक्षराणि
प्राणित्राणाचरणरहितस्तर्हि धर्मो ऽपि च स्यात् ॥ १९

पर्याय का सार पुरुषार्थ और उस पुरुषार्थ का सार निश्चय से धर्म है व उस धर्म में भी संपूर्ण संपदाओं के साथ रहनेवाली विशाल दया सार मानी गई है ॥ १५ ॥

जिस प्रकार नेत्रों के बिना मुख, सम्पत्ति के बिना विलासी जन का समूह और सौन्दर्य से विहीन विलासिनी—नेत्र, मुख एवं भृकुटियों आदिकी विशेषता से संयुक्त स्त्री—शोभायमान नहीं होती है । उसी प्रकार दया के बिना धर्म भी शोभायमान नहीं होता है ॥ १६ ॥

पिता की आज्ञा के प्रतिकूल चलनेवाला पुत्र, दूसरों के घर पर पर्यटन की जनक—सदा वहां जानेवाली—कुलीन पुत्री और दया से रहित धर्म इनकी वे ही प्रशंसा किया करते हैं, जो स्वयं धर्म से दूर—दुराचारी—हैं ॥ १७ ॥

विवेकी विद्वान् विनय से रहित असंख्यात शिष्यों की, यथार्थ वस्तु स्वरूप का प्रतिपादन करनेवाली बुद्धि से विहीन मुनियों की, पुण्यबंध की प्रसिद्धि से पराङ्मुख—पापबंध को सिद्ध करनेवाली—बुद्धि की और दया से रहित धर्म की किसी प्रकार से भी प्रशंसा नहीं किया करते हैं ॥ १८ ॥

यदि गूंगा मनुष्य कानों को सुख देनेवाला भाषण करने लगे, यदि अन्धा मनुष्य

---

१६) 1 अवलोकनरहितम्. 2 P °नयनं. 3 कामुकसमूहम् । १७) 1 शत्रुर्निन्दको वा अभक्तो वा. 2 उत्पन्नजननी भूमिर्वा. 3 पापिनः. 4 पुत्रादीन् । १८) 1 बहूनपि. 2 शिष्यजनान्. 3 पुण्यवन्तः पुरुषाः कृतधियः न स्तुवन्ति. 4 पुण्यं वा मोक्षो वा. 5 P °प्रसिद्ध. 6 रहितम् । १९) 1 विशिष्टरूपम्. 2 D °प्रौढश्च. 3 बधिरः. 4 अतिशयेन. 5 शृणोति ।

79) प्राणितव्य[1]मपहाय[2] नापरं प्राणिनां जगति यन्मतं[3] ततः ।
अष्टमूलगुणरात्र्यभोजनद्वादशव्रतविधिस्तदर्थकः[4] ॥ २०

80) दत्ते साक्षाज्जीविते किं न दत्तं तत्रापास्ते[1] किं न वापास्तमत्र[2] ।
भार्यापुत्रान् स्वान्[3] प्रियान् जीवितार्थी विक्रीणीते यत्ततो ऽस्तान्यभीतिः[4] ॥२१

81) उक्तं च–
वृणीष्वै[1]कतरं[2] देवैस्त्रैलोक्यप्राणितव्ययोः ।
इत्युक्ते त्रिजगल्लाति[3] को विमुच्य स्वजीवितम् ॥ २१*१

82) राज्यं प्राज्यं[1] रुचिररमणी रत्नकोशो धरित्री
सेनाजय्या च रथवा[2] ज्ञातिवर्गः समग्रः ।
भोगा योग्याः शयनभवनान्यासनाद्यन्यदेतत्
व्यर्थं सर्वं शववपुरलंकारवज्जीवहीनम् ॥ २२

विशिष्ट रूप को देखने लगे, यदि पङ्गु (लंगडा) पुरुष अतिशय उत्तम चाल से पृथ्वी पर दौडने लग जावे तथा यदि बहरा मनुष्य बोले जानेवाले अक्षरों को अतिशय सुनने भी लग जावे तो प्राणियों के रक्षण रूप आचरण से रहित प्रवृत्ति को भी धर्म माना जा सकता है ॥ १९ ॥

चूंकि लोक में अपने जीवित को छोड कर प्राणियों को अन्य कुछ भी प्रिय नहीं है, अतएव अष्ट मूलगुण, रात्रिभोजनत्याग और पाँच अणुव्रत, तीन गुणव्रत एवं चार शिक्षाव्रत ये बारह व्रत भी प्राणियों के जीवित के लिये उपयोगी कहे हैं ॥ २० ॥

श्रेष्ठ मुक्ति की दूती जैसी जिनेन्द्र की प्रतिमा को निर्मापित करानेवाले सद्गृहस्थने स्वर्गीय विषयभोग की भूमि को अपने हाथ में कर लिया, ऐसा मानो सुख का पत्र (रसीद), ही लिख दिया है । तात्पर्य यह है, जिन प्रतिमा को निर्माण करानेवाला भव्य जीव शीघ्र ही स्वर्ग व मोक्ष के सुख को प्राप्त किया करता है ॥ ५६ ॥

जिन प्रतिमा की प्रतिष्ठा-विधि से मनुष्य सत्पुरुषों के समूह में अपना निबंध – संबंध – स्थापित कर लेता है, तथा पाप को रोक देता है । यह जिनबिंब स्थापन का फल संक्षेप से सिद्ध है – कहा गया है ॥ ५७ ॥

५५) 1 मनुष्येन. 2 P °प्रतिमापदिष्टा. अप्रतिष्ठप्रतिमा. 3 नीतः. 4 कृतम् । ५६) 1 स्वर्गगोचर. 2 निर्मापकेन । ५७) 1 निदानं वा संबन्धः ।

181) भ्रूभङ्गानतभूमिपालमखिलं न प्रार्थये भूतलं
दूरादेव पराकरोमि तमपि स्वर्गाङ्गनासंगमम् ।
एतस्मिन् भवसागरे निपततामालम्बने निश्चला
भक्तिः केवलमस्तु नाथ भवतः पादारविन्दद्वये ॥ ५८

इति श्री-जयसेन-मुनि-विरचिते धर्मरत्नाकरशास्त्रे आहारदान-
जिनगृहनिर्म[illegible]र्णनो नाम तृतीयोऽवसरः ॥ ३ ॥

हे प्रभो! केवल मेरे भौंहों की कुटिलता से जिसके भूमिपाल नम्र हुए हैं ऐसी अखिल भूमि को भी प्रार्थना मैं नहीं करना चाहता तथा स्वर्गीय देवांगना के उस संगम को भी मैं नहीं चाहता—उस से दूर ही रहना चाहता हूँ। मैं तो केवल आपके चरणारविन्दों की उस भक्ति का चाहता हूँ, जो इस संसार-सागर में पडनेवाले जनोंको निश्चल हस्तावलम्बन देती है ॥५८॥

इस प्रकार तृतीय अवसर समाप्त हुआ ॥ ३ ॥

५८) 1 षट्खण्ड. 2 तिरस्करोमि. 3 जी[illegible]ानाम्. 4 भवतु. 5 P °इति तृतीयोऽवसरः ।

[४. चतुर्थो ऽवसरः]

[साधुपूजाफलम्]

182) मुक्ताफलानि बहुशो ऽपि सुवृत्तभाञ्जि
रन्ध्रान्वितानि गुणार्थ्यसहस्तनाति ।
गुण्यो गुणैरतितरां परिपूरयेत
तद्वत्कृती स्वहृदयं प्रविभूषणाय ॥ १

183) बलिबन्धनमालोच्य[1] युक्तं पात्रपरीक्षणम् ।
सो ऽवश्यं बध्यते मुग्धो निःशीलेभ्यो ददाति यः ॥ २

184) मातापितृकामदुघाप्रभृतीन् जयति प्रसत्तिरिह[1] यस्य[2]
भविनां सहगामिफलः[3] संघो ऽसौ पापात्[4]पातु ॥ ३

जैसे डोरा डालने के कार्य में समर्थ कोई कुशल कारीगर बहुतसे मोती अतिशय गोल होते हुए भी यदि वे छिद्रयुक्त हो तो वह उसमें डोरा डालता है, वैसे ही भव्य जीव सदाचारादि गुणों से युक्त होकर भी उसने अपना हृदय अधिक उज्ज्वल करने के लिये गुणों से अतिशय परिपूर्ण करना चाहिये ॥ १ ॥

बलिराजा के बन्धन को देखकर पात्रपरीक्षा के विना बलि राजा के अविवेकपूर्वक दान देने व इसी कारण उस के वामनरूपधारी—विष्णु के बन्धन में पडने का विचार करके—दाता को पात्र की परीक्षा करना उचित है । कारण कि जो मूर्ख निःशील—सदाचाररहित अपात्र—जनों के लिये देता है वह अवश्य बाँधा जाता है—कर्मबन्धन में पडता है ॥ २ ॥

जिस संघ की प्रसन्नता—वात्सल्यभाव—माता, पिता और कामधेनु आदि को जीतती है अर्थात् उनसे भी वह भक्तों का अधिक हित करती है तथा जिसकी प्रसन्नता का फल जीव के

२) 1 विचार्य । ३) 1 प्रसन्नता. 2 यस्य संघस्य. 3 सह ... फलः. 4 पापात् ।

185) यद्भक्तिप्रगुणा[1] भवन्ति[2] भविनः[3] सेव्याः सभाग्यैरपि[4]
यद्दानादिविधानतश्च[5] नियतं निःशेषसौख्याकराः ।
यद्ध्यानानुगमाज्जगत्यपि[6][7] सतां ध्येया[8] भवेयुः सदा
घोराघौघघनाघनैकपवनः[9] संघः स जीयाच्चिरम् ॥ ४

186) संघोऽनघः स्फुरदनर्घगुणौघरत्न–
रत्नाकरो हितकरश्च शरीरभाजाम् ।
निःशेषसद्गुणनिवासमुनीन्द्रजन्मा[1]
मान्यो[2] गुरुस्त्रिभुवनेऽपि समोऽस्य[3] नान्यः ॥ ५

187) श्रीसंघतो जगति तीर्थकृदप्यपार–[1]
माहात्म्यभूमिरुदपादि[2][3] यतो महर्द्धेः[4] ।
माणिक्यशैलत इवोत्तमजातिरत्नं
तत्पूर्वमेव[5] ननु को न नमस्यतीमम्[6] ॥ ६

साथ भवान्तर में भी जाता है अर्थात् परलोक में भी जो जीव के कल्याण को करती है, वह मुनि आदिकों का संघ मेरा पाप से संरक्षण करे ॥ ३ ॥

जिसकी भक्ति करने में तत्पर भव्यजन स्वयं भी भाग्यशाली जनों के द्वारा आराधनीय होते हैं, जिसके लिये दानादि देनेसे भव्य निश्चय से संपूर्ण सुखों की खान बनते हैं, तथा जिसके ध्यान के अनुसरण से ध्यातागण इस जगत में स्वयं सज्जनों के ध्येय बन जाते हैं, ऐसा घोर पातकसमूहरूप मेघ को अनुपम वायु के समान उडा देनेवाला वह मुनि आदि का संघ दीर्घकाल तक जयवंत रहे ॥ ४ ॥

समस्त सद्गुणों के निवासस्थानस्वरूप मुनिराजों से उत्पन्न वह निर्दोष संघ चमकनेवाले अमूल्य गुणसमूहरूप रत्नों का समुद्र हो कर प्राणियों का हित करनेवाला है इस संघ को मान्य गुरु ही समझना चाहिये । इसके समान त्रैलोक्य में और दूसरा कोई नहीं है ॥ ५ ॥

महा समृद्धि के धारण करनेवाले उक्त संघ से अपार माहात्म्य की भूमिस्वरूप तीर्थंकर इस प्रकार उत्पन्न होते हैं जिस प्रकार की माणिक्य पर्वत से उत्तम जातिवाला रत्न उत्पन्न होता है । इसलिये ऐसे संघ को पूर्व में ही नमस्कार कौन नहीं करता है? सब ही उसे पूर्व में नमस्कार करते हैं ॥ ६ ॥

४) 1 यस्य संघस्य. 2 गुणयुक्ता भवन्ति. 3 संसारिजीवाः. 4 भाग्यवन्तपुरुषैः. 5 यस्य संघस्य. 6 संघस्य. 7 पृष्ठगामित्वात्. 8 आराध्याः. 9 यः संघः पापौघमेघसमूहस्य पवनः । ५) 1 उत्पादकः. 2 नमस्कारार्हः. 3 संघस्य । ६) 1 तीर्थंकरत्वम्. 2 योनिः. 3 उत्पन्नः. 4 महर्द्धियुक्तात् श्रीसंघात्. 5 तस्मात्. 6 श्रीसंघम् ।

188) क्लशाप[illegible][1] सपदि [illegible]न्दरनामधेयं[2]
[illegible]त्वाप्यमुष्य[3] परिपुष्यति[4] भागधेयम्[5] ।
आलापमात्रम[illegible]पि लुम्पति पात[illegible]ानि
कां योग्यतां तनुमतां[6] तनुते न योगः[7] ॥ ७

189) श्रीसंघे परि[illegible]जिते किमु न यत्संपूजितं पूजकै[1]-
रेतस्मिन्[2] गृहमागते किमु न यत्कल्याणमभ्यागतम् ।
एतत्पाद[3][illegible][4] पुंसां महापातकं
मूर्धस्थेन[5] विलीयते यदधिका शु[illegible]स्तद[6]त्राद्भुतम्[7] ॥ ८

190) या[illegible]चनात्र[1] भक्त्या विभाजितं[2] वितनुते[3] फलं विशदम्[4] ।
तोयमिव शुक्तिसंपुटपतितं मुक्ताफलं विमलम् ॥ ९

इस संक्लेश के नाशक संघ के सुंदर नाम के स्मरण मात्र से भी प्राणी का भाग्य (पुण्य) शीघ्र ही परिपुष्ट होता है । इसके नामोच्चारण से भी पाप नष्ट होते हैं । इस प्रकार उसका संबंध प्राणियों की कौनसी योग्यता को विस्तृत नहीं करता है? अर्थात् संघ की भक्ति से मनुष्य विशेष योग्यता को प्राप्त करता है ॥ ७ ॥

पूजकों के द्वारा श्रीसंघ की पूजा की जानेपर अन्य कौन नहीं पूजा गया? अर्थात् संघ की पूजा से देवपूजा तथा शास्त्रपूजा आदि का भी फल प्राप्त होता है । इस श्रीसंघ के घर पर आने से कौनसा कल्याण अपने घर में नहीं आया? अर्थात् संघ के घर पर आने से कुटुम्ब का महान् हित होता है । मस्तक पर लगाई गई संघ के चरणकमल की रज से पुरुषों का महापातक नष्ट होकर उससे जो अधिक शुद्धि होती है, यह आश्चर्य की बात है । तात्पर्य, यह है कि रज (धूलि) मलिन है और मलिन के संघ से कभी शुद्धि नहीं होती परन्तु इस पवित्र संघ के चरण स्पर्श से अतिशय पवित्रता को प्राप्त हुई उक्त रज के मस्तकपर लगाने से जीव का पापमल नष्ट होता है । इसलिये उससे आत्मा के शुद्ध होने में कोई आश्चर्य नहीं है ॥ ८ ॥

यहाँ जो कुछ भी अतिथि के लिये भक्तिपूर्वक विभाजित किया जाता है — दिय जाता है — वह दाता के लिये इस प्रकार निर्मल फल को विस्तृत करता है जिस प्रकार कि सीपके मध्य में गिरा हुआ जल निर्मल मोती को विस्तृत करता है ॥ ९ ॥

---

७) 1 विनाशकम्. 2 आख्यम्. 3 संघस्य. 4 पोषयति. 5 सौभाग्यम्. 6 प्राणिनाम्. 7 संघस्य संयोगः । ८) 1 जनैः वा पूजाकरणशीलैः. 2 श्रीसंघे. 3 संघस्य. 4 धूल्या. 5 म[illegible]कस्थेन. 6 जनेषु संघेषु वा 7 आश्चर्यम् । ९) 1 संघे. 2 विभागं कृतम्. 3 विस्तारयति. 4 निर्मलं बहुमूल्यं वा ।

191) अनघे संघक्षेत्रे श्रद्धामृतासिक्तमु[1]प्तमल्पमपि ।
जनयति फलं विशालं वटबीजमिव क्षेत्रे[2] वटवृक्षम् ॥ १०

192) वित्तं वितीर्णं[1] विस्तीर्णे पवित्रे पात्रसत्तमे[2] ।
संघे संजायते[3] ऽनन्तं[4] गतमर्णमि[5]वार्णवे[6] ॥ ११

193) समस्तः पूजितः संघ एकदेशे ऽपि पूजिते ।
विन्यस्ते[1] मस्तके पुष्पे पूज्यो[2] जायेत पूजितः ॥ १२

194) गजव्रजस्येव[1] हि दिग्गजेन्द्राः संघस्य मुख्या मुनयः प्रणीताः ।
तेभ्यः[2] प्रदानं विधिना निदानं[3] निर्वाणपर्यन्तसुखावलीनाम् ॥ १३

195) साधवो जङ्गमं तीर्थं जल्पज्ञानं[1] च साधवः ।
साधवो देवता मूर्ताः साधुभ्यः साधु नापरम् ॥ १४

196) तीर्थं ज्ञानं स्वर्गिणो[1] नोपकुर्युः[2] सत्त्वा[3]नित्थं साधुसार्थो यथोच्चैः[4] ।
धर्माधर्मप्रेरणावरणाभ्या[5]मर्थानर्थौ साधयन्[6] बाधयं[7]श्च ॥ १५

निर्दोष संघरूप खेत में श्रद्धारूपी अमृत से सोंचा गया – श्रद्धापूर्वक दिया गया – दान प्रमाण में अल्प भी हो तो भी वह इस प्रकार विस्तृत फल को उत्पन्न करता है जिस प्रकार कि उत्तम खेत (भूमि) में जल से सींच कर बोया हुआ वट का वीज विशाल वटवृक्ष को उत्पन्न करता है ॥ १० ॥

विस्तीर्ण, विशुद्ध व योग्य पात्ररूप संघ में दिया हुआ धन समुद्र में गये हुये पानी के समान अनन्त बन जाता है ॥ ११ ॥

संघ के एक विभाग की भी पूजा करने पर समस्त संघ पूजित होता है । ठीक है – मस्तक के ऊपर फूल के चढानेसे पूज्य व्यक्ति का समस्त ही शरीर पूजित होता है ॥ १२ ॥

जैसे दिग्गजेन्द्र हाथियों के समूह के मुख्य माने जाते हैं, वैसे ही मुनिजन संघ के मुख्य माने जाते हैं । उन मुनियों को विधिपूर्वक दिया गया दान मुक्तिपर्यन्त समस्त सुख-समूहों का कारण होता है ॥ १३ ॥

मुनिजन मानो जंगम – चलते फिरते – तीर्थ व बोलनेवाले ज्ञान हैं । वे मुनि देवता स्वरूप हैं । लोक में उन मुनियों से उत्कृष्ट और दूसरा कोई भी नहीं है ॥ १४ ॥

ज्ञान चूँकि प्राणियों को संसाररूप समुद्र से पार कराता है, अतः तीर्थ उसे ही समझना चाहिये । साधुसमूह प्राणियों को धर्म में प्रेरित कर उनके अभीष्ट अर्थ को सिद्ध करता है

---

१०) 1 वपितम्. 2 पृथिव्याम् । ११) 1 दत्तम्. 2 उत्तमे. 3 उत्पद्यते. 4 P °ते नूनं ग°. 5 जलम्. 6 सागरे । १२) 1 धृते. 2 पूजार्हः । १३) 1 हस्तिसमूहस्य. 2 मुनिभ्यः. 3 कारणम् । १४) 1 श्रुतज्ञानम् । १५) 1 देवाः. 2 उपकारं न कुर्युः. ३ जीवान्. 4 करोति. 5 द्वाभ्यां कृत्वा. 6 कथयन्. 7 नाशयन् ।

197) साधूपदेशतः सर्वो धर्ममार्गः प्रवर्तते ।
विना तु साधुभिः सर्वा तद्वार्ता[1] विनिवर्तते ॥ १६

198) दर्शनं बोधश्चरणं मुनिभ्यो नापरं मतम् ।
त्रयाच्च नापरं पूज्यं कथं पूज्या न साधवः ॥ १७

199) क्वचित्त्रयं द्वयं वापि दर्शनार्थोद्यमः क्वचित् ।
प्रायो न निर्गुणो लिङ्गी स्तुत्यः[1] सर्वस्ततः सताम् ॥ १८

200) चित्रे ऽपि लिखितो लिङ्गी वन्दनीयो विपश्चिता[1] ।
निश्चेताः[2] किं पुनश्चित्तं दधानो[3] जिनशासने ॥ १९

201) नानारूपाणि कर्माणि[1] विचित्राश्चित्तवृत्तयः ।
मन्दा अपि बहिर्वृत्त्या[2] विमलाश्चेतसा[3] पुनः ॥ २०

तथा पाप का निवारण करके उनकी होनेवाली हानि को भी रोकता है । अतएव वह उनको जिस प्रकार उपकार करता है उस प्रकार देव उनका उपकार नहीं कर सकते हैं अथवा तीर्थ, ज्ञान और देव प्राणियों का ऐसा उपकार नहीं कर सकते हैं जैसा की साधूसमूह धर्म की प्रेरणा और पाप के निवारणद्वारा उनका अतिशय उपकार करता है ॥ १५ ॥

सब धर्म का मार्ग साधु के उपदेशसे ही चालू रहता है । यदि साधु नहीं हो तो उनके विना धर्म की सब बात ही समाप्त हो जाती है ॥ १६ ॥

सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्र ये तीनों उन मुनियों से कुछ अन्य नहीं माने गये हैं, – उनको रत्नत्रय स्वरूप ही समझना चाहिये, तथा इस रत्नत्रय से कोई अन्य वस्तु जगत में पूज्य नहीं है । इसलिये वे साधु पूज्य कैसे नहीं हैं ? अवश्य ही वे पूजने के योग्य हैं ॥ १७ ॥

उपर्युक्त सम्यग्दर्शनादि में किसी के वे तीनों, किसीके दो और किसीका केवल सम्यग्दर्शन के लिये ही प्रयत्न रहता है । परंतु लिंगी – जिनलिंगका धारक साधु – प्रायः उक्त सम्यग्दर्शनादि गुणों से रहित नहीं होता है । अतः सत्पुरुषों को जिनलिंग के धारक सब ही साधुओं की स्तुति करनी चाहिये ॥ १८ ॥

चित्र में लिखा हुआ अचेतन भी साधु विद्वान् के द्वारा वन्दनीय होता है । फिर भला जो सचेतन साधु अपने चित्त को जिनागम या जैनधर्म में लगा रहा है उसका तो कहना ही क्या है ? अर्थात् वह तो सब के द्वारा वन्दनीय होना ही चाहिये ॥ १९ ॥

जिस प्रकार बाह्य क्रियाएँ अनेक प्रकार की होती हैं उसी प्रकार चित्तकी वृत्तियाँ –

---

१६) 1 धर्ममार्गस्य । १८) 1 स्तवनार्हः । १९) 1 पण्डितेन. 2 चेतनारहिताः. 3 धारयन् । २०) 1 कार्याणि. 2 बहिराचरणे. 3 चित्तेन निर्मला मुनयः ।

202) मनसा वचसा दृष्टं[1] कायेनापि समर्ज्यते[2] ।
आत्मनीनं[3] जनः सर्वः कथंचन करोत्यतः ॥ २१

203) तस्मान्महान्तो गुणमाददन्तु[1] दोषानशेषानपि संत्यजन्तु ।
गृह्णन्ति दुग्धं जलमुत्सृजन्ति हंसाः स्वभावः स निजः शुचीनाम्[2] ॥ २२

204) गृह्णन्[1] नामापि नाम[2]ेह कुर्वन् नामादिकं[3] पुनः ।
जिनस्य मन्ये मान्यः[4] स्यात्तद्भक्तानां[5] स्वभावतः ॥ २३

205) लेखवाहो ऽपि भूपस्य स्वामिभक्तैर्नियुक्तकैः[1] ।
मान्यते निर्गुणोऽप्येवं लिङ्गी जिनप्रियैः ॥ २४

206) सर्वज्ञो हृदये यस्य[1] वाचि सामायिकं करे ।
धर्मध्वजो[2] जगज्ज्येष्ठो ग्रामणीर्गुणिनां[3][4] ॥ २५

मानसिक चिन्तन–भी अनेक प्रकार के होते हैं । कितने जीव बाह्य आचरण से हीन दिखते हुये भी मनोवृत्ति की अपेक्षा निर्मल हो सकते हैं ॥ २० ॥

जो मन व वचन से देखा गया है वह शरीरसे भी उपार्जित किया जाता है – शरीर की प्रवृत्ति भी वैसी ही हुआ करती है । इसलिये समस्त जन किसी न किसी प्रकार से आत्म-हित करता ही है ॥ २१ ॥

इसलिये जो महापुरुष है उन्हें सब दोषों को छोडकर गुणों को इस प्रकार ग्रहण करना चाहिए जिस प्रकार कि हंस पानी को छोडकर दूध को ग्रहण किया करते हैं । सो योग्य भी है, क्योंकि जो निर्मल होते हैं उनका यह निजी स्वभाव होना है ॥ २२ ॥

लोक में जो जिनेश्वर के नामको ग्रहण करता है–उसका स्मरण करता है व नमस्कार आदि को भी करता है वह जिनभक्तों को स्वभावसेही मान्य होना है, ऐसा मैं समझता हूँ ॥२३॥

जो राजाका लेख ले जानेवाला दूत होता है वह भी स्वामिभक्त राजपुरुषों के आदर का पात्र होता है । इसी प्रकार जिन को जिनमत में अनुराग है वे निर्गुण–सम्यग्दर्शनादि गुणों से रहित–भी साधु का आदर किया करते हैं ॥ २४ ॥

जिसके हृदय में सर्वज्ञ, वचन में सामायिक और हाथ में धर्म का ध्वज– पीछि–है वह लोक में श्रेष्ठ और गुणिजनों में अगुआ होता है ॥ २५ ॥

---

२१) 1 कर्म. 2 उपार्जयता. 3 आत्महितम् । २२) 1 गृह्णन्तु. 2 निर्मलपुरुषाणाम् । २३) 1 नाम गृह्णन् सन्. 2 अहो. 3 नमस्कारादिकम्. 4 वन्दनीयः. 5 तस्य जिनस्य भक्तानाम् । २४) 1 नियोगिभिः । २५) 1 मुनीश्वरस्य. 2 प्रतिलेखनः पिच्छिकेत्यर्थः. 3 अग्रणीः. 4 मुनिः ।

207) न सन्ति येषु देशेषु साधवो धर्मदीपकाः ।
नामापि तेषु[1] धर्मस्य जायते न कुतः क्रिया ॥ २६

208) धर्मं कुर्वन्ति रक्षन्ति वर्धयन्ति सुमेधसः[1] ।
कथं न वन्द्या विश्वस्य[2] साधवो धर्मवेधसः[3] ॥ २७

209) करणकारणसंमतिभिस्त्रिधा[1] वचनकायमनोभिरुपार्जयन्[2] ।
कथमपीह[3] शुभाशुभचेतसां[4] मुनिजनो ऽजनि[5] पूजनभाजनम् ॥ २८

210) ज्यायःपात्रं[1] श्रेयश्चित्तं स्वायत्तं[2] सद्गेहे वित्तम् ।
एतल्लभ्यं[3] पुण्यैः पूर्णं मुक्तिप्राप्तेर्यानं[4] तूर्णम्[5] ॥ २९

211) केषांचिच्चित्तवित्तं भवति भुवि नृणां दानयोग्यं न पात्रं
पात्रे प्राप्ते परेषां गुणवति[1] भवतो नोचिते चित्तवित्ते[2] ।
स्याच्चित्तं नापरे द्वे[3] द्वितयमपि[4] भवेत् कस्यचिन्नैव वित्तं
वित्तं कस्यापि नोभे[5] उभयमपि[6] न तद्दुर्लभं[7] यत्समग्रम्[8] ॥ ३०

जिन देशों में धर्म को प्रकाशित करनेवाले साधु नहीं रहते हैं, उन देशों में धर्म का जब नाम भी नहीं रहता है तब भला आचरण कहाँ से हो सकता है ? ॥ २६ ॥

धर्म के विधाता निर्मलबुद्धि साधु धर्म का आचरण, संरक्षण और वृद्धि भी किया करते हैं। फिर भला वे लोक के वन्दनीय कैसे नहीं होते हैं ? ॥ २७ ॥

कृत, कारित और अनुमत इन तीन के साथ वचन काय और मन से (पुण्य) उपार्जित करनेवाला मुनिजन यहाँ निर्मल व कलुषित चित्तवालों के लिये जिस किसी भी प्रकार से पूजा का पात्र हुआ है ॥ २८ ॥

उत्तम पात्र, योग्य पुण्य, मन की स्वाधीनता और समीचीन गृह में संपत्ति का सद्भाव; यह सब सामग्री पूर्णरूप से भाग्यशाली मनुष्यों को पुण्योदय से प्राप्त होती है। इसे मोक्ष प्राप्ति के लिये शीघ्रगामी यान – रथ आदि वाहन – के समान समझना चाहिये ॥ २९ ॥

इस संसार में कितनेही धर्मप्रेमी सज्जनों के मन में धर्मप्रेम और दान के योग्य धन भी रहता है, परन्तु उन्हें दान के लिये योग्य पात्रकी प्राप्ति नहीं होती। दूसरे किन्हीं को

२६) 1 देशेषु । २७) 1 सुष्ठुबुद्धियुक्ताः. 2 त्रैलोक्यस्य. 3 धर्मकर्तारः । २८) 1 कृतकारितानुमतैः. 2 मुनिः सन्. 3 जगति. 4 भव्यानाम्. 5 अभूत् । २९) 1 उत्तमपात्रम्. 2 स्वाधीनम्. 3 चतुष्कम्. 4 कारणाय. 5 शीघ्रम् । ३०) 1 पात्रे. 2 द्वे. 3 द्वे पात्रवित्ते. 4 पात्रं चित्तम्. 5 द्वे पात्रचित्ते. 6 पात्रं चित्तम्. 7 न वित्तम्. 8 यस्मात् समस्तं दुर्लभम् ।

212) ज्ञानोत्तमं किमपि किंचन दर्शनाढ्यं
पात्रं पवित्रितजगत्त्रयसच्चरित्रम् ।
किंचित्तपोगुणमयं द्विगुणं समग्रै –
र्युक्तं गुणैः किमपि[1] पूज्यमशेषमेवं[2] ॥ ३१

213) मिथ्यात्वध्वान्तविध्वंसे पटीयांसो[1] महौजसः[2] ।
सुवृत्ताः[3] कस्य नो पूज्याः स्युः[4] सूर्या इव सूरयः[5] ॥ ३२

214) तारका इव भूयांसः[1] स्वप्रकाशकरा नराः ।
प्रकाशयन्तस्तत्त्वानि दुर्लभा भास्करा इव ॥ ३३

215) किंचित्प्रकाशपटवो[1] बहवो हि पापाः
संतापका हुतवहा इव सन्ति लोके ।
प्रीणाकरः[2] प्रकटिताखिलवस्तुतत्त्वाः
सत्त्वाधिका[3] शशधरा इव पुण्यलभ्याः[4] ॥ ३४

रत्नत्रय से विभूषित पात्र तो प्राप्त होता है, परन्तु उनके चित्त में धर्मप्रेम और धन दोनों भी नहीं रहते। किन्हीं का चित्त तो होता है परन्तु तदनुकूल वित्त और पात्र दोनों भी नहीं होते हैं। किन्हीं के चित्त और पात्र होते हैं, परंतु इस योग्य वित्त नहीं होता है। तथा किसीके पास चित्त तो होता है पर वित्त और पात्र नहीं होते हैं। इस प्रकार सब सामग्री दुर्लभ ही है ॥३०॥

कोई पात्र ज्ञान से उत्तम, कोई दर्शन से पूर्ण और कोई जगत्त्रय को पवित्र करनेवाला सम्यक् चारित्र से युक्त होता है। कोई पात्र तपोगुण से युक्त, कोई दो गुणों से युक्त और कोई पात्र सर्व गुणों से परिपूर्ण होता है। ये सब ही पात्र पूज्य हैं ॥ ३१ ॥

सूर्य के समान मिथ्यात्वरूप अंधकार के नष्ट करने में अतिशय चतुर, महातेजस्वी और उत्तम चारित्र के धारक आचार्य किसको पूज्य नहीं होते हैं ? ॥ ३२ ॥

ताराओं के समान अपनेको ही प्रकाशित करनेवाले पुरुष तो बहुत हैं, परंतु सूर्य के समान अन्य जीवादि तत्त्वों को प्रकाशित करनेवाले पुरुष दुर्लभ हैं ॥ ३३ ॥

लोक में थोडेसे प्रकाश को धारण करनेवाले पापी लोग तो बहुत हैं। ऐसे लोग अग्नि के समान संताप को उत्पन्न किया करते हैं। परंतु संपूर्ण वस्तुतत्त्व को प्रकाशित करते हुए वात्सल्य रखनेवाले धैर्ययुक्त लोग चन्द्र के समान पुण्यसे ही प्राप्त हुआ करते हैं ॥ ३४ ॥

---

३१) 1 बहुनोक्तेन. 2 समस्तमुनिगणम् । ३२) 1 प्रकाशवन्तो बुद्धिवन्तश्च. 2 प्रतापवन्तः. 3 वृत्ताकाराश्चारित्रयुक्ताश्च. 4 भवेयुः. 5 आचार्याः साधव इत्यर्थः । ३३) 1 बहवः । ३४) 1 प्रवीणाः. 2 अधिकक्रियावन्तः. 3 उत्तमपुरुषाः. 4 दैवयोगात् लभ्याः ।

216) उज्जासयन्तो[1] जाड्यस्य[2] पदार्थानां प्रकाशकाः ।
भास्करा इव दुष्प्रापाः साधवो विश्वपावनाः ॥ ३५

217) निःशेषनिर्मलगुणान्तरसारहेतौ[1]
संसारसागरसमुत्तरणैकसेतौ ।
ज्ञाने यतेः[2] सति सतामतिपूजनीये
दौर्जन्यमन्यगुणवीक्षणमेव[3] मन्ये ॥ ३६

218) आलोकेनैव संतापं हरन्ते ऽतिमनोहराः ।
बुधप्रिया[1] विलोक्यन्ते क्वापि पुण्यैर्दिगम्बराः[2] ॥ ३७

219) ज्ञानाधिको वरनरः स्वपरोपकारी
मुक्तक्रियो ऽपि मतमुन्नमयन्[1] महात्मा ।
सुष्ठूद्यतो ऽपि करणे न सुशास्त्रशून्यः
स्वार्थे प्रियः कुशलताविकलो वराकः ॥ ३८

जो सूर्य के समान जडता को – शैत्य व अज्ञानान्धकार को – नष्ट करके पदार्थों को प्रकाशित करते हुए विश्व को पवित्र किया करते हैं ऐसे साधु लोक में दुर्लभ ही हुआ करते हैं ॥ ३५ ॥

अन्य समस्त निर्मल गुणों का श्रेष्ठ हेतु, संसाररूप समुद्र से पार करने के लिये अद्वितीय पुल के समान और सज्जनों के द्वारा अतिशय पूज्य ऐसा ज्ञानगुण यदि मुनि के पास विद्यमान है तो फिर उसके अन्य गुणों का देखना – उनकी अपेक्षा करना – दुष्टता ही है, । ऐसा मैं समझता हूँ ॥ ३६ ॥

जो अतिशय मनोहर, विद्वत्प्रिय, मुनिराज अपने दर्शन से ही लोगों के संताप को नष्ट किया करते हैं वे दिगम्बर मुनिराज पुण्योदय से ही कहीं पर दिखते हैं । अर्थात् ऐसे विद्वान् मुनिराजों का दर्शन दुर्लभ है ॥ ३७ ॥

जो ज्ञान में श्रेष्ठ उत्तम पुरुष अपना व अन्य का भी उपकार करनेवाला है, वह महात्मा क्रिया से – चारित्र से – हीन होता हुआ भी मत को – जैन शासन को – समुन्नत करनेवाला है इसके विपरीत जो करण में –क्रिया में–तो भली भांति प्रयत्नशील है, परन्तु उत्तम शास्त्रज्ञान से रहित है वह बेचारा कुशलता से रहित हो कर स्वार्थ में ही प्रिय है – उसी में अनुरक्त रहता है ॥ ३८ ॥

---

३५) 1 [उज्जाडयन्तो ?] उद्वासयन्तः. 2 जडतायाः शीतस्य । ३६) 1 समस्तगुणमध्यसारकारणभूते. 2 व्रतिनः. 3 दर्शनादि । ३७) 1 बुधनामा ग्रहः पण्डितश्च. 2 यतयश्चन्द्राश्च । ३८) 1 स्वकीयमतम् उन्नतिं नयन् ।

220) जैनं प्रभावयति[1] शा.नमाङ्गसार्थं[2]
यो बोधयत्यनुपमः कृपया परीतः[3] ।
त्यक्तक्रियः[4] कथमसौ न न स्तपस्वी
स्वाध्यायतो[5] न हि तपो ऽस्त्यधिकं न कृत्यम्[6] ॥ ३९

221) सज्ज्ञानिनो[1] मूर्खमतीव साधुर्यः कष्टचेष्टानिरतं स्तुवीत[2] ।
मार्गज्ञमन्धं स वदेत् सुदृष्टे[3]स्तेजस्तमो व्याहरते[4] समं सः ॥ ४०

222) एनांसि[1] यो ऽङ्घ्रिरजसा[2] विनि.न्ति[3] वाचा
मोहं व्यपोहति[4] दृशापि[5] पुनः पुनाति ।
सङ्गेन[6] दुःखमपनीय[7] तनोति[8] सौख्यं
ज्ञानी सतां स महितो[9] ऽत्र[10] महानुभावः ॥ ४१

223) ज्ञाने सति भवत्येव दर्शनं सहभावतः ।
तेनो[1]भय[2]मिदं पूज्यं विभागे[3] तु विशेषतः ॥ ४२

जो अनुपम मनुष्य जैनमत की प्रभावना किया करता है तथा दयासे युक्त होकर प्राणिसमूह को प्रबोधित करता है वह मनुष्य क्रिया से हीन होकर तपस्वी कैसे नहीं है ? वह तपस्वी है ही । ठीक है — स्वाध्याय से अन्य कोई तप और उससे अधिक कोई दूसरा कृत्य नहीं है ॥ ३९ ॥

जो साधु उत्तम ज्ञानियों को छोडकर कष्टक्रिया करने में — कायक्लेश में तत्पर ऐसे मूर्ख साधु की स्तुति करता है वह मानो मार्ग जानने वाले को अन्धा तथा उत्तम ांखोंवालेक तेजको अन्धकार कहता है, ऐसा समझना चाहिये ॥ ४० ॥

जो अपनी चरणरज से पापको नष्ट करता है, वाणी से मोह को दूर करता है, आँख से लोगों को पवित्र करता है तथा संगति से उनके दुःख को नष्ट कर के सुख को विस्तृत करता है वह ज्ञानी महानुभाव सज्जनों से पूजित होता है ॥ ४१ ॥

ज्ञान के होनेपर दर्शन होता ही है, क्योंकि वे दोनों साथही होते हैं । इसलिये सम्य-ग्दर्शन और सम्यग्ज्ञान दोनों भी पूज्य हैं । उस ज्ञान और दर्शन को पृथक् मानकर विशिष्ट श्रुत ज्ञानावरण के क्षयोपशम से वे विशेष रूप से पूज्य हैं ॥ ४२ ॥

३९) 1 प्रकाशयति. 2 जीवसमूहम्. 3 संयुक्तः 4 त्यक्तव्यापारः. 5 आत्मचिन्तनतः, आगमचिन्त-नतः. 6 करणीयम् । ४०) 1 सुज्ञानिनो मध्ये यो मूर्खं वन्दते. 2 स्तौति. 3 शोभननेत्र पक्षे सम्यग्दर्शनम्. 4 कथयति । ४१) 1 पापानि. 2 पादधूल्या. 3 विनाशयति. 4 स्फेटयति. 5 दृष्टया. 6 कृत्वा. 7 दूरीकृत्य. 8 विस्तारयति. 9 स पूजितः. 10 लोके । ४२) 1 तेन कारणेन. 2 ज्ञान-दर्शनम्. 3 भेदे कृते सति विशेषतः पूज्यम् ।

224) उक्तं च गुणभद्रैः—

यः श्रुत्वा द्वादशाङ्गीं कृतरुचिरथ[1] तं[2] विद्धि[3] विस्तारदृष्टिं
संजातार्थात् कुतश्चित्प्रवचनवचनान्यन्तरेणा[4]र्थदृष्टिः ।
दृष्टिः साङ्गाङ्गबाह्यप्रवचनमवगाह्योत्थिता यावगाढा
कैवल्यालोकितार्थे रुचिरिह परमावादि[5] गाढेति रूढा ॥ ४२*१

225) शुश्रूषा धर्मरागो जिनगुरुपदयोः पूजनाद्युद्यमश्च
संवेगो[1] निर्विदुच्चैरसमशम[2]रुपास्तिक्यलिङ्गानि येषाम्[3] ।
शङ्काकाङ्क्षाद्यभावो जिनवचनरते धार्मिके बन्धुबुद्धिः
श्रद्धानं सप्ततत्त्व्या[4]मिति गुणनिधयः सद्दृशस्ते[5] ऽपि पूज्याः ॥ ४३

226) दर्शनं प्रथमकारणमुक्तं मुक्तिसौधगमने[1] मुनिमुख्यैः[2] ।
ज्ञानमत्र[3] सति तावदवश्यं संभवेदपि[4] न वा चरणं तु ॥ ४४

गुणभद्राचार्य कहते हैं---

जो द्वादशांग को सुनकर तत्त्वश्रद्धान होता है उसे विस्तार सम्यग्दृष्टि कहते हैं। आगम वचनों के विना सुनें ही किसी अर्थ के ग्रहणमात्र से जो तत्त्वश्रद्धा उत्पन्न होती है वह अर्थ सम्यग्दर्शन है। आचागंगादिक बारह अङ्ग और अङ्गबाह्य श्रुत के अवगाहन से जो सम्यग्दर्शन उत्पन्न होता है उसे अवगाढ सम्यग्दर्शन कहते हैं। केवलज्ञान से संपूर्ण पदार्थों के देखने पर जो उत्कृष्ट श्रद्धा होती है उसे परमावगाढ सम्यग्दर्शन समझना चाहिये ॥ ४२*१ ॥

आगम के सुनने की इच्छा, धर्म में अनुराग, जिनेश्वर और निर्ग्रन्थ गुरुचरणों की पूजा आदि में उद्युक्तता, संवेग – संसारसे भीति, अतिशय निर्वेद – भव व भोगों से विरक्ति, अनुपम शमता – राग-द्वेष का अतिशय अभाव – और आस्तिक्य – दृढतर यथार्थ तत्त्वश्रद्धा; ये सम्यग्दर्शन के चिन्ह जिन के विद्यमान हैं, जो शंका व कांक्षा आदि दोषोंसे रहित हो कर जिन-वचन के प्रेमी ऐसे धार्मिक जन में बन्धुबुद्धि रखते हैं तथा जिनकी जीवादिक सप्त तत्त्वोंमें दृढ श्रद्धा होती है; ऐसे गुणों के निधि स्वरूप वे सम्यग्दृष्टि भी पूज्य हैं ॥ ४३ ॥

श्रेष्ठ मुनियों ने मोक्षरूप महल के प्राप्त करने में सम्यग्दर्शन को प्रमुख कारण कहा है। सम्यग्दर्शन के होनें पर सम्यग्ज्ञान अवश्य उत्पन्न हो जाता है, परन्तु उस के होनेपर सम्यक् चारित्र उत्पन्न हो भी सकता है और नहीं भी उत्पन्न होता है ॥ ४४ ॥

यह सम्यग्दर्शन इतर संपूर्ण गुणों की प्राप्ति का कारण, समस्त सुखोंकी निधि, बाधा-

---

४२*१) 1 कृतरुचिः भवति. 2 पुरुषम्. 3 जानीहि. 4 विना. 5 व्याख्याताः कथयन्ति । ४३) 1 निर्वेगः. 2 उपशमयुक्तमुनिगणेषु. 3 सम्यग्दृष्टीनाम्. 4 सप्तानां भावः (समाहारः) सप्ततत्त्वी, तस्यां सप्ततत्त्व्यां विषये. 5 सम्यग्दृष्टयः । ४४) 1 कारणाय. 2 गणधरदेवैः जिनैः वा. 3 दर्शने. 4 भवति ।

227) इदमशेषगुणान्तरसाधनं सकलसौख्यनिधानमबाधनम्[1] ।
कुगतिसंगतिदूरनिवारणं निखिलदारुणदूषणदारणम्[2] ॥ ४५

228) अपगतो[1] ऽपि मुनेश्चरणाद् दृशि स्थिरतरः[2] सुतरां परिपूज्यते[3] ।
शुभमते[4]र्महतां बहुमानतः परिणतिश्चरणे ऽपि भवेदिति ॥ ४६

229) साधुचारित्रहीनो ऽपि समानो नान्यसाधुभिः[1] ।
भग्नो ऽपि शातकुम्भस्य कुम्भो मृत्स्ना[2]घटैरिव ॥ ४७

230) यद्यद् दुःखमा[1]स्वाम्यादनुष्ठानं न दृश्यते ।
केषांचिद् भावचारित्रं तथापि न विहन्यते ॥ ४८

231) सातिचारचरित्राश्च काले ऽत्र[1] किल साधवः ।
कथितास्तीर्थनाथेन[2] तत्[3]तथ्यं[4] कथमन्यथा ॥ ४९

232) कालादिदोषात् केषांचिद्व्यलीकानि[1] विलोक्य ये ।
सर्वत्र कुर्वते ऽनास्थां[2]मात्मानं वञ्चयन्ति ते ॥ ५०

रहित तथा आत्मा को कुगति के – नरक – पशु आदि दुर्गति के – संग से बचाकर समस्त भयंकर दोषोंको नष्ट करनेवाला है ॥ ४५ ॥

कोई मुनि चारित्रसे भ्रष्ट हुआ है, परन्तु यदि वह सम्यग्दर्शन में अतिशय स्थिर है तो वह स्वयं ही पूजा जाता है। कारण यह कि उस निर्मलबुद्धि मुनि की महामुनियोंका अतिशय विनय करने से अथवा महापुरुषों ने बहुमान करनेसे चारित्र में भी आगे प्रवृत्ति हो सकती है ॥ ४६ ॥

जिस तरह सोने का घडा फूटने के बाद भी मिट्टी के अनेक (अच्छे) घडों के समान नहीं होता, उसी प्रकार जैन मुनि चारित्र से हीन होने पर भी अन्य अजैन साधुओं के समान कदापि नहीं होता है। वह उनकी अपेक्षा श्रेष्ठ ही होता है ॥ ४७॥

यदि आज दुखमा नामक पंचमकाल के प्रभावसे संयम का आचरण नहीं देखा जाता है तो भी किन्हीं साधुओं के भाव चारित्र नष्ट नहीं होता है। चारित्र के परिपालनका अभिप्राय तो रहता ही है ॥ ४८ ॥

इस पंचमकाल में साधुओं का चारित्र सदोष रहेगा, ऐसा जो तीर्थंकरने कहा है वह अन्यथा कैसे हो सकता है ॥ ४९ ॥

काल आदि के दोष से कुछ साधुओं में दोषों को देख कर जो भव्य सभी जैन साधुओं में अश्रद्धा करते हैं वे अपने आपको ही धोखा देते हैं, ऐसा समझना चाहिये ॥५० ॥

---

४५) 1 दर्शनम्. 2 विदारकम् । ४६) 1 रहितः. 2 कथंभूतः मुनिः, दृशि स्थिरतरः. 3 द्रव्यलिङ्गी. 4 मुनेः । ४७) 1 परदर्शनयतिभिः. 2 मृत्तिका । ४८) 1 पञ्चमकालविशेषात् । ४९) 1 पञ्चमकाले, 2 आदिदेवेन. 3 वचनम्. 4 सत्यम् । ५०) 1 असत्यानि. 2 अनादरं निन्दां वा ।

233) वहन्ति चेतसा[1] द्वेषं वाचा गृह्णन्ति दूषणम् ।
अनम्रकायाः[2] साधूनामधमा दर्शनद्विषः[3] ॥५१

234) इहैवानिष्टाः शिष्टानां मृता यास्यन्ति दुर्गतिम् ।
द्राघयिष्यन्ति[1] संसारमनन्तं क्लिष्टमानसाः ॥ ५२

235) इदं विचिन्त्यातिविविक्तचेतसा यमेव किंचिद्गुणमल्पमञ्जसा[1] ।
विलोक्य साधुं बहुमानतः सुधीः प्रपूजयेत्पूर्णमिवाखिलैर्गुणैः ॥ ५३

236) तथा लभेताविकलं[1] फलं जनो निजाद्विशुद्धात्परिणामतः स्फुटम् ।
अभीष्टमेतत् प्रतिमादिपूजने फलं समारोपसमर्पितं[2] सताम् ॥ ५४

237) काष्ठोपलादीन् [illegible] ये पूजयन्त्यत्र विशिष्टभावाः ।
ते प्राप्नुवन्त्येव शुभानि नूनं प्रत्यक्षसाधोः किमु पूजनेन ॥ ५५

जो मन से साधुओं में द्वेष करते हैं, वचन से उनके दोषोंका प्रतिपादन करते हैं और जो साधुओं को देखकर शरीरके द्वारा विनय को प्रकट नहीं करते हैं – उनकी वन्दना आदि नहीं करते हैं – वे नीच सम्यग्दर्शनके द्वेषी हैं ॥ ५१ ॥

जो सम्यग्दृष्टिओं को अनिष्ट (मिथ्यादृष्टि) मानते हैं, वे मन में क्लेशका अनुभव करते हुए मरणोत्तर दुर्गति में – नरक-तिर्यंच गति में – जाते हैं और अपने संसार में अनन्त कालतक बढाते हैं ॥ ५२ ॥

यह सोचकर बुद्धिमान् मनुष्य जिस साधु को कुछ थोडे से गुणोंसे संयुक्त व अल्प (हीन) देखता है उसे वास्तव में वह समस्त गुणों में परिपूर्ण जैसा मानकर उसकी निर्मल अन्तःकरण से बहुत विनय के साथ पूजा करें ॥ ५३ ॥

ऐसा करने से भव्य जन अपने विशुद्ध परिणामों से निश्चयतः पूर्ण फल को प्राप्त करता है । तथा स्थापना निक्षेप के आश्रय से प्रतिमादिक पूजन में जो फल प्राप्त होता है वह सत्पुरुषों को अभीष्ट है ॥ ५४ ॥

जो विशिष्ट परिणामोंसे संयुक्त भव्य जीव यहाँ देवबुद्धि से –यथार्थ देव मानकर– लकडी एवं पाषाण आदिसे निर्मित मूर्तियों की – पूजा किया करते हैं वे निश्चयसे शुभ फलों को प्राप्त करते हैं । फिर भला प्रत्यक्ष में स्थित साधु की पूजा करने से क्या वह फल नहीं प्राप्त होगा ॥ ५५ ॥

---

५१) 1 मानसेन. 2 अविनीताः. 3 शत्रवः । ५२) 1 दीर्घतरम् । ५३) 1 सामस्त्येन । ५४) 1 परिपूर्णम्. 2 समारोपणेन ।

238) कालोचितं[1] साधुजनं त्यजन्तो[2] मार्गन्ति[3] ये ऽन्यं कुधियः सुसाधुम् ।
ते दातृ[illegible]हीना यास्यन्ति दुर्योनिषु दुर्दुरूढाः[4] ॥ ५६

239) ग्रासादिमात्रदाने ऽपि पात्रापात्रपरीक्षणम् ।
क्षुद्राः कुर्वन्ति ये केचित् न तत् स्या[illegible]लक्षणम् ॥ ५७

240) गेहे समागते साधौ[1] भेषजा[illegible]या ।
अवज्ञा क्रियते यत्तत् पातकं किमतः परम् ॥ ५८

241) अन्यत्रापि[1] सधर्मचारिणि जने मान्ये[2] विशेषा[illegible]नौ
दृष्टे साधुनिधौ निधावनिधने[3] बन्धाविवातिप्रिये ।
यस्योल[illegible]हाससुभगे स्यातां[4] न नेत्रानने[5]
दूरे तस्य जिनो वचो ऽपि हृदये जैनं[6] न संतिष्ठते ॥५९

242) विलोक्य साधुलोकं यो विकासितविलोचनः ।
अमन्दानन्दसंदोहः स्यात् स देही[1] सुदर्शनः ॥ ६०

जो दुर्बुद्धि मानव कालोचित – समयपर प्राप्त हुए – साधुओं को छोडकर अन्य उत्तम साधुओं को ढूंढते हैं वे दुर्जन उन्हें दान न देनेके कारण दाता और पात्र दोनों से रहित हो कर दुःखदायक योनियों में परिभ्रमण करेंगे ॥ ५६ ॥

जो कितने ही क्षुद्र मनुष्य आहारादि मात्र के देने में भी पात्र – अपात्र की परीक्षा करते हैं, उनमें सज्जनों का लक्षण नहीं है ॥ ५७ ॥

औषध आदिकी इच्छा से साधु घर आने पर जो उनकी अवज्ञा की जाती है उससे अधिक पाप और अन्य क्या हो सकता है ? उसे महापाप ही समझना चाहिये ॥ ५८ ॥

सन्मान के योग्य अन्य भी – गृहस्थ भी – सार्धमिक जनके, विशेषकर साधुओं में श्रेष्ठ मुनि के दृष्टिगोचर होनेपर अविनश्वर निधि अथवा अतिशय स्नेही बंधु के दृष्टिगोचर होने के समान जिस सत्पुरुष के नेत्र और मुख आनन्द, प्रफुल्लता एवं हास्य से सुन्दर नहीं होते हैं उसके हृदय में जिन भगवान् तो दूर रहें, किन्तु उनके वचन भी – उनका सदुपदेश भी – स्थित नहीं रह सकता है ॥ ५९ ॥

साधु जन को देखकर जिस के नेत्र आनन्द से प्रफुल्लित हो उठते हैं, तथा जिसके हृदय में अतिशय आनंद का प्रवाह उत्पन्न होता है उस मनुष्य को सम्यग्दृष्टि समझना चाहिये ॥ ६० ॥

---

५६) 1 यथावसरम्. 2 त्यजन्तः सन्तः 3 वाञ्छन्ति. 4 दुष्टाः । ५८) 1 विषये । ५९) 1 कुत्रापि 2 पूज्य. 3 P °[illegible]. 4 द्वे भवेताम्. 5 नेत्रमुखे. 6 जैनं वचोऽपि । ६०) 1 जीवः ।

243) इदं दर्शनसर्वस्वमिदं[1] दर्शनजीवितम् ।
प्रधानं दर्शनस्येदं यद्वात्सल्यं सधर्मणि ॥ ६१

244) येषां[1] तीर्थकरेषु भक्तिरतुला पापे जुगुप्सा[2] परा
दाक्षिण्यं समुदारता समम‍तिः[3] सत्त्वोपकारे रतिः ।
ते सद्धर्ममहाभरैकधवलाः पोता भवाम्भोनिधौ
भव्यानां पततां पवित्रितधराः पात्रं परं सद्दृशः[4] ॥ ६२

245) चारित्रिणस्[1]तृणमणीन् गणयन्ति तुल्यान्
पश्यन्ति मित्रमिव शत्रुमरागरोषाः ।
किं भूयसा[2] निजवपुष्यपि निर्ममत्वा
ये ते परं त्रिभुवनार्चितमत्र[3] पात्रम् ॥ ६३

246) ये नित्यं प्राणिरक्षाप्रणिहितमतयो[1] ऽसत्यसंत्यागयुक्ता-
स्त्यक्तस्तेया मृगाक्षीमुखकमलविमुखा मुक्तमुक्तादि[2]मूर्च्छाः ।
मूर्ता धर्मा इवैते जितमदमदना मन्दिरं मन्दरागाः
पादीयैः पांशुपातै[3]रिह यतिपतयः पुण्यभाजां पुनन्ति[4] ॥ ६४

साधर्मिक जन के प्रति जो अनुराग प्रकट किया जाता है, इसे सम्यग्दर्शन का सर्वस्व तथा उक्त सम्यग्दर्शन का प्राण और प्रधान समझना चाहिये ॥ ६१ ॥

जिन महापुरुषों के, तीर्थंकरों के विषय में अनुपम भक्ति, पापाचरण में अतिशय ग्लानि सरलता, उदारता, समबुद्धि – राग-द्वेष का अभाव – और प्राणियों के उपकार में अनुराग हुआ करता है, वे असाधारण बैल के समान समीचीन धर्म के महाभार के धारण करने में समर्थ और संसाररूप समुद्र में गिरते हुए भव्य जीवों के लिये जहाज के समान हुआ करते हैं। पृथिवी को पवित्र करनेवाले वे सम्यग्दृष्टि मनुष्य उत्कृष्ट पात्र के समान होते हैं ॥६२ ॥

चारित्र के धारक जो मुनिराज तृण और रत्नों में समान बुद्धि रखते हैं, जो राग-द्वेष से रहित होते हुए शत्रु और मित्र को समान समझते हैं; और अधिक कहने से क्या, किन्तु जो अपने शरीर पर भी ममत्व नहीं रखते हैं, वे त्रैलोक्य से पूजित उत्कृष्ट पात्र हैं ऐसा समझना चाहिये ॥ ६३ ॥

जो सदा प्राणियों की रक्षा में सावधानतापूर्वक अपनी बुद्धि को लगाते हैं, जिन्हों ने

---

६१) 1 जैनमतस्य सम्यग्दर्शनस्य वत् । ६२) 1 मुनीनां श्रावकानां वा. 2 निन्दा. 3 उपशमे मतिः. 4 सम्यग्दृष्टयः.। ६३) 1 मुनयः चारित्रयुक्ताः. 2 किं बहुना. 3 लोके । ६४) 1 सावधानयुक्ता मतयः. 2 मुक्ताफलादि. 3 पादधूलिभिः. 4 पात्रं [पवित्रं] कुर्वन्ति ।

247) बन्धून् बन्धनिबन्धनं[1] सनिधनं[2] बाध्यं[3] धनं धीधना-
श्चित्रं पुत्रकलत्रमित्रनिवहं[4] निर्यन्त्रणा[5]कारणम् ।
ये[6] संचिन्त्य विचारचारुमतयो निर्मुक्तये[7] तस्थिरे[8]
ते चिन्तामणिवद्भवन्ति भविनां पुण्यात्मनां मन्दिरे ॥ ६५

248) ये स्त्रैणं[1] न तृणाय रूपरुचिरं लोष्टाय नाष्टापदं[2]
रम्यं धाम[3] सुधाविधानधवलं प्रालेयशैलोपमम्[4] ।
मन्यन्ते न कुटीरकाय मुनयो धन्यस्य[5] धामाजिरे[6]
ते तिष्ठन्ति महौषधानि यदि वा[7] स्युः पुण्यभाजः[8] करे ॥ ६६

249) तथ्यं[1] पथ्यं[2]मगर्वितं सुनिपुणं[3] माधुर्यवर्यं[4] वचः
कार्येण प्रविचार्य जल्पति धिया यो ऽल्पं विकल्पक्षमम् ।
धन्यैर्मन्दिराजिरे[5] मुनिगणश्चैवंविधो ऽवाप्यते[6]
सत्कल्पद्रुमपादपः परिसरे[7] पुण्यात्मभिर्लभ्यते ॥ ६७

असत्य का त्याग कर दिया है, जो चोरी से दूर व स्त्री के मुखावलोकन जनित सुख से विमुख हैं, जिनका मोती आदि से ममत्व नष्ट हो चुका है, जो मानो मूर्तिमान धर्म के ही समान हैं, जिन्हों ने गर्व और काम को जीत लिया है, तथा जिनका राग-भाव मन्द हुआ है; ऐसे वे मुनिराज अपने चरणरज से पुण्यवानों के घर को पवित्र किया करते हैं ॥ ६४ ॥

जो निर्मल बुद्धिरूप धन के धारक सज्जन बन्धुओं को कर्मबन्ध के कारण, धन को नश्वर और पीडा का कारण, तथा पुत्र, पत्नी एवं मित्रों के समुदाय को अनेक दुःखों का कारण समझ कर विवेक से सुन्दर बुद्धि को धारण करते हैं वे मुक्ति प्राप्ति के लिये स्थिर रत्नत्रय में उद्यत होते हुए पुण्यवान भव्य जनों के भवन में चिन्तामणि के समान सुशोभित होते हैं ॥ ६५ ॥

जो सुन्दर युवतिसमूह को घास के समान व सुवर्ण को मिट्टी के ढेले के समान भी नहीं मानते हैं, जो चूनाके पोतने से शुभ्र ऐसे हिमालय पर्वत के समान उन्नत सुंदर प्रासाद को घास की झोंपडी के समान भी नहीं समझते है, ऐसे वे मुनिराज पुण्यवान् पुरुष के गृह के मध्य में आकर रहते हैं अथवा मानो वे पुण्यवान् भव्य के हाथ में महान् औषधि के समान प्राप्त होते हैं ॥६६॥

जो मुनिसमूह कार्यवश बुद्धिसे अतिशय विचार करके सत्य हितकर, गर्व से रहित व

---

६५) 1 बन्धनकारणम्. 2 सविनाशम्. 3 बाधाकारकम्. 4 समूहम्. 5 पीडानाम्. 6 मुनयः 7 मुक्तिकारणाय. 8 स्थितवन्तः । ६६) 1 स्त्रीणां रूपं स्त्रैणम्. 2 सुवर्णम्. 3 गृहम्. 4 हिमालयसदृशम्. 5 पुण्यपुरुषस्य. 6 गृहप्राङ्गणे. 7 इव. 8 पुण्यपुरुषस्य । ६७) 1 सत्यम्. 2 हितम्. 3 प्रवीणम्. 4 मिष्टतया प्रधानम्. 5 गृहप्राङ्गणे 6 लभ्यते. 7 गृहनिकट ।

250) युक्तायुक्तविचारचञ्चुरधियः[1] पञ्चास्तिकायादिषु[2]
मिश्राचित्तसचित्तवस्तुविषयां कुर्युः[3] परिस्थापनाम्[4] ।
प्राणित्राणपरायणाः[5] सुकृतिनामायान्ति[6] ते[7] मन्दिरे
कामं[8] कामदुघा विशन्ति सदने गावो हि पुण्यात्मनाम् ॥ ६८

251) यो[1] मञ्जीरकमञ्जुसिञ्जितरवैः[2][3] श्रीराजहंसस्वनं
न्यक्कुर्वाणमलं[4] विलोक्य ललनालोकं लसन्मेखलम् ।
पन्थानं मथितोरुमन्मथशरः पश्यन् शनैर्गच्छति[5]
धन्यस्यैष[6] गृहाङ्गणं मुनिगणः पादैः समाक्रामति ॥६९

252) त्रिभुवनमिदं व्याप्तं चित्रैश्चराचरजन्तुभिः[1][2]
स्वभरणपरैः[3] पीडां कर्तुं परस्य सदोद्यतैः[4] ।
कथमपि तनुत्यागे ऽप्यन्यं हिनस्ति न[5] यः सदा
कथमिव मुनिर्मान्यो न स्यात्स देव इवापरः[6] ॥ ७०

चातुर्य से परिपूर्ण ऐसे उत्तम एवं मधुर वचन को परिमित मात्रा में बोलता है, जो वस्तु के निर्णय करने में समर्थ होता है, ऐसे मुनिसमूह को भाग्यवान पुरुष ही अपने गृहके आँगनमें प्राप्त किया करते हैं । सो ठीक भी है, अपने घरके आँगन में उत्तम कल्पवृक्ष पुण्यात्माओं को ही प्राप्त होता है ॥ ६७ ॥

जिनकी बुद्धि जीव, पुद्‌गल, धर्म अधर्म और आकाश इन पाँच अस्तिकाय द्रव्यों के संबंध में योग्य व अयोग्य का विचार करने में दक्ष है; जो मिश्र–सचित्त-अचित्त, अचित्त और सचित्त वस्तुओं के विषय में परिस्थापना – परित्याग अथवा विचार –करते हैं; तथा जो प्राणिरक्षण में सदा तत्पर रहते हैं; ऐसे वे उत्तम पात्र पुण्यशाली जन के घर पर आया करते हैं । ठीक है – अतिशय अभीष्ट को प्रदान करनेवाली कामधेनु गायें पुण्यात्मा पुरुषों के घर में ही प्रविष्ट हुआ करती हैं ॥ ६८ ॥

जो मुनिसमूह नूपुरों की मनोहर अव्यक्त ध्वनि से राजहंस की आवाज को अतिशय तिरस्कृत करनेवाले और कटिभाग को विभूषित करनेवाली करधनी से सुशोभित ऐसे रमणी-जन को देखकर काम के प्रबल बाणों को नष्ट करता है – उसके वशीभूत नहीं होता है– तथा मार्ग को देखकर मन्दगति से – ईर्यासमिति से – गमन करता है ऐसा वह साधुसमूह अपने पाँवोंसे चलकर भाग्यशाली पुरुष के गृह के आँगन मे पहुँचता है ॥ ६९ ॥

अपना पेट भरने के लिये अन्य को सदा पीडा देने में उद्युक्त हुये अनेक प्रकार के त्रस-

---

६८) 1 मुनयः. 2 द्रव्यपदार्थादिषु . 3 कुर्वन्ति. 4 त्यागम्. 5 रक्षा. 6 पुण्यवताम्. 7 मुनयः. 8 अत्यर्थम्. ६९) 1 मुनिगणः. 2 नूपुरमनोज्ञम्. 3 नूपुरशब्दः. स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम्, अभिधानम्. 4 निर्धाटितं वा जितम्. 5 यो मुनिगणः पश्यन् सन् मन्दं मन्दं गच्छति. 6 मुनिगणः ७०) 1 नानाप्रकारैः. 2 त्रसस्थावररूपम्. 3 परमांसैरात्मोदरपूरकैः. 4 उद्यमपरायणैर्जीवैः. 5 न मारयति. 6 प्रकृष्टः ।

253) लोभक्रोधाद्यैः प्राणनाशे ऽप्यसत्यं
ये नो भाषन्ते ऽशेषभाषाविधिज्ञाः[1] ।
लोकातिक्रान्तैः क्रान्त[illegible]न्तारुसत्त्वाः
सत्त्वां[2]स्ते वाचा ऽप्येनसो[3] दूरयन्ति ॥ ७१

254) निपतितमपि किंचित् का[illegible]न्यदीयं[1]
विषविषधरकल्पं कल्पयन्[illegible][2]नल्पम् ।
विजितविषमलोभा ये जगज्जात[3]शोभा
गृहमतिशुभभाजां[4] ते भजन्ते[5] यतीन्द्राः ॥ ७२

255) रामाणां नयने[1] पयोजजयिनी[2] लोले[3] पयोबुद्बुदौ[4]
स[illegible]न्तौ कलशोपमौ घनकुचौ पीनौ च मांसा[illegible]दौ[5] ।
वक्त्रं पूर्णशशाङ्ककान्ति [illegible]लये[6]च्चर्मोपनद्धास्थिकं
यः सद्भावनया सतां स भवनं पुण्यात् पुनीते[7] मुनिः ॥ ७३

स्थावर जन्तुओं से यह त्रैलोक्य व्याप्त हो रहा है । परन्तु जो शरीर के त्याग करने का प्रसंग आनेपर भी किसी प्रकार से भी अन्य प्राणी का घात नहीं किया करता है ऐसा अहिंसा महाव्रत का धारक मुनि, भला दूसरे देव के समान, कैसे मान्य – आराधनीय नहीं होता है ?॥७०॥

समस्त भाषाओं के विधान को जाननेवाले जो मुनि प्राणोंके नष्ट होनेपर कभी क्रोध व लोभ आदिके वशीभूत हो कर असत्य नहीं बोलते हैं तथा लोक का उल्लंघन करनेवाले अपने लौकिक गुणों से जो उच्च मान्य पुरुषों को उल्लंघनेवाले हैं, ऐसे वे सत्य महाव्रत के धारक मुनि अपनी वाणीसे भी प्राणियों को पाप से दूर किया करते हैं ॥ ७१ ॥

जो मुनिजन मार्ग आदि में गिरे हुए दूसरे के सुवर्ण आदि किसीपदार्थ को थोडीसी भी मात्रा में ग्रहण न कर के उसे विष अथवा सर्प के समान घातक समझते हैं और इसीलिये भयानक लोभ के जीत लेने से जो लोक में शोभाको प्राप्त हुए हैं ऐसे वे अचौर्य महाव्रत के धारक मुनिराज अतिशय भाग्यशाली महापुरुषों के घर को जाते हैं ॥ ७२॥

जो साधु कमल को जीतनेवाले स्त्रियों के चंचल नेत्रोंको अस्थिर जल बुद्बुदों के समान, घट के समान मनोहर, सघन व स्थूल स्तनों को मांसकी कीलों के सदृश और पूर्ण चन्द्रमा के समान कान्तिवाले मुखको चमडे से ढकी हुई हड्डियों से व्याप्त देखता है, वह ब्रह्मचर्य महाव्रत का धारक साधु सद्भावना से सत्पुरुषों के घरको उनके पुण्योदय से ही पवित्र किया करता है ॥ ७३ ॥

---

७१) ज्ञातारः. 2 जीवान्. 3 पापानि । ७२) 1 परकीयम्. 2 विचारयन्ति. 3 प्राप्त. 4 अतिपुण्यवताम्. 5 आप्नुवन्ति । ७३) 1 द्वे नयने. 2 कमलजयिनी. 3 चञ्चले नेत्रे द्वे. 4 जलबुद्बुदौ गणयति 5 मांसपिण्डौ रूपौ वा सदृशौ पश्यति. 6 यः मन्येत. 7 पवित्रीकरोति ।

256) हरिहरप्रमुखं सुरासुरं जितवतः[1] स्वशरैर्[2] भुवनत्रयम् ।
विजयिनं मदनस्य[3] मदच्छिदं[4] नमति कः सुमतिर्न मुनीश्वरम् ॥ ७४

257) न वीतरागादपरो ऽस्ति देवो न ब्रह्मचर्यादपरं तपो ऽस्ति ।
नाभयदानात्[1] परमस्ति दानं चरित्रिणो नापरमस्ति पूतम्[2] ॥ ७५

258) विश्वं येन[1] वशीकृतं कृतधियो ऽकृत्ये[2] कृताः सोद्यमा
भाण्डाद्या विकृताश्च नटभटाश्चित्राकृती[3] कारिताः ।
तं निर्जित्य परिग्रहग्रहमहो ये ऽध्यात्मचिन्ता ता
धन्यस्यैव[4] तपोधना गुणधना धामानि ते ऽध्यासते[5] ॥ ७६

259) निर्मग्नलोकं गुरुलोभसागरं तरन्ति संतोषतरण्डकेन ।
न पादपद्मैरिह सद्म[1] निःस्पृहाः स्पृशन्ति ते पातकिनां तपोधनाः ॥ ७७

जिसने विष्णु और महादेव को आदि ले कर देव व दानवों सहित तीनों ही लोकों को अपने पुष्पमय बाणों के द्वारा जीत लिया ऐसे उस जगद्विजयी कामदेवके भी मान को मर्दित करने वाले काम विजेता मुनिराज को कौनसा निर्मल बुद्धिधारक मनुष्य नमस्कार नहीं करता है ? अर्थात् उस की सब ही विवेकी जन आराधना किया करते हैं ॥ ७४ ॥

लोक में वीतरागको छोडकर दूसरा कोई देव, ब्रह्मचर्य को छोडकर दूसरा कोई तप, अभयदान को छोडकर दूसरा कोई दान और चारित्र के परिपालक मुनिराज को छोडकर दूसरा कोई पवित्र प्राणी नहीं है ॥ ७५ ॥

जिस परिग्रह रूप ग्रहने विश्वको अपने अधीन कर लिया, बुद्धिमानों को प्रयत्नपूर्वक अकृत्य में नियुक्त किया, भांड (बहुरूपिया) आदिकों को विकारयुक्त किया और श्रेष्ठ नटों (अथवा नट एवं सुभटों) को अनेक आकृति के धारक बना दिया, ऐसे उस परिग्रहरूप पिशाच को जीतकर जो आत्मध्यान में लीन हुए हैं ऐसे वे समीचीन गुणरूप धन के धारक तपोधन परिग्रह महाव्रती मुनिराज किसी पुण्यवान के ही घर में प्रवेश करते हैं । सामान्य जनों के लिये वे दुर्लभ हैं ॥ ७६ ॥

जिस लोभ रूप महासमुद्र में समस्त लोक ही निमग्न हो रहा है उस अपार लोभरूप समुद्र को जो संतोष रूप नौका के द्वारा पार कर चुके हैं, ऐसे वे निःस्पृह तपोधन मुनिराज पापियों के घर को अपने चरण कमलों से स्पर्श नहीं करते हैं ॥ ७७ ॥

---

७४) 1 जेता. 2 स्वबाणैः. 3 कामस्य. 4 मदविनाशकम् । ७५) 1 न अभयदानात्. 2 पवित्रम् ।
७६) 1 परिग्रहग्रहेण. 2 अकार्ये. 3 नानाप्रकाराः. 4 पुण्यवतः मन्दिरे. 5 आश्रयन्ति तिष्ठन्ति ।७७) 1 गृहम् ।

260) एवंविधानि पात्राणि पवित्रितजगन्त्यहो।
किय‍न्ति सन्ति लोकेऽत्र[1] कियन्तः कल्पपादपाः॥ ७८

261) प्रायोऽस्ति नैकगुणमत्र[1]ममत्रमत्र[2]
द्वित्रैर्गुणैरनुगतं[3] सुतरां दुरापम्[4]।
मत्वेति पात्रमुपलभ्य[5] विचक्षणानां
नोपेक्षणं क्षणमपि क्षमते क्षमाणाम्॥ ७९

262) यतिपतिभिरसंगैः[1] संगतिः पुण्यलभ्या
परिणतिरपि दाने दुर्लभा मन्दभाग्यैः[2]।
उचितमुचितमुच्चैर्वस्तु[3] देयं[4] दुरापं
त्रितयमिदं[5] दातुः[6] को ऽप्यवाप्नोति पुण्यैः[7]॥ ८०

263) प्राप्ते ऽपि पात्रे सुलभं न वित्तं
वित्ते ऽपि पुण्यैः पुनरेति चित्तम्।
दाने त्रयं को ऽपि भवाब्धिसेतुं[1]
प्राप्नोति कल्याणकलापहेतुम्[2][3]॥ ८१

लोक को पवित्र करने वाले वे पात्र भला संसार में कितने हैं? अर्थात् ऐसे उत्तम पात्र लोक में क्वचित् ही उपलब्ध होते हैं। सो ठीक भी है, क्यों कि, यहाँ लोक में कल्पवृक्ष कितने हैं? ॥ ७८ ॥

लोक में प्रायः सम्यग्दर्शनादि गुणों में से केवल एक किसी गुण से युक्त भी पात्र नहीं उपलब्ध होता है, फिर भला दो – तीन गुणों से युक्त वह पात्र तो स्वयं अतिशय दुर्लभ होगा, ऐसा समझ कर जो चतुर एवं समर्थ दाता हैं वे उनको उपेक्षा एक क्षण के लिये भी सहन नहीं करते हैं ॥ ७९ ॥

निर्ग्रंथ – परिग्रह रहित – मुनियों की संगति पुण्य से प्राप्त होती है, मन्द भाग्यवाले के मन में दान देने का विचार आना भी दुर्लभ है, इसके साथ देने के योग्य उत्तम वस्तु (आहारादि) भी अतिशय दुर्लभ होती है। पात्र, दान देनेका विचार और उत्तम देय (आहारादि) वस्तु, इन तीनों को प्राप्ति पूर्व पुण्योदय से महान् पुरुषोंको ही होती है ॥ ८० ॥

पात्र के प्राप्त होने पर भी किसी किसी को धन के अभाव में उसके लिये देने योग्य

---

७८) 1 अस्मिन् संसारे. 2 दातारः। ७९) 1 [पात्रं =] ऋषि. 2 संसारे. 3 युक्तम्. 4 दुष्प्रापं. 5 प्राप्य। ८०) 1 बाह्याभ्यन्तरसंगरहितैः. 2 पुरुषैः. 3 योग्यं योग्यं. 4 अन्नादिकं भक्ष्यवस्तु. 5 यतेः संगतिर्दाने परिणतिः अन्नादिभक्ष्यवस्तु. 6 इदं त्रिकम्. 7 पुण्यैः कृत्वा प्राप्ते सति। ८१) 1 संसारसमुद्रे किं पात्रं वित्तं चित्तं इति त्रयं फलम्. 2 गर्भादि. 3 कारणम्।

264) दुरापमिदमुच्चकैस्त्रयम्[1]मवाप्य पुण्योदयात्
प्रमत्तसकलं जना न हि विलम्बितुं संगतम् ।
विलोक्य मुनिसंकुलं विमलधीर्निधानं परं[2]
विधानविदपि हितं बत[3] विलम्बते को ऽपि किम् ॥ ८२

265) त्यागो भोगो विनाशश्च विभवस्य त्रयी गतिः ।
द्वे[1] यस्याद्ये न विद्येते नाशस्तस्यावशिष्यते[2] ॥ ८३

266) दायादा[1] आददन्ते[2] दहति हुतवहो[3] वारनार्यो[4] हरन्ति
स्तेना मुष्णन्ति[5] भूपो ऽपहरति[6] रटतां[7] मारयित्वा कृकाटिम् ।
मूढानां याति बाढं धनमिति निधनं[8] धीधना[9] धीधनानां
साधूनामर्पयित्वा[10] ऽस्खलितमगलितं[11] पालितं भुञ्जते ऽग्रे ॥ ८४

आहारादि सामग्री सरलता से प्राप्त नहीं होती, फिर यदि इस योग्य धन भी हुआ तो दान देने का विचार भी मन में पुण्योदय से ही प्रादुर्भूत होता है । दान के निमित्त संसाररूप समुद्र से पार करने के लिये पुल के समान हो कर जो कल्याण परंपरा की कारणभूत उपर्युक्त तीनों की प्राप्ति होती है वह किसी विरले ही पुण्यात्मा को हुआ करती है ॥ ८१॥

हे भव्यजनो ! पूर्व पुण्योदय से उन अतिशय दुर्लभ तीनों के प्राप्त हो जाने पर फिर प्रमाद के वशीभूत हो कर विलंब करना योग्य नहीं है । क्या कोई ऐसा निर्मलबुद्धि मनुष्य है जो उत्कृष्ट निधिके समान हितकारक मुनि को देखकर विधि को जानता हुआ भी इसके लिये विलम्ब करता है ? ॥ ८२ ॥

दान, उपभोग और नाश ये धन की तीन अवस्थाएँ होती हैं । जिस सत्पुरुष के यहाँ उस धन की त्याग और भोग ये दो प्रथम अवस्थाएँ नहीं हैं, उस के उस धन की नाश रूप तीसरी अवस्था ही शेष रह जाती है ॥ ८३ ॥

मूर्खों के धन को उनकी मृत्यु के पश्चात् जो कुटुम्बीजन नियमानुसार उसके अधिकारी होते हैं वे ग्रहण कर लिया करते हैं, कभी कभी उसको अग्नि भस्मसात् कर देती है, यदि व्यसनी हुए तो वेश्याएँ उसे खा डालती हैं, अवसर मिलने पर चोर उसे चुरा लेते हैं, अथवा अपराधी प्रमाणित होनेसे उनके रोते चिल्लाते रहने पर भी गला दबा कर राजा उसका अपहरण करा लेता है; इस प्रकार उन मूर्खों का धन पात्रदान के बिना यों ही अतिशय नाश को प्राप्त हो जाता है । किन्तु उसके विपरीत बुद्धिमान सत्पुरुष उसे आहारादि के रूप में बुद्धिमान

८२) 1 वित्तं चित्तं पात्रम्. 2 प्रकृष्टम्. 3 अहो । ८३) 1 त्यागभोगौ. 2 त्रिषुमध्ये न(?)। ८४) 1 सापत्ना भ्रातरः. 2 गृह्णते. 3 अग्निः. 4 वेश्यादयः. 5 चौराश्चोरयन्ति. 6 राजा गृह्णाति. 7 क्रन्दनं कुर्वताम्. 8 विनाशम्. 9 दातारः. 10 समर्पयित्वा. 11 पूर्णम् ।

267) वियोगेनायोगो[1] भवति विभवैश्[2]चेद्विभविनां[3]
विना किंचित्कार्यं रचितपरितापः परवशः ।
वरं[4] धर्मायासौ[5] विमलयशसे तोषितपरः
प्रमोदाय स्वस्य[6] स्ववशविहितः साधितहितः ॥ ८५

268) अनन्तगुणमक्षयं भवति रक्षितं[1] साधुभिः
सुपात्रविनियोजितं ननु[2] परत्र धर्मार्थिनम् ।
प्रयाति निधनं[3] धनं सदनसंचितं निश्चितं
तथापि न धनप्रिया[4] ददति[5] मोहराजो[6] बली ॥ ८६

269) ददति[1] सति कदाचिन्मूलनाशे ऽपि लोभात्
इह[2] हि शतसहस्रं[3] लाभसंभावनायाम् ।
ध्रुवबहुगुणलाभे नो परत्रा[4]र्थनाथा[5]
जयति जनसमूहं मोहयन् मोहमल्लः ॥ ८७

साधुओंको दे कर विना गिरे पडे संरक्षित व अविनश्वर रूप से उसका उपभोग किया करते हैं। इस प्रकार उन बुद्धिमानोंका धन नष्ट न हो कर भविष्य में भी बना रहता है ॥ ८४ ॥

यदि धनिकों के धन का नाश नहीं हुआ अर्थात् वह यदि उनके पास बना रहा तो वह धन विना किसी प्रयोजन के ही दूसरों को पीडा देनेका कारण व पराधीन होगा। जो वैभव धर्म और निर्मल लोगोंको सन्तुष्ट करता है वही वैभव योग्य है। ऐसा धन दाता के अधीन रहकर उसे आनंदित करता है वह उसके हित का कारण होता है ॥ ८५॥

उत्तम पात्र में प्रयुक्त हुआ धर्माभिलाषी जनों का धन साधुजनों से संरक्षित हो कर पर भव में पूर्व की अपेक्षा अनन्त गुणी व अविनश्वर होता है, यह निश्चित है। तथा उसके विपरीत जो धन घर में ही संचित रहता है वह धन की ऐसी स्थिति होने पर नष्ट होता है। धनानुरागी जन सत्पात्र में उसका सदुपयोग नहीं करते हैं। इससे यही सिद्ध होता है कि मोहरूप राजा बलवान् है ॥ ८६ ॥

लोक में लाखों के लाभ की संभावना के होने पर धनवान् मनुष्य लोभ के वशीभूत हो कर उस धन के समूल नष्ट हो जाने पर भी लाखों दे डालते हैं। परन्तु परलोक में निश्चित ही बहुत गुणों के लाभ की सम्भावना के होने पर वे उस धन को नहीं दिया करते हैं — पात्र-

---

८५) 1 व्ययः. 2 विभूतिभिः सह. 3 संपदा युक्तानां पुरुषाणाम्. 4 धर्मकार्याय श्रेष्ठम्. 5 असौ अयोगः. 6 आत्मनः । ८६) 1 रक्षितं धनम्, कैः साधुभिः. 2 अहो. 3 विनाशम्. 4 धनिनः. 5 न प्रयच्छन्ति. 6 मोहराजः । ८७) 1 प्रयच्छन्ति. 2 लोके. 3 बहुतरं धनम्. 4 परत्र विषये. 5 धनिनः ।

270) भोगारम्भपरिग्रहाग्रहवतां[1] शीलं तपो भावना
दुःसाध्या[2] गृहमेधिनां धनवतां दानं सुदानं पुनः ।
यस्तत्रापि[3] निरुद्यधो द्रमकधी रौद्रं समुद्रोपमं
संसारं स[4] कुतस्तरिष्यति नरो दुष्कर्मपापाकुलम् ॥ ८८

271) प्रकृतिचपलं पुंसां चित्तं प्रगच्छति ततस्ततः
कथमपि यदा पुण्यैर्यातं विहायितसंमुखम्[1] ।
भवति न तदा कालक्षेपः[2] क्षमो विदुषामहो
पुनरपि भवतादृङ् नो वा[3] चलं[4] सकलं यतः[5] ॥ ८९

272) प्राप्ते त्रये[1] ये गमयन्ति कालं ते वेगगच्छत्तरिकाधिरूढाः[2] ।
मूढा गृहीतुं प्रतिपालयन्ते रत्नाकरे रत्नमयत्नदृष्टम् ॥ ९०

दान में उसका सदुपयोग नहीं किया करते हैं। इसका कारण जो समस्त प्राणिसमूह को जीतने-वाला मोहरूप सुभट है वह जयवन्त रहा है । ॥ ८७ ॥

जो धनवान् गृहस्थ पाँचों इन्द्रियों के विषय-भोग, आरम्भ और परिग्रह में आसक्त रहते हैं उनके लिये शील, तप व मैत्र्यादि भावनाएँ दु:साध्य – दुर्लभ – होती हैं । ऐसे गृहस्थोंके लिये दान और वह भी सत्पात्र दान करना अशक्य होता है । जो द्रमकधी – रुपये पैसे में बुद्धि रखनेवाला कृपण – शील व तप आदि की तो बात दूर, किन्तु उस दान में भी उद्यमरहित होता है – उसके लिये उत्सुकतापूर्वक कुछ प्रयत्न नहीं करता है – वह दुराचरण रूप पाप से परिपूर्ण व समुद्र के समान अपार इस भयानक संसार को कहाँ से पार कर सकता है ? ॥८८॥

पुरुषोंका मन स्वभावत: चंचल होता है, इसीलिये वह इधर उधर दौडता है । यदि वह किसी प्रकार पुण्योदयसे दान के उन्मुख होता है तो फिर उस समय विद्वानोंको विलम्ब करना योग्य नहीं है । कारण यह कि जब यहाँ सब ही कुछ अस्थिर है तब फिर से वैसा संयोग मिलना संभव नहीं है ॥ ८९ ॥

पात्र वित्त और चित्त इन तीनों के प्राप्त हो जाने पर भी जो कालक्षेप करते हैं – शीघ्र दान नहीं देते हैं – वे मूर्ख मानो वेग से जानेवाली नौका पर आरूढ हो कर रत्नों से भरे हुए समुद्र में विना प्रयत्न के ही देखे गये रत्न के ग्रहण करने की प्रतीक्षा करते हैं – तत्काल उसे नहीं ग्रहण करते हैं ॥ ९० ॥

---

८८) 1 P D ग्रहवताम्. 2 दु:साध्या. 3 तत्र दाने. 4 जडबुद्धि: लोभी वा । ८९) 1 दानसम्मुखं चित्तं भवति, D दानसुमुखं जातं चित्तं. 2 विलम्बो न करणीय: D करणीय:. 3 वा न भवेत्. 4 चपलं वा विनश्वरम्. 5 कारणात् । ९०) 1 चित्ते वित्ते पात्रे. 2 नौ: जलतरिका ।

273) भव्यं वासः[1] श्लाघनीयो निवासः शय्या वर्या[2] प्राज्य[3]भोज्यं शुभाज्यम्[4] ।
पात्रं[5] पानं[6] भेषजादिप्रधानं भक्त्या देयं[7] सर्वसंघे ऽनिदानम्[8] ॥ ९१

274) यद्[1]आत्मनो ऽतिवल्लभं जगत्यतीव दुर्लभम् ।
तदेव भक्तिभाजनैः प्रदेयं[2]आदृतै[3]र्जनैः ॥ ९२

275) धर्मकार्ये ऽपि ये व्याजं[1] कुर्वते वित्ततत्पराः[2] ।
आत्मानं वञ्चयन्त्युच्चैस्ते नरा मूर्खशेखराः ॥ ९३

276) भो जना[1] भोजनं यावन्न न्यस्तं साधुभाजने ।
समग्रं[2]मग्रमस्तावद्भुज्यते स्वेच्छया कथम् ॥ ९४

277) तीर्थस्य मूलं मुनयो भवन्ति मूलं मुनीनामशनासनाद्यै[1] ।
यच्छ[2]न्निदं धारयतां[3] तीर्थं तद्धारणं पुण्यतमं वरेण्यम्[4] ॥ ९५

सुन्दर वस्त्र, प्रशंसनीय वसतिका, उत्तम शय्या — गादी आदि, देने के योग्य प्रचुर भोजन, पात्र, पीने योग्य वस्तु एवं औषध इत्यादि का दान सब संघ के लिये भक्तिपूर्वक विना निदान के — इस दान से मुझे स्वर्गादि की प्राप्ति हो, ऐसी इच्छा न करके — करना चाहिये ॥ ९१ ॥

भक्ति के भाजनभूत — भक्त — श्रावक जनों को ऐसे ही आहारादिक का दान आदरसे करना चाहिये जो कि अपने को अतिशय प्रिय व लोक में अत्यन्त दुर्लभ होता है ॥ ९२ ॥

जो धन में आसक्त रहनेवाले मानव धर्म कार्य में भी छल — कपट करते हैं, वे मूर्ख शिरोमणि स्वयं अपने को ही धोखा देते हैं । ॥ ९३ ॥

हे भव्य जनो ! जब तक साधु रूपी पात्र में संपूर्ण उत्तम भोजन को नहीं स्थापित किया है, तब तक तुम स्वेच्छासे स्वयं भोजन कैसे करते हो ? ॥ ९४ ॥

मुनिजन तीर्थ के — धर्म के — मूल (प्रधान कारण) हैं और मुनियोंकी स्थितिका मूल कारण अन्न व आसन आदिक हैं । इसलिये जो श्रावक उन मुनियोंको अन्नादिक देते हैं वे उस तीर्थ को धारण करते हैं । इस प्रकार तीर्थ का धारण करना अत्यन्त पुण्यदायक और श्रेष्ठ है ॥ ९५ ॥

९१) 1 मनोज्ञवस्त्रम्. 2 प्रधाना. 3 मनोज्ञ. 4 घृतम्. 5 भाजनम्. 6 दुग्धजलादिकम्. 7 दातव्यम्. 8 कर्मक्षयनिमित्तम् । ९२) 1 दानम्. 2 दातव्यम्. 3 आदरपूर्वकैः । ९३) 1 मृषा. 2 असावधानाः । ९४) 1 भो लोकाः. 2 समस्तम् । ९५) 1 आहारआसनादि. 2 सन्. 3 तस्य तीर्थस्य. 4 श्रेष्ठम् ।

278) तीर्थे यद्भव्या भवजलनिधेरुत्तरीतुं तरण्डं
सम्यक्त्वं केचिद्विरतिमपरे देशतः[2] सर्वतो ऽन्ये ।
अङ्गीकुर्वाणाः कुशलमतुलं कुर्वते कारयन्ते
तत्स्यान्निःशेषं शुभपरिणतेस्तीर्थनिर्वाहकस्य ॥ ९६

279) इह[1] हि गृहिणां निर्वाणाङ्गं विहाय विहायितं[2]
जिनपरिवृढैः[3] प्रौढं बाढं परं परिकीर्तितम्[4] ।
न खलु यदतो मुख्ये[5] ऽमुष्मिन्नतीव कृतादरैः
कृतिभिरनिशं[6][7] भव्यं[8] भव्यं[9] भवाब्धितितीर्षया[10] ॥ ९७

280) ग्लानादीनां पुनरवसरे सीदतां क्वापि बाढं
यत्नाद्देयं स्वयमुरुतरं[1] दापनीयाः परे ऽपि ।
काले दत्तं विपुलफलदं येन संपद्यते ऽदः[2]
सद्धान्यानामिव जलधरैः[3] शुष्यतां मुक्तमम्भः ॥ ९८

भव्य जीव जो तीर्थ में संसार समुद्र से पार करने के लिये नौकातुल्य सम्यग्दर्शन को कितने ही भव्य देशविरति को – श्रावक के धर्म को – तथा अन्य कितने ही भव्य संपूर्ण – विरति – महाव्रत रूप चारित्र – को ग्रहण करके अपने और पद के अनुरूप हितको करते व कराते हैं, यह सब तीर्थ का निर्वाह करनेवाले की शुभ परिणति का फल है ॥ ९६ ॥

चूँकि यहां जिनेन्द्र देव ने गृहस्थों के लिये दान को छोडकर दूसरा कोई अतिशय प्रवृद्ध – पुष्ट – निर्वाण का कारण नहीं निर्दिष्ट किया है – उसे ही उन्होंने गृहस्थों के लिये प्रमुख निर्वाण का साधन बतलाया है, इसीलिये भाग्यशाली गृहस्थों को संसाररूप समुद्र से पार होने की इच्छा से निरन्तर उस प्रमुख दान कर्म के विषय में अतिशय आदरयुक्त रहना चाहिये ॥ ९७ ॥

जो रोगी व वृद्ध आदि मुनिजन कहीं पर दुःख का अनुभव कर रहे हों उनको योग्य अवसर पर अतिशय प्रयत्न पूर्वक महान दान स्वयं देना चाहिये और अन्य भव्यों से भी दिलाना

---

९६) 1 यस्य तीर्थे. 2 देशविरति अणुव्रतं सर्वविरति महाव्रतम्. 3 सम्यक्त्वदेशविरतिसर्वविरत्यादि-समस्तं तीर्थनिर्वाहकस्य पुरुषस्य भवति । ९७) 1 जगति. 2 PD दानम्.3 जिनस्वामिभिर्वीतरागैः. 4 कथितम्. 5 दाने. 6 पुण्यवद्भिः. 7 वारंवारम्. 8 भो भव्याः. 9 भवितव्यम्. 10 तर्तुमिच्छया । ९८) 1 उत्कटम्. 2 एतद्दानम्. 3 मेघैः ।

281) भक्तं[1] विपत्तावुपकारि[2] किंचित् संपद्यते जीवितकल्पमल्पम् ।
पुंसः[3] पिपासोः[4] सुतरां मुमूर्षो[5]रानीय पानीयमिवोपनीतम्[6] ॥ ९९

282) कालेन ता[1] एव पदार्थमात्राः प्रायः क्रियन्ते ऽसुमतां महार्घाः ।
स्वात्यामिवापो[2][3] ऽपि पयोदमुक्ताः स्थूलामलाः शुक्तिमुखेषु मुक्ताः[4] ॥ १००

283) प्रस्तावमासाद्य सुखाय सद्यः संपद्यते दुःखकरः पदार्थः ।
यूनां[1] मुदाये[2]न्दुरिव[3] प्रियाभियोगे[4] वियोगे[5] परितापहेतुः ॥ १०१

284) यद्यन्यदा न क्रियतें तथापि व्यापत्सु[1] कार्यं[2] गुरुणा[3]दरेण ।
अन्नादिदानं महते फलाय को ऽल्पेन[4] नो पुण्यमुपाददीत ॥ १०२

चाहिये । कारण यह कि योग्य काल में दिया हुआ दान विपुल फल को – धनादि वैभव को – इस प्रकार देता है जिस प्रकार कि मेघों के द्वारा छोडा गया जल सूखते हुए उत्तम धान्य के – गेहूं आदि की फसल के – विपुल फल को देता है ॥ ९८ ॥

विपत्ति के समय दिया हुआ थोडा-सा भी दान जीवित देने के समान उपकारक होता है जिस प्रकार कि प्यास से पीडित हो कर मरने के इच्छुक हुए मनुष्य को ला कर दिया हुआ थोडासा भी जल उपकारक होता है ॥ ९९ ॥

समयानुसार वे थोडे-से भी पदार्थ प्राणियों के लिये अतिशय मूल्यवान इस प्रकार किये जाते हैं जिस प्रकार कि स्वाति नक्षत्र के समय मेघोंके द्वारा छोडा गया जल सीपों के मुखों में पड कर स्थूल व निर्मल मोतियों के रूप में अतिशय मूल्यवान् किया जाता है ॥ १०० ॥

दुःख को उत्पन्न करनेवाला भी पदार्थ योग्य अवसर को पाकर शीघ्र ही सुख के लिये होता है – सुखरूप परिणत हो जाता है । जो चन्द्र तरुण जन को प्रियाओं के वियोग में संताप का कारण होता है वही उनके संयोग समय में आनन्दका भी कारण होता है ॥ १०१ ॥

रागादिक दोषों के समूह के नष्ट हो जाने से निर्मल बुद्धि के धारक मुनिजनों को जो उत्कृष्ट सुख प्राप्त होता है उसका वर्णन आगम में किया गया है। तथा वह अनुमान से भी सिद्ध है ॥ ४९॥

इसीलिये जिस प्रकार अग्नि के (उपशमकी) अधिकता में इन्धन के अभाव की संभावना की जाती हैं, उसी प्रकार विद्यमान उपशम की अधिकता में रागादि के अभाव का अनुमान किया जाता है ॥ ५० ॥

जो जिसका विरोधी होता है उसके वृद्धि में अन्य का विनाश देखा जाता है। जैसे शुक्लता से – सफेदी की वृद्धि में – मलिनता का विनाश ॥ ५१ ॥

इसी प्रकार से किसी जीव में जब सम्यग्ज्ञानादिक गुणों का प्रकर्ष बढते बढते पूर्णावस्था को प्राप्त होता है, तब अविद्या (अज्ञान) व तृष्णा आदि का अतिशय विनाश उसके होता ही है ॥ ५२ ॥

४८) 1 कायमनःप्रधानानाम्. 2 द्वन्द्वः अनिष्टः । ४९) 1 समूह. 2 विनाशात्. 3 पुनः कथंभूतास्ते । ५०) 1 भाव्यतया ।

529) चिरतरकाल[1]लीनं कलधौतोपलमलमिव प्रयोगेण ।
झटिति विघटते जन्तोः[2] कर्म ज्ञानादियोगेन ॥ ५३

530) पापस्यापि विलोकयन्ति सुधियो लोकाः फलं दारुणं
चौराणां वधबन्धनं बहुविधं वित्तापहारादिकम् ।
जिह्वाच्छेदनभेदनाद्यपयशो लोके मृषाभाषिणां[1]
नानाकारनिकार[2]मङ्गविगमाद्य[3]न्याङ्गनासंगिनाम्[4] ॥ ५४

531) अर्हच्छ्रीचूडामणिकेवलिकाज्योतिरमलशास्त्रादेः ।
संवादिनो जिनोक्तादतीन्द्रियो ऽप्यागमः सत्यः ॥ ५५

532) एवंविधसिद्धान्तादपि भगवान् साध्यते हि सर्वज्ञः ।
विप्रतिपत्तौ झटिति प्रकटं कूटस्य दुर्दुरूढस्य[1] ॥ ५६

533) अन्योन्याश्रयदूषणं न च भवेत् पूर्वोत्तरोत्सारितं
सर्वज्ञस्य निषेधने[1] ऽपि समतान्येनाश्रयासंद्धत ।
भात्यन्तःकरणे च तत्र वदतां मीमांसकस्तत्कथं
संतानेन विना बुधः स हि [illegible]त्कृतो ऽनर्हतः ॥ ५७

जिस प्रकार दीर्घकाल से संश्लेष को प्राप्त हुआ सुवर्ण पाषाण का मैल प्रयोग से – अग्नि के तापसे – शीघ्र ही विलीन हो जाता है, उसी प्रकार ज्ञानादि के संबन्ध से प्राणी का दीर्घ काल से संबद्ध कर्म भी शीघ्र नष्ट हो जाता है ॥ ५३ ॥

विद्वान् लोग पाप के भयानक फल को देखते ही हैं । जैसे – लोक में चोरों को दुसरों के धन आदि के अपहरण से प्राप्त हुआ बहुत प्रकार का वध-बन्धन आदिका दुख, असत्य-भाषियों को जिव्हा का छेदन-भेदन आदि एवं अपकीर्ति, परस्त्रीसेवियों को लिंगच्छेदनादिरूप अनेक प्रकारका अपकार ॥ ५४ ॥

श्रीजिनेश्वर ने कहे हुए सत्य ऐसे अर्हच्छ्रीचूडामणि, केवलिकाज्योतिरमलशास्त्र आदि निर्दोष शास्त्रों से अतीन्द्रिय आगम भी सत्य है। तात्पर्य – उपर्युक्त शास्त्रों की प्रतीति सत्यरूपा होनेसे जिनेश्वर के मुखसे जो दिव्य ध्वनि निकली थी वह सत्य है ऐसा अनुमान से सिद्ध होता है ॥ ५५ ॥

उपर्युक्त सिद्धान्त से भी भगवान् सर्वज्ञ की सिद्धि की जाती है । इससे भिन्न मत प्रकट करने पर (भिन्न मत-वाले का) असत्य दुर्नय झट से प्रकट हो जावेगा ॥ ५६ ॥

इस में अन्योन्याश्रय दोष का संभव भी नहीं है । क्योंकि इसका पहले ही उत्तर देकर

५३) 1 P °चिरकाला°. 2 जीवस्य । ५४) 1 असत्यवादिनाम्. 2 धिक्कार. 3 अङ्गच्छेदनादि. 4 परस्त्रीभोगिनाम् । ५६) 1 दुर्णयस्य । ५७) 1 D° निषेवने ।

534) ये चेच्छन्त्यपि नेच्छन्ति सर्वज्ञं मानसे सदा ।
तेषामपि स्फुरत्साक्षान्निराकार्यः कथं भवेत् ॥ ५८

535) इत्येवं मानतः सिद्धः सर्वज्ञो दोषवर्जितः ।
स[1] भव्यानुग्रहायैव[2] प्रतिपादयति श्रुतम् ॥ ५९

536) लिङ्गागमानपेक्षं[1] किंचिदन्नीतं[2] वदेत् क्वचित् ।
एवं को ऽपि समस्तं साक्षात्कुर्वन्नहतकर्मा[3] ॥ ६०

537) नैवागमो ऽस्त्यमूलः संबन्धाग्रहणतो न लिङ्गमपि ।
तथ्यमतीन्द्रियमर्थं साक्षाद्विदितं जिनो वदति ॥ ६१

538) गिरां[1] विदन् दोषगुणौ कियन्तौ परोपकाराहित[2]प्रवृत्तिः ।
अन्यो ऽपि धर्मामृतधौतबुद्धिर्न वक्ति पूर्वापरसंविरुद्धम् ॥ ६२

निराकरण किया गया है । सर्वज्ञ भगवान् का निषेध करने के लिये दिया गया आश्रयासिद्ध नामक दोष अन्य आगम से समान है । यदि वह हृदय में प्रकाशित होता है, तो मीमांसक उसे नहीं कैसे कहेगा ? वह ज्ञानी संतान के बिना अर्हतसे अन्य लोगों को कैसे जानेगा (?) ॥५७॥

(सर्वज्ञ की जानने की) जिनकी इच्छा है और जिनकी नहीं उन दोनों के भी मन में प्रत्यक्ष रूपसे स्फुरित होनेवाले सर्वज्ञ का निषेध कैसे किया जा सकता है ? ॥ ५८ ॥

इस प्रकार प्रमाण से दोषरहित सर्वज्ञ सिद्ध होता है । वह भव्य जीवों का अनुग्रह करने के लिये ही श्रुत का प्रतिपादन करता है, अर्थात् भावश्रुत का प्ररूपण करता है ॥ ५९ ॥

जैसे कोई पुरुष लिंग और आगम की अपेक्षा के विना कुछ सत्यार्थ का प्रतिपादन करता है, वैसे ही जिसने समस्त कर्मों को नष्ट कर दिया है ऐसा कोई महात्मा संपूर्ण पदार्थों का साक्षात्कार करनेवाला है ॥ ६० ॥

अमूल आगम नहीं है । तथा बिना संबन्ध ग्रहण किये लिंगज्ञान भी नहीं है । श्री जिनेश्वर अतीन्द्रिय पदार्थों को प्रत्यक्ष से यथार्थ जानकर उनका व्याख्यान करते हैं ॥ ६१ ॥

जो वचनों के कितने ही दोष और गुणों को जानता है, जिस की परोपकार में उत्तम प्रवृत्ति है, तथा जिसकी बुद्धि धर्मरूप अमृत के द्वारा धो दी गयी है – निर्मल कर दी गई है – ऐसा अन्य भी – सर्वज्ञ से भिन्न अल्पज्ञ भी – पूर्वापर विरुद्ध वचन नहीं कहता है ॥ ६२ ॥

---

५९) 1 सर्वज्ञः. 2 उपकाराय प्रसादाय वा । ६०) 1 D चिह्नं. 2 विना. 3 D शुभकर्मा । ६२) 1 वाणीनाम्. 2 D रोपित ।

539) धर्मं विशुद्धमधिगच्छति[1] शुद्धबोधो यः श्रद्दधात्यविधुरो[2] विधिना विधत्ते[3] ।
संबोधयत्यबुधभव्यजनं भवाब्धेरुत्तारकः सकरुणः स गुरुर्गुणाढ्यः ।। ६३

540) तथोक्तम् –
प्राज्ञः[1] प्राप्तसमस्तशास्त्रहृदयः[2] प्रव्यक्तलोकस्थितिः[3]
प्रास्ताशः[4] प्रतिभापरः[5] प्रशमवान्[6] प्रागेव दृष्टोत्तरः[7] ।
प्रायः प्रश्नसहः प्रभुः[8] परमनोहारी परानिन्दया
ब्रूयाद्धर्मकथां गणी गुणनिधिः प्रस्पष्टमिष्टाक्षरः[9] ।। ६३*१

541) देवागमगुरुतत्त्वं परीक्षितं पण्डितैरुपादेयम् ।
तापाद्यैरिव काञ्चनमिह वञ्चनभीतचेतोभिः ।। ६४

542) गुरुदेवयोः स्वरूपं निरूपितं प्रक्रमागतं[1] किमपि ।
आगमतत्त्वं प्रकृतं[2] समासतस्तत्[3]समाम्नातम्[4] ।। ६५

जो निराकुल निर्मल ज्ञानी निर्दोष धर्म के स्वरूप को जानता है, उसके ऊपर श्रद्धान करता है, विधिपूर्वक उसका आचरण करता है, ज्ञानहीन भव्य जनों को उपदेश देता है, तथा जो दयार्द्र हो कर उनका संसार-समुद्र से उद्धार करता है, इत्यादि गुणों से युक्त महात्मा को गुरु कहा जाता है ।। ६३ ।। कहा भी है –

जो विद्वान् गणी – आचार्य – समस्त शास्त्रों के रहस्य का ज्ञाता, लोकव्यवहार से परिचित, निःस्पृह, प्रतिभा – नवीन नवीन तर्कणारूप बुद्धि – से सम्पन्न, शान्त, शंका के पूर्व ही उसके समाधान का अन्वेषक, प्रायः करके सब प्रकार के प्रश्नों को सहनेवाला – उनसे उद्विग्न न होनेवाला, प्रभावशाली, दूसरों के चित्त को आकर्षित करनेवाला, परनिन्दा से दूर, अनेक गुणों से विभूषित, तथा स्पष्ट व मधुर भाषण करनेवाला हो, वही धर्मकथा के कहने का अधिकारी – तत्त्व व्याख्याता – होता है ।। ६३*१ ।।

जिस प्रकार मन में अयथार्थताकी आशंका करनेवाले ग्राहक यहाँ सुवर्ण की तपाने आदि उपायों द्वारा परीक्षा कर के उसे ग्रहण किया करते हैं, उसी प्रकार विद्वानों को देव, आगम और गुरु के स्वरूप की परीक्षा कर के ही उन को ग्रहण करना चाहिये ।। ६४ ।।

प्रकरण के अनुसार उन में से गुरु और देवका कुछ स्वरूप पूर्व में कहा जा चुका है। इस प्रकरण में प्रकृत आगम का स्वरूप संक्षेप से कहा गया है ।। ६५ ।।

६३) 1 गृह्णाति. 2 अहीनः. 3 धारयति । ६३*१) 1 प्रज्ञासंयुक्तः. 2 सर्वशास्त्रपारंगतः. 3 ज्ञातलोकस्थितिः. 4 प्रकर्षेण निरस्ता आशा येनासौ प्रास्ताशः आशारहितः. 5 बुद्धिमान्, D बुद्धिपरः. 6 उपशमयुक्तः. 7 D प्रथमः उत्तरसमर्थः. 8 D आचार्यः. 9 D वि [व्य] क्ताक्षरः । ६५) 1 पूर्वागतं पूर्वप्रारब्धम्. 2 पूर्वप्रारब्धम्. 3 आगमतत्त्वं. 4 कथितम् ।

543) आगमाधिगमनीयमशेषं[1] निर्दिशन्ति खलु धर्मविशेषम् ।
आगमव्यपगमे[2] हि नियोगाज्जायते सकलधर्मविलोपः ।। ६६

544) आलोकेन विना लोको मार्गं नालोकते यथा ।
विनागमेन धर्मार्थी धर्माध्वानं[1] जनस्तथा ।। ६७

545) उच्छिद्यमानो यत्नेन धर्मानुच्छेदवाञ्छया ।
आगमः सति सामर्थ्ये रक्षणीयो विचक्षणैः ।। ६८

546) श्रेष्ठबुद्धिनरवाहनादिभिर्लेखितं[1] सकलमेव शासनम् ।
पालितं परमतद्विधिर्यथाकारि[2] भव्यनिवहस्य दर्शितः ।। ६९

547) श्रेयसा[1] क्षितिभुजाप्यनामिकाजन्मनि[2] श्रुतविधिर्व्यरच्यत[3][4] ।
तत्फलं च समरुम्भि[5] विश्रुतं[6] दानतीर्थपरिवर्तनादिकम् ।। ७०

संपूर्ण धर्म विशेष — श्रावक और मुनियों का मूल व उत्तर गुणादिरूप आचार तथा जीवादिक तत्त्वों का स्वरूप — आगम से जाना जाता है, ऐसा विद्वान कहते हैं । ऐसे आगम का लोप होने पर नियमसे समस्त धर्म का ही लोप संभव है ॥ ६६ ॥

जिस प्रकार पथिक जन प्रकाश के विना अभीष्ट मार्ग को नहीं देख सकते हैं, उसी प्रकार धर्म के अभिलाषी जन उस आगम के विना धर्म के भी मार्ग को नहीं देख सकते हैं ॥ ६७ ॥

धर्म की परम्परा का नाश न हो, ऐसी अभिलाषा रख कर जिन विद्वानों में उस आगम के संरक्षण करने का सामर्थ्य है उन्हें नष्ट किये जानेवाले उस आगम का प्रयत्न पूर्वक रक्षण करना चाहिये ॥ ६८ ॥

श्रेष्ठ बुद्धि के धारक नरवाहन आदि राजाओं ने संपूर्ण जिनागम को लिखाया है तथा उसका संरक्षण भी किया है । साथ ही उन्हों ने भव्य समूह के लिये उस की उत्कृष्ट विधि को भी दिखलाया है । (नरवाहन राजा का दूसरा नाम भूतबली है । उन्हों ने श्री धरसेन आचार्य के पास आग्रायणीय पूर्वगत पंचम वस्तु के चतुर्थ प्राभृत का अध्ययन किया और तदनन्तर उन्हों ने षट्खण्डागम की रचना की है) [विबुध श्रुतावतार] ॥ ६९ ॥

श्रेयान् राजा ने अनामिका नामक कन्या के भव में श्रुतविधि नामक उपोषण व्रत (१५८ दिनों का) को किया था । उसका उसने दान तीर्थ प्रवृत्ति आदि रूप प्रसिद्ध फल भी प्राप्त किया था ।। ७० ॥

---

६६) 1 D पठनीयं. 2 विनाशे । ६७) 1 धर्ममार्गम् । ६९) 1 नरवाहनादिभि: समस्त आगमं जयधवला महाधवलादि लिखापितम्. 2 D कृत: । ७०) 1 धर्मस्थापनवाञ्छया. 2 निर्नामिकामवान्तरश्रुतविधि: कृत:. 3 D श्रुतस्कन्धविधि:. 4 रचित: कृत:. 5 प्राप्तम्. 6 D विख्यात ।

548) संधार्याः सपरिच्छदा[1]: श्रुतधराश्चिन्नान्नपानादिना
लेख्यं पुस्तकजातमुत्तमधिया शस्तं च शस्तं[2] मुदा[3] ।
आत्मीयं हिमरश्मिमण्डलतले दत्त्वात्र नामामलं
नानाबन्धनवेष्टनादिविधिना संरक्षणीयं सदा ॥ ७१

549) द्रविणं साधारणमुपकरणं[1] चादरेण भरणीयम् ।
पुस्तकसंघादीनां निमित्तमापत्तिसंपत्तौ ॥ ७२

550) कुर्वाणा निर्वहणं धर्मस्यानिधनमित्थमिह धनिनः ।
बध्नन्त्यनुबन्धि शुभं निबन्धनं[1] बन्धनविनाशे ॥ ७३

551) तर्कव्याकरणाद्या विद्या न भवन्ति धर्मशास्त्राणि ।
निगदन्त्य[1]विदितजिनमतमिति जडमतयो जनाः केऽपि ॥ ७४

552) द्रव्यानुयोगः सकलानुयोगमध्ये प्रधानोऽभिदधे[1] सुधीभिः ।
तर्कप्रमाणं भणिगद्यते ऽसौ[2] सद्धर्मशास्त्रं ननु[3] दृष्टिवादैः[4] ॥ ७५

निर्मलबुद्धि श्रावक को सपरिवार श्रुतज्ञानियों का भोजन-पानादि के द्वारा संरक्षण करना चाहिये । एवं अपनी उत्तम बुद्धि से आनन्दपूर्वक उत्कृष्ट से उत्कृष्ट शास्त्र समूह को लिखना चाहिये । तथा अपने निर्मल नाम को चन्द्रमण्डल के पृष्ठ पर दे कर अनेक बन्धन और वस्त्र वेष्टन आदि की विधि से उन शास्त्रों का सदा रक्षण करना चाहिये ॥ ७१ ॥

शास्त्र तथा मुनि व आर्यिका आदिरूप चार प्रकार के संघ आदि के ऊपर आपत्ति के आने पर उसके परिहार के लिये साधारण धन एवं उपकार के योग्य उपकरण आदि को पुष्ट करना चाहिये – उनका दान करना चाहिये ॥ ७२ ॥

इस प्रकार से यहाँ धर्म का अखण्ड निर्वाह करने वाले धनिक जन व्यवधान रहित उस पुण्य कर्म को बाँधते हैं, जो पापबन्धका नाश करने में समर्थ होता है ॥ ७३ ॥

कितने जडबुद्धि जन जिन भगवान् के अभिप्राय को न समझने के कारण यह कहते हैं कि तर्क, व्याकरण व ज्योतिष आदिक विद्यायें धर्मशास्त्र नहीं हैं ॥ ७४ ॥

परन्तु उनका वैसा कहना संगत नहीं है, क्योंकि, समस्त – चारों – अनुयोग में द्रव्यानुयोग मुख्य है, ऐसा विद्वानों के द्वारा कहा गया है । दृष्टिवाद स्वरूप वह द्रव्यानुयोग तर्क प्रमाण को समीचीन धर्मशास्त्र कहता है ॥ ७५ ॥

---

७१) 1 परिवाराः, D मुनयः परिवारसहिताः संधार्याः. 2 D कथितम्· 3 हर्षेण । ७२) 1 D त्यागे समानवृत्ति मेघवत् दातव्यम् । ७३) 1 D मोक्षकारणम् । ७४) 1 कथयन्ति । ७५) 1 कथितः, D धारयामि. 2 द्रव्यानुयोगः. 3 D° ननु दृष्टि°. 4 D पुनः कथं न धर्मवादः ।

553) गणिते[1] धर्मकथायां चरणे द्रव्ये भवेयुरनुयोगाः ।
व्याख्यातानां चतुर्णां तुर्यो[2] वर्यः[3] समाख्यातः ॥ ७६

554) स्वामी समन्तभद्रः श्रीमानकलङ्कदेव इत्याद्याः ।
तर्केण प्रमाणैरपि शासनमभ्युद्धरन्ति स्म ॥ ७७

555) मिथ्यादृष्टिश्रुतमपि सद्दृष्टिपरिग्र[1]ात्समीचीनम् ।
ताम्रं रसानुविद्धं कम्रं[2] किमु काञ्चनं न संभवति ॥ ७८

556) दीप इव शब्दविद्या[1] परमात्मानं च दीपयत्युच्चैः ।
आत्मप्रकाशनेऽपि हि न तथा पुनरन्यशास्त्राणि[2] ॥ ७९

557) तदुक्तम्–
चन्द्रं चुचुम्बिषसि मूढ जिघृक्षसेऽर्कं ।
द्यां[1] प्रोर्णुनूर्षसि[2] करेण सचन्द्रताराम् ॥
दोर्भ्यां[3] तितीर्षसि[4] समुद्रमगाधपारं ।
यच्छब्दशास्त्रमनधीत्य[5] विवक्षसेऽर्थान्[6] ॥ ७९*१

गणित, धर्मकथा, चारित्र और द्रव्य इन चार को क्रमशः विषय करने वाले चार अनुयोग हैं। इन कहे हुए चार अनुयोगों में चौथा अनुयोग – द्रव्यानुयोग – श्रेष्ठ कहा गया है ॥ ७६ ॥

स्वामी समन्तभद्र और श्रीमान् अकलंक देव आदि प्रमुख तार्किक आचार्यों ने तर्क से तथा अनुमानादि अन्य प्रमाणों से भी जिन शासन का उद्धार किया है ॥ ७७ ॥

सो ठीक भी है, क्योंकि, मिथ्या दृष्टियों के द्वारा प्ररूपित श्रुत भी सम्यग्दृष्टियों के द्वारा स्वीकार करने पर समीचीन हो जाता है। पारद रससे संबद्ध तांबा क्या मूल्यवान सुवर्ण नहीं बन जाता है ? ॥ ७८ ॥

जिस प्रकार शब्दविद्या (व्याकरण शास्त्र) दीपक के समान आत्मा और परमात्मा को भी प्रकाशित करती है, उस प्रकार अन्य शास्त्र – मिथ्यादृष्टि प्ररूपित श्रुत – केवल आत्मा को भी नहीं प्रकट करता है ॥ ७९ ॥ कहा भी है।

शब्द शास्त्र के अध्ययन के बिना जो तुम पदार्थों का विवेचन करना चाहते हो, उससे हम ऐसा समझते हैं कि तुम चन्द्रका चुम्बन करना चाहते हो, सूर्य को ग्रहण करने की इच्छा करते हो, अपने हाथ से चन्द्र और ताराओं सहित आकाशको आच्छादित करने की इच्छा करते

७६) 1 लोकस्थितौ. 2 द्रव्यानुयोगः. 3 P D प्रधानः । ७८) 1 ग्रहणात्. 2 मनोज्ञम् । ७९) 1 द्रव्यश्रुतम्. २ अन्यमिथ्यादृष्टिजनितानि । ७९*१) 1 आकाशम्. 2 पर्णं इच्छसि आकाशम्, D व्योम हस्तेन मापयसि. 3 भुजाभ्यां. 4 तरितुं वाञ्छसि, D तरितुमिच्छसि. 5 P D अपठित्वा. 6 पदार्थान् व्याख्यायसि।

558) व्याकरणालङ्कारच्छन्दःप्रमुखं जिनोदितं मुख्यम् ।
सुगतादिमतमपि स्यात्स्यादङ्कं स्वमतमकलङ्कम् ॥ ८०

559) मुनिमतमपि विज्ञातं[1] न पातकं तनुविरक्तचित्तानाम् ।
यत्[2]सर्वं ज्ञातव्यं कर्तव्यं न त्वकर्तव्यम् ॥ ८१

560) विज्ञाय किमपि हेयं किंचिदुपादेयमपरमपि दूष्यम् ।
तन्निखिलं खलु लेख्यं ज्ञेयं सर्वज्ञमतविज्ञैः ॥ ८२

561) ये लेखयन्ति सकलं सुधियो ऽनुयोगं
शब्दानुशासनमशेषमलङ्कृतीश्च[1] ।
छन्दांसि शास्त्रमपरं च परोपकार-
संपादनैकनिपुणाः पुरुषोत्तमास्ते ॥ ८३

हो । तथा अगाध व अपार समुद्र को अपने दोनों बाहुओं से तरने की इच्छा करते हो । (तात्पर्य यह कि जिस प्रकार चन्द्र का चुम्बन – स्पर्शन – आदि सर्वथा असंभव है उसी प्रकार व्याकरण के अध्ययन के बिना पदार्थों का व्याख्यान भी सर्वथा असम्भव है) ॥७९*१ ॥

व्याकरण, अलंकार व छन्दःशास्त्र आदि जिनेश्वरकथित शास्त्र मुख्य हैं तथा बौद्ध आदि अन्य मत भी जब स्यात् पद से अंकित अर्थात् स्याद्वाद से भूषित होते है तब वे भी स्वमत – जिनमत और निर्दोष होते हैं । (तात्पर्य – बौद्ध व नैयायिकादिकों के शास्त्रों में वस्तु का स्वरूप सर्वथा नित्यानित्यादि रूप से कहा गया है । यदि उसमें स्यात् पद को जोड दिया जावे तो वह भी अनेकान्तात्मक हो जाने से प्रमाणयुक्त होगा, तब उसे जैन मत कहने में कुछ हर्ज – हानि नहीं है) ॥ ८० ॥

जिन सज्जनों का मन शरीर से विरक्त हो चुका है उनके लिये मुनि के मत का जानना भी पाप नहीं है । कारण यह कि जो भी कर्तव्य है उस सबको जान लेना योग्य है, किन्तु अकर्तव्य को जानना उचित नहीं है ॥ ८१ ॥

जो विद्वान् सर्वज्ञ के मत से परिचित हैं उन्हें जो कुछ भी हेय है, जो कुछ उपादेय है और अन्य जो कुछ भी दूषण के योग्य है, उस सब ही ज्ञेय को जानकर लिखना चाहिये ॥८२॥

जो विद्वान् संपूर्ण अनुयोग को, संपूर्ण व्याकरण शास्त्र को, समस्त अलंकार शास्त्रको छन्दःशास्त्र को और अन्य भी शास्त्र को लिखवाते हैं, उन्हें परोपकार करने में अतिशय चतुर पुरुषोत्तम समझना चाहिये ॥८३॥

८१) 1 P D विज्ञानवम्. 2 यतः कारणात् । ८३) 1 D अलंकारान् ।

562) ते धन्या धनिनस्त एव भुवने ते कीर्तिपात्रं परं
तेषां जन्म कृतार्थमर्थनिवहं ते वहन्त्वन्वहम्[1][2] ।
ते जीवन्तु चिरं नराः सुचरिता जैनं शुभं शासनं
ये मज्जद्गुरुदुःखमाम्बुधिपयस्यभ्युद्धरन्ति स्थिराः[3] ॥ ८४

563) किं किं तैर्न कृतं न किं प्रवहितं[1] पापं प्रदत्तं न किं
केऽपायाः[2] न निवारितास्तनुमतां[3] मोहार्णवे[4] मज्जताम्[5] ।
नो पुण्यं किमुपार्जितं किमु यशस्तारं[6] न विस्फारितं
सत्कल्याणकलापकारणमिदं यैः शासनं लेखितम्[7] ॥ ८५

564) निक्षिप्ता वसतौ सतां क्षितिपतेः संपत्प्रमोदास्पदं
भाण्डागारितमामरं[1] स्थिरतरं श्रेष्ठं गरिष्ठं पदम् ।
सत्यं कारितमक्षयं शिवसुखं दुःखाय दत्तं जलं
धन्यैस्तैः स्वधनैरलेखि[2] निखिलं यैर्वाङ्मयं निर्मलम् ॥ ८६

इति सप्तमोऽवसरः ॥ ७ ॥ इति अवसरद्वयेन ज्ञानदानवृष्टिः ॥

जो स्थिर विद्वान् महान् दुःखमाकालरूप समुद्र के जल में डूबते हुए जिनेश्वर के उत्तम शासन का उद्धार करते हैं वे धन्य हैं, वे ही धनिक हैं, वे ही उत्कृष्ट कीर्ति के पात्र हैं, उनका जन्म कृतार्थ है तथा उन को प्रतिदिन धन समूह की प्राप्ति होती है । उत्तम आचार के धारक वे पुरुष दीर्घ काल तक जीवित रहें ॥ ८४ ॥

जिन्होंने उत्तम कल्याण समूह के कारणभूत इस आगम को लिखवाया है, उन्होंने कौन कौन से शुभ कार्य नहीं किये हैं, कौन कौन से पाप नष्ट नहीं किये हैं, कौनसा दान नहीं दिया है, मोहरूप समुद्र में डूबते हुए प्राणियों के कौनसे संकटों को दूर नहीं किया है, कौन सा पुण्य प्राप्त नहीं किया है, तथा किस निर्मल यश को लोक में नहीं फैलाया है ? (अर्थात् उन्होंने सब ही उत्तम कार्यों को कर लिया है तथा चिर संचित पाप कर्म को भी नष्ट कर डाला है । इस से उनका निर्मल यश भी लोक में फैला है) ॥ ८५ ॥

जिन्होंने अपने धन के द्वारा समस्त निर्मल आगम को लिखवाया है उन भाग्यशाली महापुरुषोंने हर्ष की कारणभूत राजा की संपत्ति को सज्जनों के घर में रख दिया है – अर्थात् उसके पढने से सत्पुरुषों को श्रेष्ठ राज्यलक्ष्मी प्राप्त हो सकती है । अतिशय स्थिर, श्रेष्ठ व गौरवशाली देवों संबन्धी पद को— इन्द्रादि की विभूति को — भाण्डागार में अवस्थित कर लिया है । अविनश्वर मोक्षसुख को सत्यंकार – बयाना – देकर अपने अधीन कर लिया है । तथा दुःख को जलांजलि दे दी है – उसे सर्वदा के लिये नष्ट कर दिया है ॥ ८६ ॥

इस प्रकार सातवाँ अवसर पूरा हुआ ॥ ७ ॥ इस प्रकार इन दो (६–७) अवसरों के द्वारा ज्ञानदान के फलका व्याख्यान किया ।

---

८४) 1 D °वहन्त्वेन्वह°, रक्षन्तु. 2 प्रतिदिनम्, D अनवतं[अनवरतं]. 3 D दुःखमकाल । ८५) 1 P D ° प्रविहृतम्, किं किं पापं प्रकर्षेण विशेषेण न हृतम्, D विनाशितम्. 2 उपद्रवा विनाशाः. 3 संसारिणां जीवानाम्, D जीवानां. 4 D मोहसमुद्रे. 5 D ब्रुडताम्. 6 निर्मलं उज्ज्वलं वा. 7 D लिखापितम् । ८६) 1 देवं पदम्. 2 D लिखितम् ।

[८. अष्टमो ऽवसरः]

[औषधदानफलम्]

565) ओषधांहतिरितो[1][2] निवर्ण्यते तस्य वत्सलजनाग्रवर्तिनः ।
ईक्षते ऽक्षयसुखं[3] य एव ना[4] नीरुजत्वदाननिबन्धनं धनम् ॥ १

566) जीवितार्थमभयस्य तद्यथा दानमिष्टमशनावबोधयोः ।
भेषजस्य च तदर्थमीरितं तद्विना[1] ननु दया विदूयते[2] ॥ २

567) यस्माद्व्याधिग्लपितवपुषं[1] धर्म्यहर्म्यं हि संघं
रत्नं यद्वद्विगलितधिया चूर्ण्यमानं कुतश्चित् ।
आसक्तश्चेन्मदवशतयोपेक्षते ऽधर्मकल्पो
ऽवैयावृत्त्याद्द्वयमपि महद्धर्म[2]मत्युत्ससर्ज[3] ॥ ३

अब यहाँ से वत्सल जन के मध्य में प्रमुखता को प्राप्त पुरुष के लिये औषध दान का वर्णन किया जाता है। जो पुरुष इस दान को देता है वह अक्षय सुख को देखता है। यह औषध-दान नीरोगता का कारणभूत धन है ॥ १ ॥

जिस प्रकार जीवित–प्राणधारण–के लिये अभय, आहार और ज्ञानका दान अभीष्ट है, उसी प्रकार उस जीवित के लिये औषध का भी वह दान कहा गया है। क्योंकि, उसके विना निश्चय से दया अधूरी रहती है ॥ २ ॥

कारण यह कि जो विषयासक्त हो कर अभिमान के वशीभूत होता हुआ यदि किसी नष्टबुद्धि – मूर्ख के द्वारा किसी कारण से चूर्ण किये जानेवाले रत्न के समान रोग से ग्रस्त शरीरवाले ऐसे धर्म के [illegible]भूत संघ की उपेक्षा करता है तो वह अधर्मकल्प – पापिष्ठ के समान – मनुष्य वैयावृत्त्य न करनेसे महान् धर्म को (और संघ को) भी नष्ट करता है ॥ ३ ॥

---

१) 1 औषधांहतिरभयदानम्. "विश्राणनं वितरणं स्पर्शनं प्रतिपादनम । प्रदेशनं निर्वपनमुपसर्जनं मंहतिरित्यमरः." 2 D ज्ञानदानानन्तरम्. 3 D °ईक्ष्यतिक्षयसखम्°, D विनाशमितम्. 4 गृहस्थः, D पुरुषः । २) 1 अभ बदान. 2 हीना भवति, विनश्यते । ३) 1 D कारणात्. 2 P D महाधर्मं. 3 D विनाशितः ।

568) त्यक्ते तत्र[1] निरन्तरं परिहृतं तीर्थेशिनां[2] शासनं
संसारोदधिलङ्घनार्थकजगत्पोतायमानं सदा ।
तस्मात् षोडशकारणेषु पठितं चाभ्यन्तरं तत्तपो[3]
ग्लानाभ्युद्धरणं च कीर्तिकरणं धर्मप्रियैरर्ज्यताम्[4] ॥ ४

569) औदारिकेनापघनेन[1] नूनं शक्यो विधातुं[2] सकलो ऽपि धर्मः ।
तत्[3]सर्वरोगैकसखं सदैव[4] नैवान्यथा[5] तत्प्रतिपाल्यमस्ति ॥ ५

570) रुजासु यावत्क्षमते तदौषधैः परैश्च पथ्यैर्नितरां[1] प्रपाल्यते ।
उपेक्ष्यते जातु[2] न तावदाश्रमैः[3] शरीरमाद्यं[4] खलु धर्मसाधनम् ॥ ६

571) रुजां सहेतापि निजोचितां वपुर्न वज्रकायैकसहां[1] तदीरितम् ।
पदं सहेत भ्रमरस्य पेलवं[2] शिरीषपुष्पं न पुनः पतत्रिणः[3] ॥ ७

इस प्रकार उस महाधर्म स्वरूप वैयावृत्य के निरन्तर छोड देने पर उसने जो तीर्थंकरों का शासन – उपदिष्ट वस्तुस्वरूप – संसाररूप समुद्र के लांघने में – उसके पार होने में– उत्सुक विश्व के लिये सदा नाव के समान है उसे भी छोड दिया, ऐसा समझना चाहिये । यही कारण है जो उक्त वैयावृत्य को तीर्थंकर प्रकृति के बन्ध की कारणभूत दर्शनविशुद्धि आदि सोलह भावनाओं के मध्य में पढा गया है – निर्दिष्ट किया गया है । अभ्यन्तर तप के अन्तर्गत वह वैयावृत्य रोगी साधुओंका उद्धार करने वाला एवं कीर्ति के प्रसार का कारण है । इसलिये धर्मानुरागी जनों को उसका उपार्जन करना चाहिये ॥ ४ ॥

औदारिक शरीर से निश्चयतः संपूर्ण धर्म का पालन करना शक्य है । वह शरीर सदा सर्व रोगोंका अनुपम मित्र है । यही कारण है जो उसके संरक्षण की आवश्यकता होती है । अन्यथा उसके रक्षण की आवश्यकता ही नहीं थी ॥ ५ ॥

जबतक वह शरीर रोगसे मुक्त होने के योग्य है तबतक औषध और पथ्य से उसका पालन जरूर करना चाहिये । किसी भी आश्रम में रहनेवाले उसकी उपेक्षा नहीं करते । क्योंकि शरीर धर्म का प्रमुख साधन है ॥ ६ ॥

शरीर अपने योग्य रोग को ही सह सकता है, वह वज्रसमान दृढ शरीर के द्वारा सह सकने योग्य रोग को ठीक नहीं कहा है । ठीक है – कोमल शिरीष कुसुम भ्रमर के चरण को ही सह सकता है, परन्तु वह पक्षी के पद के भारको नहीं सह सकता है ॥ ७ ॥

४) P D 1 वैयावृत्ये. 2 तीर्थंकराणाम्. 3 वैयावृत्यम्. 4 उपार्जनीयम् । ५) 1 P D शरीरेण. 2 कर्तुम्. 3 औदरिकं शरीरम्. 4 औषधदानेन विना. 5 औदरिकशरीरस्य । ६) 1 D अतिशयेन. 2 कदाचित्. 3 श्रावकैः, D भव्यैः. 4 औदरिकं शरीरम्. ७) 1 D वज्रकायैकसहां रुजां प्रति तच्छरीरं न ईरितम्. 2 सूक्ष्मं, कोमलम्. 3 पक्षिणः.

572) परीषहाणां सहनं मुनीनां यथा हि धर्मो गृहिणां तथैव ।
योग्योपयोगस्य विधायिताख्यं[1] द्वयं द्वयेषां[2] द्वयसौख्यकारी[3] ॥ ८

573) प्रतिदिवससमुद्यत्क्षुद्व्यथावारणार्थ-[1]
मशनमिव[2] नियोज्यं भेषजं चापि तद्वत् ।
रुगुपशमनिमित्तं कामसंग्रामधावद्
विदितविजयभाजां संयतानां प्रपुष्ट्यै ॥ ९

574) यथा कतकसंयोगात्समलं निर्मलं जलम् ।
कार्यार्थिभिः क्रियेतैवं योगिकायोऽपि भेषजैः ॥ १०

575) रोगैर्हिमैरिव[1] सरःसु[2] सरोरुहाणि[3]
ग्लायत्सु[4] तीर्थगुरुहेतुषु संयतेषु ।
म्लायन्ति तीर्थचरणानि[5] ततोऽवनाय[6][7]
तेषां तु भेषजमनेकविधं प्रदेयम् ॥ ११

जैसे परीषहोंका सहना मुनियोंका धर्म है वैसे ही उन के लिये योग्य उपयोगी औषध आदि का देना यह गृहस्थों का भी धर्म है । इस प्रकार ये दोनों धर्म दोनों के लिये इह-परलोक में सुखदायक हैं ॥ ८ ॥

काम के साथ युद्ध करने के लिये दौड कर निश्चित ही विजय को प्राप्त करने वाले संयमी जनों के पोषणार्थ जिस प्रकार प्रतिदिन उत्पन्न होनेवाली उनकी भूख की पीडा के दूर करने के लिये आहार की योजना की जाती है, उसी प्रकार उनके रोग की बाधा दूर करने के लिये औषध की भी योजना करना योग्य है ॥ ९ ॥

जिस प्रकार कार्यों की अभिलाषा रखनेवाले मनुष्य मलिन जल को निर्मली फल के संयोग से निर्मल कर लिया करते हैं, उसी प्रकार मुनिजन के (रुग्ण) शरीर को औषध के संयोग से नीरोग कर देना भी योग्य है ॥ १० ॥

जिस प्रकार तुषार से तालाबों में कमल मुरझा जाते है उसी प्रकार तीर्थप्रवृत्ति के प्रबल हेतुभूत संयमी जनों में रोगों के कारण तीर्थाचरण – व्रताचरण – मुरझा जाते हैं – नष्टप्राय हो जाते हैं । इसीलिये उनके संरक्षण के लिये उन्हें अनेक प्रकारकी औषधि को देना चाहिये ॥ ११ ॥

---

८) 1 दानम्, D दानाख्यम्. 2 यतीनां गृहस्थानाम्. 3 इहलोकपरलोक । ९) 1 भूख. 2 आहारम् । ११) 1 D प्रालेयैः. 2 P D सरोवरेषु. 3 PD कमलानि. 4 ग्लानेषु, D म्लानेषु सत्सु. 5 धर्मव्रतनियमसंयम-ज्ञानपठनपाठनव्याख्यानसम्यग्दर्शनवृद्धिकारणादि आचरणानि, D धर्मव्रतनियमसंयमानि आचरणानि. 6 ततस्तेषामाचरणानां रक्षणार्थं तेषां तु यतीनां भेषजं नानाप्रकारं देयम्. 7 रक्षणस्य ।

576) जल्पन्ति केचित्समयानभिज्ञा[1] न भेषजादेः फलदायि दानम् ।
कामादिद[illegible]रणत्वादारम्भजत्वात्तदनर्थकारि ॥ १२

577) पापधीप्रसरवारणं[1] दृढं दुर्विदग्धजन[2]चित्तचोरणम् ।
उत्तरं किमपि रच्यते मया सूरिदेवनिवहस्य विश्रुतम् ॥ १३

578) संसारदोषनिचयप्रतिवीक्षणेन
नश्यन्ति योगिनिवहस्य तदुत्थदोषाः[1] ।
व्याघ्रावलोकनभयादिव भुक्तपीतं
याति[2] क्षयं[3] क्षणत एव पशुव्रजस्य[4] ॥ १४

579) जायन्ते यदि मन्मथाद्यवगुणा[1][illegible] ते[2] नो चिरं
सम्यग्ज्ञानतपःप्रभावावेलस[illegible]योगीन्द्रचेतोभुवि[3] ।
उद्यच्चण्डरुचि[4]प्रतापविभिता[5] घूका[6] वराका यथा
संतप्ते[7] नकुलः[8] स्थितं[9] च सरितां पूरे[10] यथा मूत्रितम्[11] ॥ १५

जैनशास्त्र को न जाननेवाले कितने ही जन ऐसा कहते हैं कि औषधि आदिका देना फलदायक नहीं है । क्योंकि वह कामादि दोषों का हेतु है । तथा चूंकि वह आरम्भ से उत्पन्न होता है इसलिये अनर्थकारक भी है ॥ १२ ॥

ग्रन्थकार कहते हैं कि मैं इस आशंका का ऐसा कुछ सुदृढ उत्तर रचता हूँ जो पापबुद्धि के फैलाव को रोकनेवाला, दुर्बुद्धि जनों के अन्तःकरण को चुरानेवाला व आचार्यपरम्परा में प्रसिद्ध होगा ॥ १३ ॥

जिस प्रकार व्याघ्र के देखने के भय से पशुसमूह का खाया पीया सब क्षणभर में ही नष्ट हो जाता है, उसी प्रकार संसारसंबन्धी दोषसमूह के निरन्तर देखने से साधुसमूह के औषधि आदि से उत्पन्न वे कामादि सब दोष शीघ्र नष्ट हो जाते हैं । (अतएव उक्त दोषों की आशंका से औषधि आदि के दान को निरर्थक बतलाना युक्तिसंगत नहीं है) ॥ १४ ॥

जिस प्रकार उदित हुए प्रचण्ड सूर्य के प्रताप से भयभीत बेचारे उल्लू दीर्घकाल तक नहीं रहते हैं, सन्तप्त स्थान में नेवला दीर्घकालतक अवस्थित नहीं रहता है, तथा नदियों के प्रवाह में मूत्रजल दीर्घकाल तक नहीं रहता है — शीघ्र ही बह जाता है — उसी प्रकार सम्य-

१२) 1 समयरहिताः । १३) 1 D निवारणं. 2 दुष्टज्ञानिनः । १४) 1 कामोत्था भेषजाहारादिर्वा दोषाः. 2 D गच्छति. 3 D नाशं. 4 D पशुसमूहस्य । १५) 1 दोषाः. 2 अवगुणाः दोषाः. 3 D पृथिव्याम्. 4 सूर्य. 5 भयभीताः. 6 P D उलूकाः. 7 D सूर्येण. 8 सर्पारिः. 9. स्थितं चिरं तिष्ठति न, D निजस्थानं. 10 स्थलरेणुपूरमध्ये । 11 मूत्रितं चिरं न तिष्ठति ।

580) दोषा भविष्यन्ति यतीश्वराणां तैर्भेषजैः पुष्टिमतां[1]मितीदम् ।
ज्ञानं कुतः प्रत्युत[2] मोक्षलक्ष्मीं ते साधयिष्यन्त्यचिरेण किं च ॥ १६

581) ब्रह्माण्डशुद्धिरेतेन कुचोद्येन[1] चिकीर्षिता ।
समग्राश्रमसद्दानव्रतजीवितराक्षसी ॥ १७

582) तदुक्तम्–
सूक्ष्मेक्षिका[1] तु यद्यत्र क्रियते प्रथमोद्यमे ।
असौ सकलकर्तव्यविप्रलोपाय कल्प्यते ॥ १७*१

583) महास्तिकैस्तत्सकलैरभीष्टं वपूंष्यवद्भिः[1] किल नास्तिकैश्च ।
ततोऽपरैर्देयमिति प्रसिद्धं महाजनो येन गतः स पन्थाः ॥१८

ज्ञान के तथा तपश्चरण के प्रभाव से सुशोभित मुनीन्द्र जन के अन्तःकरणरूप भूमि में यदि वे कामादि दोष उत्पन्न भी होते हैं, तो वे दीर्घकाल नहीं रह सकते हैं ॥ १५ ॥

उन औषधियों के द्वारा पुष्ट हुए मुनीश्वरों के दोष उत्पन्न होते हैं, ऐसा ज्ञान आपको कहाँ से हुआ ? कारण कि वे मुनीन्द्र तो इसके विपरीत शीघ्र ही मोक्षलक्ष्मी को सिद्ध करनेवाले हैं ॥ १६ ॥

शंकाकारने ऐसी कुशंका के द्वारा उस लोकशुद्धि के करने की इच्छा की है जो कि समस्त आश्रमों, समीचीन दान एवं व्रतों के जीवित को नष्ट करने के लिये राक्षसी के समान है -- उन सब को समूल नष्ट करनेवाली है ॥ १७ ॥ सो ही कहा है–

यदि यहाँ प्रथम प्रयत्न में ही सूक्ष्मता से विचार किया जाता है, तो वह सब ही करने योग्य कार्यों के विनाश के लिये होगा । अभिप्राय यह है कि दानादि में प्रवृत्त होना यह धर्माचरण की प्रथम अवस्था है । इसलिये यदि इसके विषय में भी इतनी गहराई से विचार किया जाता है, तो इस से आगे का सब ही धर्म का मार्ग नष्ट हो जावेगा ॥ १७*१ ॥

जो अतिशय आस्तिक हैं उन सभी को यह दानादि रूप सत्प्रवृत्ति अभीष्ट है । तथा शरीर की रक्षा करनेवाले – जो अन्य नास्तिक जन हैं वे भी कहते हैं कि दान देना चाहिये । जिस मार्ग से महापुरुष जाते हैं – जैसा वे आचरण करते हैं – उसी मार्ग को समीचीन समझकर ग्रहण करना चाहिये, यह वाक्य प्रसिद्ध भी है ॥ १८ ॥

१६) 1 यतीनाम्. 2 P D अधिका । १७) 1 कुत्सिताक्षेपेणाद्येन, D कुत्सिताक्षेपेण । १७*१) 1 D दृष्टिः । १८) 1 रक्षद्भिः ।

584) श्रीधर्मनामनगरे च महत्तरेण[1]
धर्मप्रियक्षितिपतेः सुपरीक्षितश्च ।
क्षीराद्यमुख्यमशनं मदनादिहेतु-
स्त्यक्त्वा तपोधिनिवहो हि महेरकेण[2] ॥१९

585) राजा तु ज्ञातवृत्तान्तः क्षीराद्यमदीदपत्[1] ।
माराद्यर्थे[2] न तेषां तन्न[3] गुणार्थं महेरकम् ॥ २० । युग्मम् ।

586) नाहारभेषजाद्यं प्रायो मीनध्वजादिदोषार्थम्[1] ।
आहार[2]भीपरिग्रहमैथुनसंज्ञाः स्वभावजा यस्मात् ॥ २१

587) न हि स्वार्थं समुद्दिश्य प्रतिगृह्णन्ति साधवः ।
दातुरेवोपकाराय गृह्णन्ति सुसमाहिताः[1] ॥ २२

588) शिवधर्मे तदुक्तम् –
सिंहो बली हरिणशूकरमांसभक्षी
वर्षात् प्रियां प्रभजते हि किलैकवारम् ।
पारावतः खरशिलाकण[1]भक्षणेन
कामी भवत्यनुदिनं बत को ऽत्र हेतुः ॥ २२*१

श्रीधर्मनामक नगर में धर्मप्रिय नामक राजा के महेरक नामक महत्तर (प्रधान) ने खीर आदिका आहार कामादिविकारका कारण है, ऐसा समझकर उस के दान का त्याग करके तपस्वि समूह की परीक्षा की। परन्तु राजा को जब यह ज्ञात हुआ तब उसने महेरक से उक्त खीर आदि को तपस्वियों के लिये दिलवाया। ये खीर आदि भोज्य पदार्थ उनके न कामादि विकार के लिये होते हैं और न लाभ के लिये भी होते हैं, ऐसा राजाने कहा ॥ १९–२० ॥

आहार और औषध आदि प्रायः कामविकारादि दोष के कारण नहीं हैं। कारण कि आहार, भय, परिग्रह और मैथुन ये चार संज्ञायें (अभिलाषायें) स्वाभाविक हैं ॥ २१ ॥

मुनि स्वार्थ के उद्देश से आहार को नहीं ग्रहण करते हैं, किन्तु वे समाधि अथवा मूलगुणों आदि में तत्पर रहकर दाता के ऊपर उपकार करने के लिये ही उसे ग्रहण करते हैं ॥ २२ ॥ शिवधर्म में कहा गया है –

हरिण और शूकर के मांस को खानेवाला बलवान सिंह वर्ष में एक बार ही सिंहिनी के साथ संभोग करता है। परन्तु खेद है कि कबूतर तीक्ष्ण शिलाओं के कणों (कंकडो) के भक्षण से प्रतिदिन काम से युक्त होता है, इसमें क्या कारण है ? ॥ २२*१ ॥

---

१९) 1 PD मन्त्रिणा श्रेष्ठिना वा. 2 माहिगी तया, नीरसेन भुक्त :[?]। २०) 1 दापयामास. 2 कामादि. 3 क्षीरान्नम्। २१) 1 कामादिदोषार्थम्, D कन्दर्पः. 2 भयम्। २२) 1 D सावधानाः। २२*१) 1 कांकर पाथर [?]।

589) संपद्यते च कश्चिद्दोषो यदि लेशतो महामुनिषु ।
अ ानविलासो ऽसौ सुचेतसा चैवमालोच्यम् ॥ २३

590) जातो[1] महर्षिनिवहेषु तपो ऽमलेषु
चन्द्राङ्ककल्पमलमो णवर्जितो ऽपि ।
आलोकते[3] पिबति नैव चकोरवच्च[4]
पां षमोचिकरकल्प[5]गुणां ।
॥ २४

591) प्रसृतैर्गुणैरनेकैर्व्याप्तासु तपोभृतां तरां तनुषु ।
अवकाशं न लभन्ते दोषा घूका इव दिनेषु ॥ २५

592) तदुक्तम्--
शम स्वा लितमनसामशनमपि द्वेषमेति किमु कामाः[1] ।
स्थलमपि दहति झषाणां[2] किमत्र पुनरङ्गमङ्गाराः ॥ २५*१

यदि महामुनियों में कुछ थोडा-सा दोष उत्पन्न होता है, तो वह अज्ञान का विलास है, ऐसा विचारशील मनुष्य को विचार करना चाहिये ॥ २३ ॥

तप से निर्मल महर्षियों के समूह में चन्द्र के कलंक समान बाहर नहीं फेंक देनेवाला दोष यद्यपि उत्पन्न हो गया तो भी चकोर पक्षी जैसे चन्द्र के कलंक को न देखकर, अमृत को बाहेर छोडने वाली उसकी किरणों को ही ग्रहण करता है, वैसे महामुनियों के अमृतसमान गुण को व्रती ग्रहण करें ॥ २४ ॥

विस्तार को प्राप्त हुए अनेक गुणों से व्याप्त तपस्वियों के शरीर में दोष इस प्रकार से स्थान को प्राप्त नहीं कर पाते जिस प्रकार कि उल्लू दिन में अवकाश को नहीं प्राप्त कर पाते ॥ २५ ॥ कहा भी है –

जिन साधुओं का मन शांतिसुख से समभ्यस्त है उन को जब आहार भी अप्रिय लगता है, तब भला उन्हें काम – विषय भोगादिक – क्या प्रिय लग सकते हैं ? कदापि नहीं । ठीक है— मछलियों के शरीर को जब पृथ्वी भी संतप्त करती है तब फिर महान् अंगार का तो कहना ही क्या है ॥ २५*१ ॥

२४) 1 D जातं. 2 सदृशदोष, D चन्द्रकलङ्कवत्. 3 D तथा उत्तमजनाः गुणान् आलोकयन्ति नतु गृह्णन्ति. 4 D यथा चकोरः विषपानं न करोति अमृतं पिबति. 5 सदृश । २५*१) 1 P D अभिलाषाः 2 P D मत्स्यानाम् ।

593) आरम्भजत्वम पे यद्गदितं तु तत्र
वच्मो वयं ननु[1] निराक्रियते ऽत्र[2] हिंसा ।
आरम्भतो ऽपि न हि यत्नवतां समस्ति[3]
सन्तस्ततो वितरणे[4] सततं[5] यतन्ताम्[6] ॥ २६

594) आरम्भतो यदि कुतो ऽप्युदयेत हिंसा
बन्धश्चिरं स्थितिमुपैति न सो ऽसुमत्सु[1] ।
सद्दर्शनेषु नयनेष्विव रेणुजात–
मित्यादिकं प्रवचने सविशेषमुक्तम् ॥ २७

595) संघस्य निरारम्भा मुनयो ऽपि चिकित्सितं[1] वितन्वन्ति ।
किमुतान्ये किंचान्यत्प्राणावायोक्तिरपरथा[2] विफला ॥ २८

शंकाकार ने जो यह भी कहा है कि, दान चूंकि आरम्भजनित है, अतएव वह हिंसा का कारण होने से हेय है । उसके उत्तर में हम कहते हैं व निश्चित ही उस हिंसा का निराकरण करते हैं। जो प्रयत्नवान् पुरुष सावधानी से आरम्भकार्यको किया करते हैं वे आरंभ से भी उस हिंसा दोष के भागी नहीं होते हैं । इसीलिये सत्पुरुषों को निरन्तर उस दान के विषय में प्रयत्न करना चाहिये ॥ २६ ॥

यदि किसी आरंभ से हिंसा उत्पन्न होती है तो सम्यग्दृष्टि प्राणियों में उससे उत्पन्न हुआ कर्म का बन्ध दीर्घ काल तक इस प्रकार नहीं स्थित रहता जिस प्रकार कि निर्मल नेत्रोंवाले प्राणियों के नेत्रों में गया हुआ धूलिका कण दीर्घ काल तक स्थित नहीं रहता, ऐसा प्रवचन में विशेषता पूर्वक कहा गया है ॥ २७ ॥

आरंभत्यागी मुनि भी संघ की चिकित्सा करते हैं अर्थात् रोग की परीक्षा कर के तदनुकूल औषधादिक की योजना करते हैं । फिर भला गृहस्थों के विषय में तो कहना ही क्या है – उन्हें तो वह करना ही चाहिये । दूसरे यदि ऐसा न माना जाय तो फिर प्राणावायपूर्व का विवेचन सब विफल होगा – प्राणावायपूर्व में जो संपूर्ण चिकित्सा विधि का सविस्तर वर्णन है वह व्यर्थ सिद्ध होगा ॥ २८ ॥

२६) 1 D भो. 2 D दाने. 3 P°समास्ति°. 4 दाने. 5 निरन्तरम्. 6 प्रयत्नं कुरुताम् । २७) 1 प्राणिषु । २८) 1 D क [औ]षधं. 2 D आत्मीया उक्तिर्विफला निषेधने ।

596) वचो न वन्ध्यं[1] वचनेश्वराणां[2] परार्थनिर्वर्तितवाङ्मयानाम्[3] ।
यथा तथा नैव वृथा यथाम्भो[4] जा.. तमुक्तं[5] धरणौ[6] सदापि ॥ २९

597) ....जनने[2] गुरुभक्तिभाजा धर्मप्रताप[?]यशसां सतताश्रयेण ।
चन्द्रप्रभेण[3] गुणिनां गदखेदितानां[4] दिव्यौषधादिभिरुपास्तिरकारि[6] नित्यम् ॥

598) ....णम् -
वैयावृत्त्यं सर्वसर्वज्ञदेवैर्भक्त्याकारि प्राग्भवे संयतानम् ।
व्याधिव्रातैर्ग्लानितानां यथावत् तत्संपन्नं तीर्थकृद्गोत्रभूत्यै[2] ॥ ३१

599) एतत्कारुण्यसर्वस्वमेतद्वात्सल्यजीवितम् ।
आगमज्ञत्वमूलं च यदेतद्ग्लानपालनम् ॥ ३२

600) पिष्टपेषणकल्पो ऽयमाक्षेपो[1] यदि वा कृतः ।
उत्तरं तु मया दत्तमिव चर्वितचर्वणम् ॥ ३३

जिन्होंने परोपकार के लिये आगम की रचना की है ऐसे जिनेन्द्र व गणधरादि का वचन इस प्रकार व्यर्थ नहीं है, जिस प्रकार कि पृथ्वी पर मेघों के द्वारा छोडा गया पानी व्यर्थ नहीं होता है ॥ २९ ॥

निरन्तर धर्म, प्रताप और कीर्ति के आश्रय तथा गुरुओं में भक्ति रखने वाले चन्द्रप्रभ जिनेन्द्र ने पद्मनाभ राजा के भव में रोग से पीडित गुणीजनों को दिव्य औषधि आदि दे कर उनकी उपासना की थी ॥ ३० ॥

यह उपलक्षण है। इस से यह समझना चाहिये कि अन्य भी अनेक मुनिराजों ने संघ को औषधादिक दे कर उसकी उपासना की भी है, इसी को आगे स्पष्ट करते हैं -

सब ही सर्वज्ञ तीर्थंकरोंने पूर्व भव में रोग समूह से अशक्त हुए संयतों की जो भक्ति से यथायोग्य वैयावृत्ति की थी, वह तीर्थंकर नामकर्मोदयजनित समवसरणादि विभूति का कारण हुई ॥ ३१ ॥

रोगपीडित मुनि आदिकों का रक्षण करना - उन का रोग दूर करना, यह दया का सर्वस्व, धर्मवात्सल्य का प्राण और आगम ज्ञान का मूल - प्रधान कारण - है ॥ ३२ ॥

अथवा यह जो आक्षेप - आशंका - की गई है वह पिसे हुए को पुनः पिसने के समान

२९) 1 P D विफलम्. 2 जिनेश्वराणाम्. 3 D परार्थनिर्मापितवाणीनाम्. 4 D जलं. 5 मेघमुक्तम् 6 भुवि । ३०) 1 [राजा] 2 जनने भवे, D जन्मनि. 3 पद्मनाभभवे चन्द्रप्रभतीर्थंकरेण, D अष्टमतीर्थंकरदेवेन. 4 रोगपीडितानाम्. 5 सेवा. 6 कृता । ३१) 1 वैयावृत्त्यम्. 2 D निमित्तम् । ३३) 1 प्रश्नः प्रश्नम् ।

601) यस्मादिदं विशेषाद् बुधजनहृदयहारि निःशेषम् ।
पूर्वं मयैव निगदितं दानसमर्थनावसरे ॥ ३४

602) कियन्तो ऽन्ये न कथ्यन्ते पुण्यभाजो जिनागमे ।
साधुरोगांश्चिकित्स्य लेभिरे[1] कमलाममलम्[2] ॥ ३५

603) भग्नं समारचयते सकलं स कृत्यं
संजीवयत्यपि मृतं स नरप्रधानः ।
आपद्गतं च परिपाति[1] स एव नूनं
यः संचिकित्सति गणं[2] गदपीडिताङ्गम्[3] ॥ ३६

604) चारित्राचरणप्रणाशनिपुणान्[1] क्लीबत्वसंदीपकान्
रोगौघान् समपाकरोति[2] विविधैः पथ्यैस्तथा भेषजैः ।
स्वेनान्यैर्नरदेवसौख्यममलं लब्ध्वा जगत्पूजितो
धन्यः श्रीजयसेनसूरिविनुतं नीरोगधामाञ्चति[3] ॥ ३७

अष्टमो ऽवसरः ॥८ ॥

व्यर्थ है और उसका उत्तर भी जो मैंने दिया है वह चबाये हुए को पुनः चबाने के समान है ॥३३॥

कारण यह है कि विद्वान् जनों के हृदय को हरनेवाला — उसे प्रफुल्लित करनेवाला — यह सब ही कथन मैं पूर्व में ही दान के समर्थन के प्रकरण में विशेषरूप से कर चुका हूँ ॥ ३४ ॥

जिन्होंने मुनियों के रोगों की चिकित्सा कर अतिशय ऐश्वर्य को प्राप्त किया है ऐसे इतर भी कितने ही पुण्यवान् पुरुषों का जिनागम में कथन किया गया है । उनका कथन हम यहाँ नहीं करते हैं ॥ ३५ ॥

जो रोग से पीडित मुनिसंघ को औषध दान दे कर उसे रोगरहित करता है वह पुरुष प्रमुख टूटे हुए सब कार्य को जोड कर पूर्ण करता है, मृत मनुष्य को जीवित करता है, तथा वह विपत्ति में पडे हुए का निश्चय से रक्षण करता है, ऐसा समझना चाहिये ॥ ३६ ॥

जो स्वयं अथवा अन्य जनों के द्वारा चारित्र के आचरण के नष्ट करने में चतुर व नपुंसकता को — कायरता को — उत्तेजित करने वाले रोग समूहों को अनेक प्रकार के अनुकूल आहारादि तथा औषधियों के द्वारा नष्ट करता है वह धन्य पुरुष लोक पूजित होता हुआ मनुष्य तथा देवों के निर्मल सुख को प्राप्त कर के श्री जयसेनसूरि से प्रशंसित रोगरहित धामको — मोक्ष को — प्राप्त होता है ॥ ३७ ॥

इस प्रकार अष्टम अवसर समाप्त हुआ ॥ ८ ॥

---

३४) 1 दान, D संक्षेपदानसमर्थनावसरे । ३५) 1 प्राप्तवन्तः. 2 लक्ष्मी । ३६) 1 रक्षति. 2 मुनि-समूहम्. 3 रोगपीडिताङ्गम् । ३७) 1 विनाशप्रवीणान्. 2 सम्यग्विनाशयति. 3 आगच्छति, D मोक्षं गच्छति ।

[९. नवमो ऽवसरः]

[सम्यक्त्वोत्पत्तिप्रकाशनम्]

605) न्यवेदि[1] दानं द्वयलोक[2]सौख्यदं निगद्यते शीलमदस्तथाविधम् ।
भवन्ति यस्या[3]चरणान्निरन्तरं त्रिलोकचूडामणयः परं नराः ॥ १

606) शीलं विनिर्मलकुलं सहगामिबन्धुः
शीलं बलं निरुपमं धनमेव शीलम् ।
पाथेय[1]मक्षयमलं [illegible]क्षा
साक्षादियद्गुणमिति प्रवदेज्जिनेन्द्रः ॥ २

607) भवति यतः[1] पुरुषार्थः[2] साध्यः सर्वस्य स[3]त्स्वरूपं तु ।
[illegible]म्यगवबोधविद्धं व्र[4]तमिह पुरुषार्थसिद्ध्युपायो ऽस्ति ॥ ३

इस लोक और परलोक में सुख देनेवाले दानका विवेचन किया जा चुका है । अब यहाँ उभयलोक में सुखप्रद उस शील को कहता हूं, जिसके निरन्तर आचरणसे पुरुष निरन्तर त्रैलोक्य के चूडामणि (शिरोभूषण) के समान उत्कृष्ट हो जाते हैं ॥ १ ॥

शील मनुष्यका निर्दोष कुल है, वह उसके साथ जानेवाला बन्धु है – मित्र है – शील अनुपम बल है, शील धन ही है तथा वह कभी समाप्त न होनेवाला संबल (नाश्ता) है । वह प्राणियों की निर्बाध रक्षा करता है । उसमें साक्षात् इतने गुण हैं, ऐसा जिनेन्द्र देवने कहा है ॥ २ ॥

जिस से सब प्राणियों को पुरुषार्थकी – मोक्ष की, जो कि आत्मा का स्वरूप है, सिद्धि होती है, वह सम्यग्ज्ञान से संबद्ध व्रत है और वह यहाँ पुरुष के प्रयोजनभूत मोक्ष की सिद्धि का कारण है ॥ ३॥

१) 1 अकथि. 2 इहलोकपरलोक. 3 शीलस्य । २) 1 संबलम् । ३) 1 शीलतः. 2 [illegible]; अथवा मोक्षः. 3 पुरुषार्थ. 4 शीलव्रतम् ।

608) सर्वं[1] देशाच्च सामान्याद्व्रतं शीलमितीरितः ।
द्वैधं विशेषतो ऽदः[2] स्याद्वक्ष्ये स्वावसरं क्रमात् ॥ ४

609) चण्डालो ऽपि चतुर्वेदो यदा[1]चरणतो भवेत् ।
अश्मेव[2] हेम तत्पाल्यं शीलं सर्वप्रयत्नतः ॥ ५

610) सर्वज्ञवीतरागेण भुवनानुग्रहाय[1] यत्[2] ।
अनुष्ठानं निधानं हि मुक्त्यै तद्[2]गदितं प्रमा[3] ॥ ६

611) तदुक्तम् —

ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥ ६*१

612) उच्चावचप्रसूतीनां[1] सत्त्वानां सदृशाकृतिः ।
य आदर्श इवाभाति स एव जगतां पतिः ॥ ६*२

सामान्य से शीलका अर्थ व्रत होता है । वह सर्व (महाव्रत) और देश (अणुव्रत) के भेदसे दो प्रकार का कहा गया है । इनका वर्णन मैं विशेष रूपसे अपने अवसर के अनुसार करूँगा ॥ ४ ॥

जिसके आचरण से सुवर्णपाषाण की सुवर्णरूपता के समान चाण्डाल भी चतुर्वेदी–चार वेदों का ज्ञाता हो जाता है। उस शीलका पालन महान् प्रयत्नपूर्वक करना चाहिये ॥ ५ ॥

जो अनुष्ठान– व्रताचरण– रूप भण्डार समस्त लोक का उपकार करनेवाला है, उसे सर्वज्ञ वीतराग देव ने मुक्ति का कारण कहा है, जो प्रमाणभूत है ॥ ६ ॥

वही कहा है–

अज्ञानी के उपदेश करने में विपरीतता या प्रतारणा की आशंका करने वाले सत्पुरुष इसके लिये उसके कथन को भक्तिपूर्वक स्वीकार करने के लिये किसी ज्ञानवान् को खोजा करते हैं ॥६*१॥

जो ऊँच व नीच उत्पत्ति (अथवा उक्तियों) वाले प्राणियों की समान आकृतियुक्त दर्पण के समान सुशोभित होता है वह तीनों लोकों का स्वामी आप्त होता है । अभिप्राय यह है कि जिस प्रकार दर्पण ऊंच व नीच विविध प्रकार के प्राणियों की आकृति को समान रूपसे

४) 1 महाव्रताणुव्रतात्. 2 एतच्छीलम् । ५) 1 शीलस्य. 2 पाषाणात् सुवर्णवत् । ६) 1 प्रसादाय. 2 शीलम्. 3 प्रमाणम् । ६*२) 1 उत्कृष्टहीनोत्पत्तीनां जीवानां समानाकृतिः ।

613) यस्यात्मनि श्रुते तत्त्वे चरित्रे मुक्तिकारणे ।
एकवाक्यतया वृत्तिराप्तः[1] सो ऽनुमतः सताम् ॥ ६*३

614) स्वगुणैः श्लाघ्यतां याति स्वदोषैर्दूष्यतां जनः ।
रोषतोषौ वृथा तत्र[1] कल्धौतायसोरिव[2] ॥ ६*४

615) द्रुहिणा[1]धोक्षजे[2]शान[3]शाक्य[4]सूर[5]पुरस्सराः ।
यदि रागाद्यधिष्ठानं[6] कथं तत्र[7]प्तता[8] भवेत् ॥ ६*५

616) रागादिदोषसंभूतिरुक्तामीषु[1] तदागमे ।
सतो ऽसतो ऽन्यदोषस्य गृहीतौ[2] पातकं महत् ॥ ६*६

617) एकान्तः शपथश्चेति वृथा तत्त्वपरिग्रहे ।
अन्तस्तत्त्वं न हीच्छन्ति परप्रत्ययमात्रतः ॥ ६*७

ग्रहण करता है– न वह ऊँच से अनुराग करता है और न नीच से द्वेष ही करता है– इसी प्रकार जो सचराचर विश्व को समान रूपसे ग्रहण करता हुआ – जानता हुआ– किसी से राग द्वेष नहीं करता है उस वीतराग सर्वज्ञ को आप्त समझना चाहिये ॥६*२॥

आत्मा, आगम, जीवादिक तत्त्व और मोक्ष के कारणभूत चरित्र के विषय में जिसकी एक वाक्यता से वृत्ति है, अर्थात् इन विषयों का जिसका उपदेश पूर्वापर विरोध से रहित होता है उसे सज्जनों में– गणधरादि महर्षियोंने– आप्त माना है ॥६*३॥

प्राणी अपने गुणों से प्रशंसा योग्य और अपने दोषों से निन्दा के योग्य होते हैं। इसलिये सुवर्ण और लोह के समान गुणों व दोषों से संयुक्त उन दोनों के विषय में क्रोधित और हर्षित होना व्यर्थ है ॥६*४॥

ब्रह्मदेव, विष्णु, महादेव, बुद्ध और सूर्य इत्यादि देव कहे जानेवाले यदि रागद्वेषों के आश्रय हैं– उन से व्याप्त हैं– तो उन में आप्तता–सर्वज्ञता–कैसे हो सकती है ? ॥६*५॥

इन देवों में रागादि दोषों की उत्पत्ति उनके आगम में कही गयी है। विद्यमान अथवा अविद्यमान अन्यके दोष के ग्रहण करने में बडा पातक होता है ॥६*६॥

वस्तु स्वरूप के ग्रहण में ' यह ऐसा ही है अन्यथा नहीं है, इस प्रकार का एकान्त (दुराग्रह) और सौगन्ध ये दोनों ही निरर्थक हैं। क्योंकि सत्पुरुष अभ्यन्तर तत्त्वको – आत्म स्वरूप को– दूसरे के ज्ञान मात्र से ही स्वीकार नहीं करते हैं ॥ ६*७॥

६*३) 1 सर्वज्ञः । ६*४) 1 जने. 2 सुवर्णलोहयोर्द्वयोरिव । ६*५) 1 ब्रह्मा. 2 विष्णुः. 3 ईश्वरः. 4 बुद्धः. 5 सूर्यः. 6 D °द्यधिष्ठानाः, मूलम्. 7 द्रुहिणादिषु. 8 सर्वज्ञता । ६*६) 1 द्रुहिणादिषु. 2 सति.

618) दाहच्छेदकषांशुद्धे हेम्नि का पथाक्रिया ।
तदाहुः सुधियस्तत्त्वं रहःकुहकवर्जितम् ॥ ६*८

619) ग्रहगोत्रगता ऽप्येष पूषा पूज्यो न चन्द्रमाः ।
अविचारिततत्त्वस्य जन्तोर्वृत्तिनिरङ्कुशा ॥ ६*९

620) आप्तः स्यान्मनुजः कथं भवतु वा तत्त्वावबोधः कुत-
स्तीर्थेशात्परतो ऽस्य तस्य च ततश्चेत्यनवस्थालता ।
तद्भावं तदभावमेव च यदि स्वीकृत्य एकस्तदा
चारो नेतरजीवव्रजगवतां कण्ठारवाणामिव ॥ ७

इसका भी कारण यह है कि अग्नि में तपाना, काटना और कसौटी पर घिसना इन उपायों से सुवर्ण की निर्मलता के निश्चित होनेपर फिर उसके लिये सौगन्ध खाने की क्या आवश्यकता रहती है ? इसलिये उत्तम बुद्धिवाले विद्वान् जो वस्तुस्वरूप एकान्त और प्रतारणा से रहित हो, उसे तत्त्व कहते हैं ॥ ६*८॥

जिस प्रकार सूर्य ग्रह और गोत्र (सूर्यवंश) से अनुगत है उसी प्रकार चन्द्र भी ग्रह व गोत्र से अनुगत है । फिर भी लोगों के द्वारा सूर्य की तो पूजा की जाती है, परन्तु चन्द्र की पूजा नहीं की जाती है । सो ठीक भी है, क्योंकि, तत्त्वविचार से रहित प्राणी की प्रवृत्ति बेरोक-टोक हुआ करती है ॥६*९॥

यहाँ वादी कहता है कि तुम (जैन) जो मनुष्य को आप्त मानते हो सो यह कैसे संभव है ? अर्थात् मनुष्य को– जो कि स्वभावतः अल्पज्ञ व रागी-द्वेषी है – आप्त मानना उचित नहीं है । दूसरे यदि मनुष्य को भी आप्त मान लिया जाय तो यह भी विचारणीय होगा कि उसको तत्त्वज्ञान कहाँ से प्राप्त होता है । इसके उत्तर में यदि यह कहा जाय की उसे तत्त्वज्ञान तीर्थंकरसे प्राप्त होता है, तो पुनः यही प्रश्न खडा रहेगा कि उस तीर्थंकर को भी वह तत्त्वज्ञान कहाँ से प्राप्त हुआ । इस पर यदि यह कहा जाय कि उसे अन्य तीर्थंकर से तत्त्वज्ञान प्राप्त हुआ तो इस प्रकार से उक्त प्रश्नोत्तरोंका पर्यवसान न होने से अनवस्था दोष अनिवार्य होगा । अतएव यदि किसी एक को तत्त्वज्ञ स्वीकार कर के आप्त के सद्भाव और अन्यान्य तीर्थंकरों के अभाव को स्वीकार करते हो तो निर्वाह हो सकता है, क्योंकि सिंहों के समान आप्तों की – ईश्वरों की – सन्तति मानना योग्य नहीं है । और तब वैसी

६*८) 1 कशआघर्षण, D कसोटी. 2 एकान्त. 3 P D कपट । ६*९) 1 सूर्यः D भानु । ७) 1 D भवेत्. 2 D आप्तो मनुजो भवति तदा तत्त्वावबोधो कुतः. 3 D आप्तस्य सद्भावस्य अभाव इह यदि. 4 सर्वज्ञानाम्. 5 सिंहानामिव., D अपरश्वापदवृन्दसमानो कण्ठीरवो न यथा तथा सर्वज्ञसमानो अपरो न ।

621) कौतस्कुतो ऽस्ति नियमस्तदिय[1]त्त्वकारी
तेषामिदं विवदतामपि नः[2] समं तत् ।
आप्तो बभूव कपिलो ऽपि मनुष्य एव
शौद्धोदनिः[3] कणचरो ऽपि च जैमिनिश्च[4] ॥ ८

622) तदुक्तम्--
यश्चोभयोः समो दोषः परिहारो ऽपि तत्समः ।
नैकः पर्यनुयोज्यः[1] स्यात्तादृगर्थविचारणे[2] ॥ ८*१

623) तेषां तु नो[1] ऽपि समयानुगत्व... –
जन्मान्तरोत्थितविशुद्धिविरागयोगात् ।
ध्यानाग्नितो विमलतामुपयाति जीवे
विश्वप्रकाशिमहिमा द्युमणेरिवास्ति[2] ॥ ९

अवस्था में उक्त आप्त की इतनी संख्या का – चोवीस तीर्थंकर की संख्या का नियम कहां से बन सकता है ? अर्थात् वह असंगत होगा । वादी की इस आशंका के उत्तर में यहाँ यह कहा जा रहा है कि जो वादीजन इस प्रकार का विवाद करते हैं, उनका यह आक्षेप हमारे समान ही है । जैसे हमने मनुष्य को आप्त माना है वैसे ही उक्तवादी जनों ने भी उसे मनुष्य ही माना है । यथा–सांख्यों के यहाँ जिस कपिल को आप्त माना गया है वह भी मनुष्य ही था इसी प्रकार शुद्धोदनका पुत्र बुद्ध, नैयायिकों का अभीष्ट आप्त कणाद और मीमांसकों को अभिमत जैमिनी ये सभी मनुष्य ही थे ॥७–८॥

वही कहा भी है–

वादी और प्रतिवादी दोनों के मध्य जो दोष समान होता है उसका परिहार भी समान ही होता है । ऐसी परिस्थिति में किसी एक के ही ऊपर आक्षेप करना उचित नहीं है ॥ ८*१॥

उपर्युक्त सांख्यादिक वादियों के यहाँ और हमारे यहाँ भी जो जीव समयानुसार तत्त्वका उपदेशक – आप्त–होता है वह पूर्व जन्म में उत्पन्न हुई विशुद्धि एवं वैराग्य के सम्बन्ध से ध्यानरूप अग्नि के निमित्त से निर्मलता को प्राप्त होने पर सूर्य के समान समस्त लोक को प्रकाशित करनेवाले माहात्म्य (सर्वज्ञता) से संयुक्त हो जाता है ॥ ९ ॥

८) 1 इयत्त्वनियमकारी, D निश्चयकारी. 2 D अस्माकं. 3 D बौद्धः. 4 D भिक्षोजातःसि (?) ८*१) 1 उपालम्भः. 2 D भवेत् । ९) 1 अस्माकम्. 2 P D सूर्यस्य ।

624) तदुक्तम्–

तत्त्वभावनयोद्भूतं जन्मान्तरस[illegible]स्थया ।
हिताहितविवेकाय यस्य ज्ञानत्रयं परम् ॥९*१

625) दृष्टादृष्टमवैत्यर्थं[1] रूपवन्तं तथावधिः ।
श्रुतेः श्रुतिसमाश्रेयं क्वासौ [illegible] ॥ ९*२

626) कस्या[illegible]क्षपयति तमः सप्तसप्तिः प्रजानां
छायाहेतोः पथि विटपिना[2][illegible]ञ्जलिः केन बद्धः ।
अभ्यर्थ्यन्ते[3] जलकण[illegible]चः[4] केन वा वृष्टिहेतो–
र्जात्यैवायं[5] [illegible]लक्षणः[6] स्वात्मनिर्बाधबोधः[7] ॥ १०

627) इति प्रसिद्धमें–

उपाये सत्युपेयस्य[1] प्राप्तेः का प्रतिब[illegible]ता[2] ।
पातालस्थं जलं य[illegible]र्थं[3] क्रियते यतः ॥ १०*१

वही कहा है–

पूर्व जन्म में प्राप्त हुई जीवादि तत्त्वोंकी भावना से तीर्थंकरों के ये तीन उत्तमज्ञान जन्मसे ही होते हैं । इनसे उन्हें हित और अहित का विवेक होता है । इन में मतिज्ञान से वे प्रत्यक्ष और परोक्ष पदार्थों को अवधिज्ञान से रूपी पदार्थों को और श्रुतज्ञान से द्वादशांग श्रुत में कहे हुए आचारादिकों को जानते हैं । इसीलिये उन्हें तत्त्वज्ञान के लिये अन्य गुरु आदि की अपेक्षा कहाँ से होती है ? अतएव उक्त अनवस्था दोष सम्भव नहीं है ॥ ९*१–२ ॥

सूर्य किसकी आज्ञा से प्रजाजन के अन्धकार को नष्ट करता है । मार्ग में छाया के लिये वृक्षों को हाथ किसने जोडे हैं । तथा वृष्टि के लिये जलकणों को छोडनेवाले मेघों से प्रार्थना किसने की है? अर्थात् किसीने भी नहीं की । तीर्थंकरों को जन्म से ही पापनाशक और बाधारहित आत्मज्ञान होता है ॥ १० ॥

इस विषय में ये श्लोक प्रसिद्ध हैं –

उपाय के होनेपर उपेय की–जो वस्तु हम चाहते हैं उसकी – प्राप्ति होने में कोई

९*२) 1 जानाति. १०) 1 D सूर्यः. 2 वृक्षाणाम्. 3 प्रार्थ्यन्ते. 4 P D मेघाः. 5 स्वभावेन. 6 पापभक्षणः, D पापनाशकः. 7 आत्मनः स्वभावजनितज्ञानः । १०*१) 1 कार्यसिद्धिप्राप्तेः. 2 का निरोधता, को निषेधः, D निबंधता । ३ मृत्तिकाभाजनस्थम् ।

628) अश्मा[1] हेमं[2] जलं[3] मुक्ता द्रुमो वह्निः क्षितिर्[4]मणिः ।
तत्तद्धेतुतया भावा[5] भवन्त्यद्भुतसंपदः ॥ १०*२

629) सर्गावस्थितिसंहारग्रीष्मवर्षातुषारवत्[1] ।
अनाद्यनन्तभावो ऽयमाप्तागमसमाश्रयः ॥ १०*३

630) स्वर्णानीव ह्यसंख्यानि धातवः[1] शुद्धियोगतः ।
भवन्त्याप्ता हि दृष्टेष्टाविरोधाभावतो नराः ॥ ११

631) श्रुतसर्वज्ञसंतानो ऽनादिर्बीजाङ्कुरादिवत्[1] ।
मूलक्षतिकरी नास्मादनवस्था न दूषणम् ॥ १२

632) तदुक्तम् –

प्रतिबन्ध (बाधा) नहीं होता । क्योंकि, यन्त्र के द्वारा पातालका भी पानी अपने हाथ में कर लिया जाता है ॥ १०*१ ॥

विभिन्न प्रकार के योग्य निमित्तों को प्राप्त कर कें पदार्थ आश्चर्यजनक सम्पत्ति, स्वरूप परिणत हुआ करते हैं । जैसे– अनुकूल निमित्त को पाकर पत्थर सोना बन जाता है, जल मोती बन जाता है, वृक्ष अग्नि बन जाता है और पृथिवी मणि बन जाती है ॥ १०*२॥

उत्पत्ति, अवस्थान और विनाशयुक्त ग्रीष्म, वर्षा और शीत ऋतुओं के समान पदार्थों का यह अनादि अनन्त स्वभाव आप्त व आगम का आश्रित है– उनके आश्रय से जाना जाता है ॥१०*३॥

जिस प्रकार शुद्धि के सम्बन्ध से पाषाणरूप धातुएँ असंख्यात सुवर्ण हो जाती हैं, उसी प्रकार शुद्धि के सम्बन्ध से– तपश्चरण जनित निर्मलता के आश्रय से– मनुष्य आप्त हो जाते हैं, इस में न तो प्रत्यक्षसे बाधा आती है और न अनुमान के भी बाधक होने की संभावना है ॥ ११ ॥

आगम और सर्वज्ञ की परम्परा—सर्वज्ञ से आगम की उत्पत्ति और आगम से सर्वज्ञ की उत्पत्ति इस प्रकार की यह निरन्तर परम्परा – बीज और अंकुर आदि के समान अनादि है । इसलिये अनवस्था मूलतत्त्वका नाश करनेवाली नहीं है और वह दूषण यहाँ लागू नहीं होता ॥ १२ ॥

सो ही कहा गया है–

१०*२) 1 P D पाषाणः. 2 स्वर्णम्. 3 शुक्तिजलं मुक्ताफलं भवति. D जलं मुक्ताफलं. 4 पृथ्वी 5 पदार्थाः । १०*३) 1 उत्पादध्रौव्यव्ययस्वरूपम्. D °स्वर्गावस्थिति ° स्वर्गे स्थितिः पुनः संहारो यथा केनापि न कृतं तथा आप्तश्रुतः । ११) 1 D पाषाणाः. 2 प्रत्यक्ष । १२) 1 D यत्र सर्वज्ञस्तत्र श्रुतं बीजवृक्षवत् ।

नियतं न बहुत्वं चेत्कथमेते तथाविधाः ।
तिथितारा[illegible]ग्रहाम्भोधिभूभृत्प्रभृतयो मताः ॥ १२*१

633) इत्यादिभिः प्रागपि सूचिताभिः सुयुक्तिभिर्देववरं[1] विविच्य[2] ।
तत्पाद[illegible]पद्मं भव्या[illegible]तरन्त्येव भवाम्बुराशिम् ॥ १३

634) अत्र व्यतिरेकोक्तम्–
ये ऽविचार्य परं देवं रुचिं तद्वाचि कुर्वते ।
ते ऽन्धास्तत्स्कन्ध[1][illegible] वाञ्छन्ति सद्गतिम्[2] ॥ १३*१

635) जीवानां हि क्वचित्क्षेत्रे यथा मन्दकषायता ।
तथा देष्टुर्विशुद्धत्वे[1] देशनायाः सुबुद्धता ॥ १४

636) वाणी साध्व्यप्यसाध्वी[1] स्यात्पात्रदोषेण[2] दुग्धवत् ।
उच्चैः सेवनमस्याः[3] स्यात्तीर्थप्राप्तं पयो यथा ॥ १५

यदि बहुतपना नियत नहीं होता तो ये तिथि, तारा, ग्रह, समुद्र और पर्वत आदि पदार्थ उस प्रकार के – बहुत – कैसे माने गये हैं ? इस से एकत्व के समान बहुत्व भी अवश्य सिद्ध है, यह निश्चित होता है ॥ १२*१॥

इन को आदि लेकर जो उत्तम युक्तियाँ पूर्व में भी निर्दिष्ट की जा चुकी हैं, उन से देवों में श्रेष्ठ आप्त का विवेचन – विचार – कर के जो भव्य उस के दोनों चरणकमलरूप नावका आश्रय लेते हैं, वे ही संसाररूप समुद्र को पार करते हैं । संसार के दुःखों से छूटकर मोक्ष सुख को प्राप्त करते हैं ॥ १३ ॥

यहाँ व्यतिरेक स्वरूप से कहा गया श्लोक—

जो उत्तम देव के विषय में विचार न करते हुए उसके वचन में रुचि (श्रद्धा) रखते हैं वे अन्धे अन्धे के (अथवा उस अविचारित देव के) कन्धे पर हाथ रख कर सद्गति की प्राप्ति की इच्छा करते हैं, जो सर्वथा असंभव है ॥१३*१॥

जैसे किसी विशिष्ट क्षेत्र में जीवों में मंद कषायता होती है वैसे ही उपदेशक की विशुद्धि से – उस के परिणामों के राग द्वेष व मिथ्यात्व से रहित होने से – उस के उपदेश में सुबुद्धता होती है ॥ १४ ॥

जिस प्रकार आश्रयभूत वर्तन के दोष से मधुर दूध विकृत हो जाता है, उसी प्रकार

---

१३) 1 P D सर्वज्ञम्. 2 विचारयित्वा । १३*१) 1 D अन्धस्य. 2 [illegible] । १४) 1 सम्यक्त्वनिर्मलत्वे । १५) 1 वाणी शुद्धापि कुमनुष्ये कुपात्रे स्थिता[illegible], यथा कुभाजने पतितं शुद्धं दुग्धं [illegible]. सा वाणी उच्चैः उच्चस्थानेषु पात्रेषु स्थिता पूज्या भवति तीर्थप्राप्त[illegible]. 2 D भवेत्. 3 D ° सेव नमस्या °, न [illegible] ।

637) आप्ता[1] अतीन्द्रियदृशो यदि नापि सन्ति
सन्त्येव संप्रति[2] तथापि हि तत्कल्पाः[3] ।
येषां परोक्षवरयुक्तिषु संविभान्ति[4]
प्रत्यक्षवत् [illegible] प्रतिबद्धभावाः[5] ॥ १६

638) तदुक्तम्–

भर्तारः कुलपर्वता इव भुवो मोहं विहाय स्वयं
रत्नानां निधयः पयोधय इव व्यावृत्तवित्तस्पृहाः ।
स्पृष्टाः कैरपि नो नभो विभुतया विश्वस्य [illegible][1]
सन्त्यद्यापि चिरन्तनान्तिकचराः सन्तः कियन्तोऽप्यमी ॥ १६*१

आश्रयभूत वक्ता के सदोष होने से समीचीन वाणी भी विकृत हो जाती है। तथा जिस प्रकार गंगा आदि तीर्थ को प्राप्त हुआ जल अतिशय सेवनीय होता है उसी प्रकार तीर्थंकर आदि सुयोग्य वक्ता के आश्रित हुई वह वाणी भी अतिशय आराधनीय हुआ करती है ॥ १५ ॥

यद्यपि इस समय अतीन्द्रिय वस्तुओं के जानने–देखने वाले आप्त नहीं भी हैं, तो भी उन के समान महापुरुष आज भी इस जगत् में विद्यमान हैं। जिनकी परोक्ष निर्दोष युक्तियों में त्रिकालवर्ती जीवादिक पदार्थ प्रत्यक्ष के समान झलकते हैं, अर्थात् अपनी निर्दोष युक्तियों से वे उत्पाद व्यय व ध्रौव्युक्त पदार्थों का ऐसा सुन्दर विवेचन करते हैं कि जिसको सुनकर हम लोग मानो उनको प्रत्यक्ष देख रहे हैं, ऐसा भास होने लगता है ॥ १६ ॥

वही कहा है–

जिस प्रकार कुलपर्वत मोह (स्वार्थ) से रहित हो कर पृथिवी को धारण करते हैं, उसी प्रकार जो मोह से रहित हो कर पृथिवी को धारण करते हैं– पृथिवीतलपर स्थित समस्त प्राणियों का उद्धार करते हैं। जिस प्रकार समुद्र असंख्य रत्नों के भण्डार होकर भी कभी उनकी इच्छा नहीं करते हैं उसी प्रकार जो सम्यग्दर्शनादिरूप रत्नों के आश्रय होकर भी धन की अभिलाषा कभी नहीं करते हैं। तथा जिस प्रकार व्यापक आकाश अनन्त पदार्थोंको आश्रय दे कर भी उनसे स्पृष्ट–संश्लिष्ट–नहीं होता है, उसी प्रकार जो व्यापक–महान्–होनेसे लोक के समस्त प्राणियों को आश्रय देते हुए भी उनसे स्पृष्ट–लिप्त–नहीं होते हैं। ऐसे कितने ही ये महापुरुष प्राचीन महर्षियों के अन्तिकचर–निकटवर्ती शिष्य– आज भी (वर्तमान काल में भी) विद्यमान हैं ॥ १६*१॥

---

१६) 1 केवल [illegible]: D °आप्ता अतीन्द्रिय°, तिष्ठतु. 2 अधुना. 3 [illegible] पदार्थाः, D हितकाम्यकाः. 4 शोभन्ते. 5 पदार्थाः । १६*१) 1 [illegible] ।

639) प्राज्ञः प्राप्तसमस्तशास्त्रहृदयः प्रव्यक्तलोकस्थितिः
प्रास्ताशः[1] प्रतिभापरः प्रशमवान् प्रागेव दृष्टोत्तरः ।
प्रायः प्रश्नसहः प्रभुः परमनोहारी परानिन्दया
ब्रूयाद्धर्मकथां गणी गुणनिधिः प्रस्पष्टमिष्टाक्षरः ॥ १६*२

640) मुख्योपचारविवृतस्वपराग्रहो य-
स्तीर्थं प्रवर्तयति निश्चयनीतिवेदी ।
शिष्याववोधनकृते व्यवहारदर्शी
भूतार्थबोधविधुरो[3] हि सर्वः समग्रः ॥ १७

641) यो वेत्ति वा दिशति वा व्यवहारमेव
तस्यास्ति देशनविधिर्न मतो नितान्तम्[1] ।
अज्ञातनिश्चयनयस्य स एव सत्यः
सिंहाविदः पृथुकं[2] एव यथास्ति सिंहः ॥ १८

अष्टाभिः प्रार्चना या सा पूजा पूज्यैर्निरुच्यते ॥ ६

1407) प्रमत्तादिगुणस्थानमुनिसंभावनाधिका ।
पात्रे ऽर्चिते नतिर्या तु स प्रणामो ऽभिधीयते ॥ ७

1408) यद्दुश्चिन्तापरित्यागाद्गुणानुष्ठानपूर्वकम् ।
पात्रदाने मनःस्वास्थ्यं सा मनःशुद्धिरुच्यते ॥ ८

1409) अयोग्यवचनत्यागात् समाश्रितमनोहरा ।
पात्रदाने प्रियोक्तिर्या सा वचःशुद्धिरिष्यते ॥ ९

जिसको पहले से ही स्वच्छ और सुशोभित कर रखा है तथा जो मनोरथ को पूर्ण करने वाला है ऐसे आसन पर पात्र को जो स्थापित करना इसे उच्चैःस्थान कहते हैं ॥ ४ ॥

जिनके चरण कमलों की पराग से भी यह पृथ्वी तीर्थ हो जाती है तथा जो जगत के भव्य जीवरूपी कमलों को प्रफुल्लित करने के लिये सूर्य के समान हैं उन मुनियों के दोनों चरणों का जो पापसमूह को नष्ट करनेवाला प्रक्षालन किया जाता है उसे पादोदक कहते हैं। वह पादोदक मेरी संसाराग्नि को– जन्म मरण के संताप को - शांत करें ॥ ५ ॥

उपर्युक्त विधि से स्थापित पात्र की मन्त्रोच्चारणपूर्वक जो जल – चन्दनादि आठ द्रव्यों से अर्चा की जाती है उसे पूज्य ऋषि महर्षियोंने पूजा कहा है ॥ ६ ॥

आठ द्रव्यों से पूजित पात्र के विषय में प्रमत्तादि गुणस्थानों की संभावना से अधिक आदर के साथ जो नमस्कार किया जाता है उसे प्रणाम कहा जाता है ॥ ७ ॥

दुष्ट चिन्तन – दुर्ध्यान – का त्याग कर के गुणों के आचरण के साथ पात्रदान में जो मनकी प्रसन्नता होती है वह मनःशुद्धि कही जाती है ॥ ८ ॥

पात्रदान के समय अयोग्य वचनों का त्याग कर के मनोहर अवस्था को प्राप्त जिस प्रिय भाषा का उपयोग किया जाता है उसका नाम वचनशुद्धि है ॥ ९ ॥

४) 1 येषाम् । ५) 1 P°तत्क्षालनम् ।

1410) यथादेशं यथाकालं पवित्रावयवांशुकः ।
यद्दत्ते संयमात्यागी कायशुद्धिर्मता तु सा ॥ १०

1411) यत्स्वकल्प्यमवगम्यते ऽगदं[1] नित्यकर्मपरिवर्धनोचितम् ।
सात्म्यकं यदृतुयोग्यमाहृतं[2] दातुरन्धसं[3] इयं विशुद्धता ॥ ११

1412) ऐहिकफलानपेक्षा[1] क्षान्तिर्निःकपटतानसूयत्वम् ।
अविषादित्वमुदित्वं[2] निरहंकारित्वमिति हि[3] दातृगुणाः ॥ ११*१

1413) द्वेषं तथा रागमसंयमं च मदं च दुःखं च भयादिकं च[1] ।
दत्ते न यद्द्रव्यमदः[2] प्रदेयं स्वाध्यायवृद्ध्यै तपसां समृद्ध्यै ॥ १२

1414) पात्रं त्रिभेदमुक्तं संयोगो मुक्तिकारणगुणानाम्[1] ।
सम्यग्दृष्टिर्विरतो विरताविरतस्तथाविरतः ॥ १३

देश और काल के अनुसार जिसके हाथ-पाँव आदि अवयव शुद्ध हैं, जिसने पवित्र वस्त्र को धारण किया है तथा जो अपने संयम को नहीं छोडता हुआ पात्र को दान देता है उसे कायशुद्धि समझना चाहिये ॥ १० ॥

जो अपने लिये कल्प्य हो – पात्र के लिये ग्राह्य हो, स्वास्थ्यप्रद प्रतीत होता हो, नित्य कर्म – सामायिक व स्वाध्याय आदि – के बढाने में समर्थ हो, सात्म्यक – प्रकृति के लिये अनुकूल हो और ऋतु के भी अनुकूल हो ऐसे आहार का जो प्रदान करना है यह दाता की अन्धोविशुद्धि– एषणाशुद्धि – है ॥ ११ ॥

(१) दान देते समय इस से मुझे धनधान्यादि की प्राप्ति हो ऐसी मन में ऐहिक फलकी इच्छा नहीं रखना (२) क्षमा भाव को धारण करना (३) कपट भाव को मन में स्थान न देना (४) दूसरों के दातृत्वादि गुणों को देखकर द्वेष न करना (५) आहार देते समय मन में खिन्नता का अनुभव न होना (६) मन का प्रसन्न होना (७) और मन में अभिमान का न होना ये दाता के सात गुण हैं ॥ ११*१ ॥

श्रावक मुनि को ऐसा आहार दे जिससे उनके मन में द्वेष, रागभाव, असंयम, गर्व दुःख और भयादिक उत्पन्न न हों तथा जिस से स्वाध्याय और तपों की वृद्धि हो ॥ १२ ॥

जिस के मुक्ति के कारणभूत सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्र गुणों का, संयोग है उसे पात्र कहते हैं। उसके तीन भेद हैं – विरत सम्यग्दृष्टि, विरताविरत और अविरत ॥ १३ ॥

---

११) 1 D नीरोगतां. 2D कथितं. 3 D आहारे। ११*१) 1 P°फलानपेक्ष्यम्. 2 PD°षादित्वं दत्ते. 3 P°मितीह दातृ°। १२) 1 PD भयादिकं वा. 2 एतत्। १३) 1 PD मुक्तिकारण°।

1415) हिंसायाः पर्यायो लोभो ऽत्र निरस्यते यतो दाने ।
तस्मादतिथिवितरणं[1] हिंसाव्युपरमणमेवेष्टम् ॥ १३*१

1416) गृहमागताय गुणिने मधुकरवृत्त्या परानपीडयते ।
वितरति यो नातिथये स कथं न हि लोभवान् भवति ॥ १३*२

1417) आत्मार्थमन्धः[1] प्रतिसाधितं यद्ददामि तद्भावितदान इत्थम् ।
पापैर्विकल्पै रहितो ऽप्यरत्या भवत्यहिंसः श्लथलोभ[2] एव ॥ १४

1418) कृत्यं त्रिलोक्यैहिक[1]मेव किंचित् किंचिच्च दानं परलोकबुद्ध्या ।
औचित्यमालोचयतां च किंचित् वित्तव्ययो ऽनेकविधः सतां हि ॥ १५

1419) प्रेत्य[1] प्रसाधनपरेषु समस्ति येषां न ह्यैहिकेष्विव धनेषु समा मनीषा ।
धर्म्याः क्रिया बहुविधाः सितकीर्तयो वा कृत्यानि वात्र शतधा कुत एव तेषाम् ॥ १६

लोभ यह हिंसा की ही अवस्था है – उसके ही अन्तर्गत है । इसका विनाश चूंकि दान देने से होता है, इसीलिये अतिथि को आहारादि दान देना हिंसा से विरत होना (अहिंसा व्रत) ही अभीष्ट है ॥ १३*१ ॥

जो श्रावक घरपर आकर भ्रमर के समान व्यापार से – जिस प्रकार भ्रमर किसी भी पुष्प को पीडा न देकर उनसे रस को ग्रहण कर लेना है उसी प्रकार – दूसरों (गृहस्थों) को पीडा न देकर आहार को ग्रहण करने वाले अतिथि – रत्नत्रय सम्पन्न मुनि – के लिये आहारादि नहीं देता है उसे लोभयुक्त कैसे न समझा जाय ? ॥ १३*२ ॥

अपने ही निमित्त से भोजन तैयार किया गया है उसे मैं निःस्पृह साधु के लिये देता हूँ । इस प्रकार से जो श्रावक उस दान के विषय में विचार कर रहा है वह चूंकि पापविचारों एवं द्वेष बुद्धि से रहित होता है अतएव लोभ को मन्द करने वाला वह हिंसा से रहित है ही ॥ १४ ॥

कुछ दान तो इस लोकसंबन्धी प्रयोजन को देखकर दिया जाता है, कुछ दान परभव की बुद्धि से दिया जाता है, और कुछ दान औचित्य का विचार करनेवाले सज्जनों को दिया जाता है । इस प्रकार सत्पुरुषों के धन का व्यय (तीन) प्रकार से हुआ करता है ॥ १५ ॥

जिस प्रकार मनुष्यों की बुद्धि इस लोकसंबन्धी प्रयोजन को सिद्ध करनेवाले धन के विषय में होती है, उस प्रकार जिनकी बुद्धि परलोक के साधने में समर्थ उस धन के विषय में

१३*१) 1 दानम्. 2 हिंसाविरमणं । १४) 1 P अन्नम्, D आहारम्. 2 D क्षीणलोभः । १५) 1 D इह लोकसंबन्धि । १६) 1D परत्र ।

1420) अभयाहारभैषज्यश्रुतभेदाच्चतुर्विधम् ।
दानं मनीषिभिः[1] प्रोक्तं शक्तिभक्तिसमाश्रयम् ॥१६*१

1421) अभीतितो[1] ऽनुत्तमरूपवत्त्वमाहारतो भोगविभूतिमत्त्वम् ।
भैषज्यतो रोगनिराकुलत्वं श्रुतादवश्यं श्रुतकेवलित्वम् ॥ १७

1422) सर्वेषामेव दानानां स्वरूपं च फलं तथा ।
प्रभावश्च मया प्रोक्तो व्रतान्निर्दिश्यते पुनः ॥ १८

1423) श्रद्धा तुष्टिर्भक्तिर्विज्ञानमलुब्धता क्षमा शक्तिः ।
यत्रैते सप्तगुणास्तं दातारं प्रशंसन्ति[1] ॥१८*१

पुनर्भङ्ग्यन्तरेण[1] तत्र तत्र विज्ञानलक्षणमेवोत्पाद्यते[2]-

1424) आत्मा परोपकरणप्रमुखैर्गुणौघै-
र्यत्पात्रदेयविषयैरधिवासनः स्यात् ।
आस्तिक्यमप्रतिहतं च तदन्ययोगै-
र्दानादिसेवनपरायणमानवस्य ॥ १९

नहीं होती है, उनके भला बहुत प्रकार की धर्मयुक्त क्रियाएँ, धवल कीर्ति और सैकडों अन्य सुंदर कार्य भी कहाँ से हो सकते हैं ? ॥ १६ ॥

वह दान बुद्धिमान् महर्षियों के द्वारा अभय, आहार, औषध और शास्त्र के भेद से चार प्रकार का निर्दिष्ट किया गया है। उसे श्रावकों को अपनी शक्ति और भक्ति के आश्रय से देना चाहिये ॥ १६*१ ॥

अभयदान से अतिशय उत्तम रूप की प्राप्ति है, आहार दान से भोग और धनवैभव प्राप्त होता है, औषधदान से रोग से रहित होने से निराकुल भाव प्राप्त होता है और श्रुतज्ञान से श्रुत के बलिपना अवश्य प्राप्त होता है ॥ १७ ॥

इस प्रकार से मैंने सब ही दानोंके स्वरूप, फल और प्रभाव को कह दिया है। अतिथि संविभागव्रत का निर्देश किया जाता है ॥ १८ ॥

श्रद्धा, संतोष, भक्ति, विज्ञान लोभ से रहितता क्षमा और शक्ति ये सात गुण जिस दाता में हैं, उस दाता की प्रशंसा की जाती है ॥१८*१ ॥

पुनः प्रकारान्तर से प्रत्येक गुण में विज्ञान लक्षणही उत्पन्न किया जाता है-

सत्पात्रदान आदि के आराधन में तत्पर रहनेवाले श्रावक का आत्मा पात्र और देय

१६*१) 1 विद्वद्भिः । १७) 1 अभयदानात् । १८*१) 1 D कथयन्ति । १९) 1 भेदान्तरेण. 2 P° उत्पद्यते ।

1425) सद्वेद्यमप्रतिहतं शुभनामगोत्रे[1,2]
तीर्थप्रवृत्तिचरितोचितधर्म एव ।
स्वर्गापवर्गसुखसिद्धिरपीति बुद्धिः
श्रद्धाभ्यधायि कविकल्पविमुक्तचित्ते ॥ २०

1426) व्याकोशवारिजविकासिविलोचने[1] यत्
पीयूषपानबहुलोद्धुषिताङ्गकं[2] च ।
आराध्यसद्गुणभरग्रहणानतिर्यत्
सा तुष्टिरित्यकथि पुण्यसुतोषपात्रम् ॥ २१

क्वचिद्भक्तिरिति पाठस्तत्रायं श्लोकः –

1427) लीये[1] किमत्र[2] नु[3] पिबामि विलोचनाभ्या-
मुत्तोषये[4] कथमथो शिरसा वहामि ।
आनन्त्यतो गुणगणस्य कथं स्तुवेऽहं
चित्ते वितृप्तिरिति भक्तिरवादि पूज्ये ॥ २१*१

द्रव्य विषयक जिन परोपकार आदि गुणों के समूहों से सुसंस्कृत होता है उनके अतिरिक्त अन्य गुणों के संबन्ध से उसके निर्बाध आस्तिक्य गुण रहता है ॥ १९ ॥

जिसका अन्तःकरण दुष्ट विकल्पों से रहित हो चुका है उसके तीर्थप्रवृत्ति व चारित्र के योग्य धर्म के होनेपर निर्बाध सातावेदनीय, तथा शुभ नाम व गोत्र कर्मों का बन्ध एवं स्वर्ग व अन्त में मुक्तिसुख को भी प्राप्ति होती है, इस प्रकार की जो दाता की बुद्धि हुआ करती है उसे श्रद्धा गुण कहा गया है ॥ २० ॥

प्रफुल्ल कमल के समान दोनों नेत्र, अमृत पान की अधिकतासे रोमांचयुक्त शरीर तथा आराधन के योग्य समीचीन गुणों के भारसे जो नम्रता–सत्पात्र के लिये आदर सूचक नमस्कार– होती है, यह तुष्टि नामका गुण है । यह गुण पुण्य और सन्तोष का स्थान है ॥२१॥

इस तुष्टि के स्थान में क्वचित् भक्ति पाठ पाया जाता है । वहाँ यह श्लोक है –

क्या मैं इस आराध्य, पवित्र पात्र के विषय में लीन हो जाऊँ अथवा क्या अपनी आँखोंसे इसे पीता रहूँ— देखता ही रहूँ ? मैं इसे किस प्रकार से संतुष्ट करूँ अथवा मैं इसे शिर से धारण करता हूँ । इस आराध्य में अनन्त गुणों का समूह होने से इसकी मैं कैसे स्तुति कर सकता हूँ ? इस तरह पूज्य पात्र के विषय में जो चित्त मे विशेष तृप्ति होती है, उसे भक्ति कहते हैं ॥२१*१॥

२०) 1 D सातावेदनी. 2 द्वे । २१) 1 विकसितकमलम्. 2 D रोमाञ्चित । २१*१) 1 किं लीनो भवामि, D लीनो भवामि. 2 पूज्ये. 3 D अहो, अथवा. 4 D तुष्टो भवामि ।

1428) यद्दीयते किमपि कालबलं विविच्य[1]
पात्रस्य च प्रकृतिमप्यवगम्य देशम् ।
रत्नत्रयस्य परिवृद्धिकरं च कल्प्यं
विज्ञानमेतदनुजज्ञु[2]रनिन्द्यबोधाः ॥ २२

1429) यत्केवलीसंस्तवमन्त्रविद्याममत्वबुद्ध्यादिफलानपेक्ष्यम् ।
वितीर्यते[1] शासनवर्धनार्थमलुब्धतां तां परिपूर्णयन्ति[2] ॥ २३

1430) पात्रे क्रोशति शिक्षार्थमज्ञानाद्वापि दुष्टवत् ।
चाटूक्तिगर्भशान्तोक्तिर्या क्षमा सा प्रशस्यते ॥ २४

1431) तूर्यांशो[1] वा षडंशो वा दशांशो वा निजार्थतः ।
दीयते या तु सा शक्तिर्वर्या[2] मध्या[3] कनीयसी[4] ॥ २५

1432) आत्मकष्टे ऽपि यत्तृप्तममृतैरिवमन्यते ।
पात्रोपकारतो दानं दातुः सत्त्वं तदुच्यते ॥ २६

काल के सामर्थ्य, पात्र की प्रकृति तथा देश के जलवायु का विचार कर रत्नत्रय की वृद्धि के करनेवाला जो कुछ योग्य (निर्दोष होने से ग्राह्य) आहार पात्र को दिया जाता है उसे- उस प्रकार के ज्ञान को - निर्दोष ज्ञानवाले (गणधरादि) विज्ञानगुण कहते हैं ॥ २२ ॥

'आप केवली हैं' ऐसी स्तुति, मंत्र, विद्या और धनादिक में ममत्वबुद्धि, इत्यादि फलों को मन में अपेक्षा न कर के केवल जिनशासन बढाने के लिये जो पात्रको दान दिया जाता है उसको अलुब्धता गुण कहते हैं । इसे दाता पूर्ण करते हैं ॥ २३ ॥

पात्र यदि शिक्षा देने के लिये अथवा अज्ञान से कुछ भी कटु शब्द बोलता है किंवा अविवेकी के समान कटु शब्द बोलने लगे तो आनन्द से नम्रतापूर्वक जो शांतियुक्त भाषण किया जाता है इसका नाम क्षमा है । उसकी सब ही प्रशंसा करते हैं ॥ २४ ॥

अपने धन में से - दैनिक आय में से -चतुर्थ, छठे अथवा दसवें भाग का जो सत्पात्र दानादि में सदुपयोग किया जाता है उसका नाम यथाक्रम से उत्कृष्ट, मध्यम और जघन्य शक्ति जानना चाहिये ॥ २५ ॥

पात्रदान से स्वयं को कष्ट के होनेपर भी उस से जो पात्र का उपकार होता है उससे दाता अपने को जो अमृत से तृप्त हुए के समान समझता है उसे सत्त्वगुण कहा जाता है ॥२६॥

---

२२) 1 विचार्य. 2 D गणधरदेवाः कथयामासुः, प्रकाशयन्ति स्म । २३) 1 दीयते. 2 दूरीकुर्वन्ति । २५) 1 चतुर्थभागः. 2 उत्तमा. 3 मध्यमा. 4 जघन्या ।

पुनर्भङ्ग्यन्तरेण–

1433) विवर्णकं नो विरसं न विद्धमसात्मकं[1] न प्रसूतं[2] प्रदेयम्[3] ।
गदावहं हर्म्यवतामकल्प्यं स्वयं मुनिभ्यश्च विशेषतस्तत् ॥ २७

1434) उच्छिष्टं नीचलोकार्ह[1]मन्योद्दिष्टं विगर्हितम् ।
न देयं दुर्जनस्पृष्टं देवयक्षादिकल्पितम् ॥ २७*१

1435) ग्रामान्तरात्समानीतं मन्त्रानीतमुपायनम्[1] ।
न देयमापणक्रीतं[2] विरुद्धं चायथर्तुकम्[3] ॥ २७*२

1436) दधिसर्पि[1]ःपयोभक्ष्यप्रायं पर्युषितं[2] मतम् ।
गन्धवर्णरसभ्रष्टमन्यत्सर्वं विनिन्दितम् ॥ २७*३

1437) बालग्लानतपःक्षीणवृद्धव्याधिसमन्वितान् ।
मुनीनुपचरेन्नित्यं यथा ते[1] स्युस्तपःक्षमाः ॥ २७*४

प्रकारान्तरसे पुनरपि विवेचन किया जाता है –

अतिशय पुराना होने से जिसका वर्ण विकृत हो गया है, रस परिवर्तित हो गया है, जो घुन गया है, असात्मक है – दुःख को उत्पन्न करनेवाला है, प्रसूत (विस्तृत) है, तथा जिसके भक्षण से रोग उत्पन्न होनेवाला है, ऐसा अन्न जब गृहस्थों के लिये योग्य नहीं है तब मुनियों के लिये तो वह सर्वथा ही योग्य नहीं है, ऐसा समझना चाहिये ॥ २७ ॥

जो अन्न जूठा हो, नीच लोगों के योग्य हो, अन्य के उद्देश से बनाया गया हो, निन्द्य हो, दुष्ट जनों से स्पृष्ट हो, तथा देव यक्षादिके लिये संकल्पित हो, ऐसे अन्न को मुनियों के लिये नहीं देना चाहिये ॥ २७*१ ॥

जो अन्नादि अन्य ग्रामसे लाया गया हो, मंत्र के द्वारा लाया गया हो, भेंट किया गया हो, बाजार से खरीदकर लाया गया हो, प्रकृति के विरुद्ध हो, और ऋतु के प्रतिकूल हो, ऐसे अन्नादि को मुनियों के लिये देना योग्य नहीं है ॥ २७*२ ॥

दही, घी, दूध से बनाया हुआ भक्ष्य पदार्थ पर्युषित – दूसरे दिन में भी प्रायः योग्य-माना गया है । इससे भिन्न जो भक्ष्य पदार्थ गंध, वर्ण और रस से चलित हो गया हो वह सब निंद्य – पात्रदान के लिये अयोग्य – माना गया है ॥२७*३ ॥

जो मुनिजन बाल, रोगी, तपसे कृश, वृद्ध तथा रोग से पीडित हैं, उनकी निरन्तर सेवा – वैयावृत्य – करना चाहिये, जिससे वे तपश्चरणके लिये समर्थ हो सकें ॥ २७*४ ॥

---

२७) 1 परकीयम्. 2 स्तोकम्. 3 PD °प्रमेयम्°, D न देयं. 4 गृहस्थानाम् । २७*१) 1 योग्यम् । २७*२) 1 वायणो. 2 हट्टादानीतम्. 3 अयोग्यऋतु, D ऋतुयोग्यं अ । २७*३) 1 घृत. 2 सेवनीयम् । २७*४) 1 मुनयः ।

1438) शाठ्यं च गर्वं च जलप्लुतत्वमवज्ञतां वाक्परुषत्वमन्यत् ।
असंयमं वर्जयताद्विशेषाद्भुक्तिक्षणे ऽक्षुण्णतया मुनीनाम् ॥ २८

1439) असंमताभक्तकदर्यमर्त्यकारुण्यदैन्यातिशयान्वितानाम् ।
एषां निवासेषु हि साधुवर्गः परानुकम्पाहितधीर्न भुङ्क्ते ॥ २९

1440) उक्तं च—

नाहरन्ति महासत्त्वाश्चित्तेनाप्यनुकम्पनाः ।
किं तु ते दैन्यकारुण्यसंकल्पोज्झितवृत्तयः ॥ २९*१

1441) स्वामिधर्मसमुपासनस्थितौ पुत्रजन्मनि सचेतनो भवन् ।
दैवकार्यवशतो ऽन्यदा सदा संदिशेत्कथमिवापरं जनम् ॥ ३०

1442) आत्मवित्तपरित्यागात्परैर्धर्मविधापने ।
निःसंदेहमवाप्नोति परभोगाय तत्फलम् ॥ ३०*१

कपट, गर्व, चंचलपना, तिरस्कार, कठोर भाषण, असंयम तथा अन्य अयोग्य प्रवृत्ति, इन सबका सदाही त्याग करना चाहिये । विशेषतया मुनियों के भोजन के समय में तो उनको पूर्णतया श्रावक को छोड देना चाहिये ॥ २८ ॥

दूसरों की दया में दत्तचित्त साधुसमूह असंमत – जातीय बन्धुओं के द्वारा बहिष्कृत-भक्ति से रहित, कृपण मनुष्य, तथा दया व दीनता की अधिकता को प्रकट करनेवाले मनुष्यों के निवासस्थान में भोजन नहीं किया करता है ॥ २९ ॥

कहा भी है –

दयालु पराक्रमी, साधु पूर्वोक्त मनुष्यों के घर पर मन से भी आहार नहीं करते हैं। (आहार ग्रहण करना तो दूर रहा, किन्तु वे उसका विचार भी नहीं करते हैं) । फिर भी उनकी प्रवृत्ति दीनता, दया और संकल्प से रहित होती है ॥ २९*१ ॥

मनुष्य सचेतन – बुद्धिमान् – होकर स्वामिसेवा, धर्माराधना और पुत्रोत्पत्ति में दैव और कार्य की परवशता को छोडकर अन्य समय में सदा इतर मनुष्य को कैसे संदेश दे सकता है ? (अर्थात् कोई भी बुद्धिमान् मनुष्य ऐसा नहीं करेगा) (?) ॥ ३० ॥

अपने धन के व्यय से दूसरों से धर्म कराने पर मनुष्य निश्चित ही दूसरों के भोग के लिये उसके फल को प्राप्त करता है ॥ ३०*१ ॥

२८) 1 स्नानम् । २९) 1 D पंचप्रवाणरहित. 2 D कृपणता । २९*१) 1 D °कम्पताः । ३०*१) 1 D °आत्मचित्त ।

1443) औचित्यतः करुणयामलकीर्तितो वा
सर्वत्र वर्षति पयोदवदत्र दाता ।
कैर्नार्थ्यते ऽर्थिनिवहैर्ह्रियते तथाप्य--
मीषां सुदर्शनमुपोन्नमयन्[1] प्रदद्यात् ॥ ३१

1444) यागज्ञनास्तिकजटिक्षणवादिमुख्य–
पाखण्डिनां समयसत्करणैकवासे ।
सद्दर्शनं मलिनतामुपयात्यवश्यं
क्षीरं यथा कटुकतुम्बकभाजनस्थम् ॥ ३२

1445) अज्ञाततत्त्वचेतोभिर्दुराग्रहमलीमसैः ।
युद्धमेव भवेद्गोष्ठ्यां दण्डादण्डि कचाकचि[1] ॥ ३२*१

1446) भयलोभोपरोधैस्तु कुलिङ्गिषु निषेवणे ।
अवश्यं दर्शनं म्लायेन्नीचैराचरणे सति ॥ ३२*२

जो दाता उचित समझकर, दया से प्रेरित हो कर अथवा निर्मल कीर्ति की इच्छा से भी यहाँ मेघ के समान सर्वत्र बरसता है – सब ही अर्थीजनों को दान देता है – उससे कौन से अर्थीजनों के समूह प्रार्थना नहीं करते हैं तथा वह किनके द्वारा नहीं हरण किया जाता है ? (अर्थात् सब ही जन याचना करते हुए उसके चित्त को अपनी ओर खींचते हैं) । तो भी उसे उन सबके लिये निर्मल सम्यग्दर्शन को उन्नति के लिये ही देना चाहिये ॥ ३१ ॥

यज्ञ के ज्ञाता नास्तिक – चार्वाक, क्षणवादी बौद्ध साधु – इत्यादि पाखण्डियों के आगम का आदर करना तथा उनके साथ रहने से कडुवी तूमडीके पात्र में रखे हुए दूधके समान सम्यग्दर्शन अवश्य मलिनता को प्राप्त होता है ॥ ३२ ॥

जिनका चित्त तत्त्वज्ञानसे शून्य है तथा जो दुराग्रह से -- एकान्त मिथ्यात्वसे – मलिन हो रहे हैं, उनके साथ गोष्ठी – वार्तालाप आदि – करने से परस्पर लाठियों से और बाल पकड कर युद्ध का ही प्रसंग उत्पन्न होता है ॥ ३२*१ ॥

भय, लोभ और लोकाग्रह से कुलिंगियों की – अन्य धर्मके साधुओं की – उपासना करने पर तथा नीच आचरण – व्यवहार – करने पर सम्यग्दर्शन अवश्य ही मलिन होता है ॥ ३२*२ ॥

---

३१) 1 P °पान्नमयन् D उन्नतिनिमित्ते । ३२*१) 1 केशाकेशि ।

1447) बुद्धिपौरुषयुक्तेषु दैवायत्तविभूतिषु ।
नृषु कुत्सितसेवायां दैन्यमेवातिरिच्यते ॥ ३२*३

1448) तपो ऽनुष्ठानसच्छास्त्रविशेषाध्ययनक्रमात् ।
मानवः संमतं पात्रं समयस्थो ऽप्यनेकधा ॥ ३३

1449) गृहस्थो वा यतिर्वापि जैनं समयमास्थितः ।
यथाकालमनुप्राप्तः पूजनीयः सुदृष्टिभिः ॥३३*१

1450) ज्योतिर्मन्त्रनिमित्तज्ञः सुप्राज्ञः कार्यकर्मसु ।
मान्यः समयिभिः[1] सम्यक् परोक्षार्थसमर्थकः[2] ॥ ३३*२

1451) दीक्षायात्राप्रतिष्ठाद्याः क्रियास्तद्विरहे[1] कुतः ।
तदर्थं[2] परपृच्छायां कथं च समयोन्नतिः ॥ ३३*३

जो बुद्धि और पुरुषार्थ से संयुक्त है तथा जिन के दैवाधीन वैभव है ऐसे मनुष्यों के विषय में घृणित सेवा करने पर दीनता ही शेष रहती है या अधिकता को प्राप्त होती है॥३२*३॥

जो मनुष्य तपश्चरण और समीचीन शास्त्रविशेषों के अध्ययन के क्रम से आगम के आश्रित है वह पात्र माना गया है जो अनेक प्रकार का है ॥ ३३ ॥

जो जैन धर्म का धारक है वह चाहे गृहस्थ हो अथवा मुनि हो, समयानुसार उसके प्राप्त होनेपर सम्यग्दृष्टियों को उसकी पूजा करनी चाहिये । ३३*१ ॥

जो ज्योतिःशास्त्र, मंत्रशास्त्र, और निमित्तशास्त्र का ज्ञाता है, करने योग्य कार्यों में अतिशय चतुर है तथा परोक्ष पदार्थों का समर्थक है – उनके विषय में आस्था रखता है — उसका श्रावकों को भली भाँति सन्मान करना चाहिये ॥ ३३*२ ॥

उपर्युक्त ज्योतिषशास्त्र आदिके मर्मज्ञोंका यदि सन्मान नहीं किया जायेगा तो प्रायः उनका अस्तित्व ही असंभव हो जायेगा । और जब उनका अस्तित्व ही न रहेगा तब उनके विना (जिनदीक्षा, तीर्थयात्रा और प्रतिष्ठा आदि जैसे) शुभकार्य कैसे संपन्न हो सकेंगे ? यदि कदाचित् अन्य मतानुयायी ज्योतिषशास्त्रादि के ज्ञाताओं से उनके संबन्ध में पूछा जाय तो वैसी अवस्था में जैनधर्म की उन्नति कैसे हो सकती है ? (अतएव जैनशासन भक्तों को उनका सन्मान करना ही चाहिये) ॥ ३३*३ ॥

३३*२) 1 श्रावकैः. 2 यैर्जैनदर्शनमाश्रितं ते ज्योतिरिव बोभिः पूज्याः परोक्षार्थदर्शनात् ।
३३*३) 1 ज्योतिःशास्त्रं विना. 2 दीक्षायात्रार्थम् ।

1452) मूलोत्तरगुणैः श्लाघ्यैस्तपोभिर्निष्ठितस्थितिः ।
साधुः साधु भवेत्पूज्यः पुण्योपार्जनपण्डितैः ॥ ३३*४

1453) ज्ञानकाण्डे क्रियाकाण्डे चातुर्वर्ण्यपुरस्सरः ।
सूरिर्देव इवाराध्यः संसाराब्धितरण्डकः ॥ ३३*५

1454) लोकवित्त्वकवित्वाद्यैर्वादिवाग्मित्वकौशलैः ।
मार्गप्रभावनोद्युक्ताः सन्तः पूज्या विशेषतः ॥ ३३*६

1455) उक्तं च–
भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥ ३३*७

1456) शिल्पिकारुकवाक्पण्यसंफलीपतितादिषु ।
देहस्थितिं न कुर्वीत लिङ्गिलिङ्गोपजीविषु ॥ ३३*८

जो गृहस्थ पुण्य के उपार्जन में दक्ष हैं – उसका संचय करना चाहते हैं – उन्हें प्रशंसनीय मूलगुणों और उत्तर गुणों से संपन्न तथा अनशनादि तपों के द्वारा अपनी स्थिति को स्थिर करनेवाले साधु की भलीभाँति पूजा करनी चाहिये ॥ ३३*४ ॥

जो आचार्य ज्ञानकाण्ड और क्रियाकाण्ड में दक्ष हो कर चातुर्वर्ण्य संघका – मुनि, आर्यिका, श्रावक और श्राविका समूह का– अग्रणी होता हुआ संसार समुद्र से पार उतारने के लिये दृढ नौका के समान है उसकी देव के समान आराधना करनी चाहिये ॥ ३३*५ ॥

जो सत्पुरुष लोकव्यवहार में निपुण होकर प्रतिभापूर्ण कविता आदि के द्वारा तथा वाद – शास्त्रार्थ – एवं प्रशस्त वक्तृत्व में प्राप्त कुशलता के द्वारा मोक्षमार्ग की प्रभावना में प्रयत्नशील रहते हैं, उनकी विशेष रूप से पूजा करनी चाहिये ॥ ३३*६ ॥

कहा भी है –

भोज्य वस्तु और भोजन की शक्ति, विषयोपभोग की शक्ति और उत्तम स्त्रियाँ तथा ऐश्वर्य व दान देने की शक्ति, यह सब अल्प पुण्यका फल नहीं है। (अर्थात् उपर्युक्त सामर्थ्य और भोज्य आदि की प्राप्ति महातप से ही होती है) ॥३३*७॥

चित्रकारादि कारुकवाक् – सुनार व बढई आदिक, पण्यसंफली – वेश्या और पतित – जातिभ्रष्ट – आदिकों के यहाँ तथा अन्य लिंगियों व लिंग को – साधु के वेष को –

३३*६) 1 पाण्डित्यविशेष. 2 D चतुरता। ३३*८) 1 D लुहारचर्मकारादयो ये तेषां गृहे आहार न योग्य. 2 संफली दुश्चारिणी।

1457) दीक्षायोग्यास्त्रयो वर्णाश्चत्वारश्च विधोचिताः
मनोवाक्कायधर्माय मताः सर्वे ऽपि[1] जन्तवः ॥ ३३*९
1458) पुष्पादिरशनादिर्वा न स्वयं धर्म एव हि ।
क्षित्यादिरिव धान्यस्य किंतु भावस्य कारणम् ॥३३*१०
1459) श्रद्धा समुत्कर्षि मनो जनानां यद्यप्रकम्पं सकृदेव जातम् ।
फलं प्रसूते[1] ऽनुपमप्रभावं लोहानि विद्धानि रसेन यद्वत् ॥ ३४
1460) तपोदानार्चनाहीनं मनः सदपि देहिनाम् ।
तत्फलप्राप्तये न स्यात्कुसूल[1]स्थित[2]बीजवत् ॥ ३५
1461) आवेशिक[1]ज्ञातिषु संस्थितेषु दीनानुकम्पेषु यथायथं तु ।
देशोचितं कालबलानुरूपं दद्याच्च किंचित्स्वयमेव बुद्ध्वा ॥ ३६

धारण कर के आजीविका करनेवालों के यहाँ मुनियों को आहार ग्रहण नहीं करना चाहिये ॥ ३३*८ ॥

ब्राह्मण, क्षत्रिय और वैश्य इन वर्णवाले मनुष्य जिनदीक्षा ग्रहण करने के योग्य हैं। चार वर्ण आहार ग्रहण करने के योग्य हैं। परन्तु आहार देने के योग्य चारों ही वर्णवाले है तथा मन, वचन और शरीर के द्वारा धर्म धारण करने की योग्यता सब ही प्राणी – पशु-पक्षी आदि भी रखते हैं ॥ ३३*९ ॥

जिस प्रकार भूमि आदि स्वयं धान्य नहीं है, किन्तु उसकी कारण है, इसी प्रकार पुष्प आदि-पूजा सामग्री –और भोजन आदि – भक्ष्याभक्ष्य आदि पदार्थ – स्वयं तो धर्म नहीं हैं, किन्तु भाव के – परिणामविशुद्धिस्वरूप धर्म के कारण है ॥ ३३*१० ॥

मनुष्यों का श्रद्धा से उत्कर्ष को प्राप्त हुआ मन यदि एक बार भी निश्चल होता है तो वह असाधारण प्रभाववाले फल को इस प्रकार उत्पन्न करता है जिस प्रकार कि पारद रस से विद्ध हुओ लोहधातुएँ अनुपम प्रभाववाले फल को – सुवर्णरूपता को उत्पन्न करती हैं ॥ ३४॥

जिस प्रकार कुशूल – कुठिया में – रखा हुआ बीज – गेहूँ आदिके कण–फल–प्राप्ति के लिये – नवीन धान्य को उत्पन्न करनेवाले – नहीं होते हैं, किन्तु जब उन्हें योग्य भूमि में बोया जाता है तथा जल से सिंचन आदि किया जाता है तब ही वे उपर्युक्त फल के देने में समर्थ होते हैं, ठीक उसी प्रकारसे तप, दान और पूजा आदि शुभ अनुष्ठान के विचार से रहित प्राणियोंका मन विद्यमान होता हुआ भी उस फलप्राप्ति के लिये – स्वर्ग मोक्षरूप फल के प्राप्त कराने में समर्थ नहीं होता है ॥ ३५ ॥

आवेशिक–अभ्यागत, सजातीय बन्धुजन, संस्थित–सम्यक् अवस्थित या आश्रित

---

३४) 1 उत्पादयति । ३५) 1 कोष्ठागार. 2 D स्थिति । ३६) 1 संततिरूप ।

1462) काले कलौ संततचञ्चले च चित्ते सदाहारमये च काये।
चित्रं यदद्यापि जिनेन्द्ररूपधरा नरा दृष्टिपथं प्रयान्ति ॥ ३७

1463) अतो यथा केवलनायकानां लेपादिक्लृप्तं प्रतिबिम्बमर्च्यम् ।
तथैव पूर्वप्रतिबिम्बवाहाः[1] संप्रत्युपार्च्या[2] यतयः सुधीभिः ॥ ३८

1464) पात्रे दत्तं भवेत्सर्वं पुण्याय गृहमेधिनाम् ।
शुक्तावेव हि मेघानां जलं मुक्ताफलं भवेत् ॥३८*१

1465) यत्र रत्नत्रयं नास्ति तदपात्रं प्रकीर्तितम् ।
उप्तं तत्र वृथा सर्वमूषरायां क्षिताविव ॥ ३८*२

1466) मिथ्यात्ववासितमनस्सु तथा चरित्रा-
भास[1]प्रचारिषु कुदर्शिनिषु प्रदानम् ।
प्रायो ह्यनर्थजननप्रतिघातहेतु[2]
क्षीरप्रपाणमिव विद्वयनिलाशनेषु[3] ॥ ३९

जन, दीन और दया के पात्र; इन के लिये यथायोग्य देश, काल और शक्ति के अनुसार स्वयं ही जानकर कुछ देना चाहिये ॥३६॥

इस कलिकाल में चित्त के निरन्तर चंचल, तथा शरीर के सदा भोजनाश्रित होने पर भी यही आश्चर्य है कि आज भी जिनरूप के धारक मनुष्य-दिगम्बर साधु-दृष्टिगोचर होते हैं ॥३७॥

इसीलिये जिस प्रकार केवलज्ञानादिक गुणों के स्वामी जिनेश्वरों की पाषाणादि से निर्मित प्रतिमा की पूजा की जाती है उसी प्रकार से पूर्वकाल के मुनियों के प्रतिबिम्ब के धारक पूर्व महर्षियों को प्रतिमारूप से कल्पित-वर्तमान मुनियों की भी विद्वानों को पूजा करनी चाहिये ॥३८॥

पात्र में दिया हुआ आहार-औषधादिक सब गृहस्थों के पुण्य का कारण होता है। सो ठीक भी है, क्यों कि, सीपमें पडा हुआ मेघों का पानी मोती हो जाता है ॥३८*१॥

जिस मनुष्य में रत्नत्रय नहीं है उसे अपात्र कहते हैं। उस में बोया हुआ- दिया गया आहारादिक-क्षारभूमिमें बोये हुए बीज के समान व्यर्थ होता है ॥३८*२॥

जैसे सर्पों को पिलाया गया दूध प्रायः अनर्थ को उत्पन्न करनेवाला और जीवित के नाश का कारण होता है वैसे ही जिनके मन में मिथ्यात्व का वास है तथा जो चारित्राभास-

---

३८) 1 यतिवेषधारकाः. 2 पूज्याः । ३९) 1 D आकृतिरूपं चारित्रं नास्ति. 2 P°प्रतिघातिहेतु-क्षीर. 3 सर्पेषु ।

1467) कारुण्यादथवौचित्यात्तेषां किंचिद्दिशन्नपि ।
दिशेदुद्वृतमेवान्नं गृहे भुक्ति न कारयेत् ॥ ३९*१

1468) ज्ञानं तपोहीनमपि प्रपूज्यं ज्ञानप्रहीनं सुतपोऽपि पूज्यम् ।
यत्र द्वयं देववदेष पूज्यो द्वयेन हीनो गणपूरणः स्यात् ॥ ४०

1469) अर्हद्रूपे नमोऽस्तु स्याद्विरत्या[1] विनयक्रिया ।
अन्योन्यं क्षुल्लके चाहमिच्छाकारवचः सदा ॥ ४०*१

1470) अनेकधारम्भविजृम्भितानां वित्तव्ययो हर्म्यवतामगण्यः ।
तद्भुक्तिमात्राहृतये[1] न योग्या विचारणा लिङ्गिषु तीर्थहन्त्री[2] ॥ ४१

1471) दैवायत्तां धनलवभवां प्राप्य भूतिं गृहस्था
वप्तव्यो[1]ऽसो[2] जिनपसमयाध्यासितमाणिभूमौ[3] ।
साधुः शुद्धव्रतगुणगणः सूत्रमार्गानुसारी
चक्रा लक्षे[4] क्षपितकलिलो लभ्यते वा न वेति ॥ ४२

मिथ्याचारित्र–के प्रचारक है, ऐसे मिथ्यादृष्टि जनों के लिये दिया गया आहारादि अनर्थ का कारण होता है ऐसा समझना चाहिये ॥ ३९ ॥

दयाभाव से अथवा उचित समझकर यदि उन को कुछ(आहारादिक)देता भी है तो शेष रहे आहार को ही देवे । परन्तु अपने घर पर उन्हे भोजन नहीं कराना चाहिये ॥ ३९*१

तप से रहित भी ज्ञान पूज्य है और ज्ञान से रहित उत्तम तप भी पूज्य है । जिसमें उत्तम ज्ञान और तप दोनों हैं वह तो देव के समान पूज्य है । तथा जो ज्ञान और तप दोनों से हीन है वह गणपूरक है (अर्थात् केवल वह संख्या को पूर्ण करनेवाला है) ॥ ४० ॥

जिनलिंग का रूप धारण करनेवाले मुनि के लिये 'नमोऽस्तु' कहना चाहिये । आर्यिका को विनयक्रिया करनी चाहिये अर्थात 'वन्दे' ऐसा कहना चाहिये । क्षुल्लक को परस्पर योग्य इच्छाका वचन कहना चाहिये, अर्थात् 'इच्छामि' ऐसा कहकर आदर करना चाहिये ॥ ४०*१॥

जिन गृहस्थों के लिये अनेकों आरंभ करने पडते हैं उन के धन का अगण्य – गणनासे रहित–व्यय होता है । इसलिये जिनलिंगधारियों के लिये आहार देने में उस का विचार करना योग्य नहीं है, प्रत्युत वह धर्म का विघातक होता है ॥ ४१ ॥

हे गृहस्थों! तुम्हें सौभाग्यवश लेशमात्र धन से प्रादुर्भूत हुई जो संपत्ति प्राप्त हुई है

४०*१) 1 आर्यायाः । ४१) 1 दानाय. 2 विचारणा त्रिलिङ्गिषु तीर्थहन्त्री भवति । ४२) 1 वपनीया. 2 असौ विभूतिः. 3 पात्रभूमौ. 4 लक्षमध्ये ।

1472) उच्चावचःप्राणिविगुम्फितो[1] ऽयं जिनेश्वराणां समयः सदेति ।
स्तम्भे यथैकत्र[2] निशान्तमेवं[3] नैकत्र तिष्ठेत्पुरुषो ऽभ्युपार्चन्[4] ॥ ४३
1473) नामतः स्थापनाद्रव्यभावन्यासैश्चतुर्विधाः ।
भवन्ति मुनयः सर्वे दानपूजादिकर्मसु ॥ ४३*१
1474) उत्तरोत्तरभावेन विधिस्तेषु विशिष्यते[1] ।
पुण्यार्जने गृहस्थानां जिनप्रतिकृतिष्विव ॥ ४३*२
1475) अतद्गुणेषु भावेषु व्यवहारप्रसिद्धये ।
यत्संज्ञाकरणं नाम नरेच्छावशवर्तनात् ॥ ४३*३

उसे जिनेन्द्र मत के आश्रित हुए प्राणिरूप भूमि में बोना चाहिये (उन्हें यथायोग्य आहारादि देकर उसका सदुपयोग करना चाहिये)। कारण यह कि पवित्र ज्ञान व गुणसमूह से विभूषित होकर आगमोक्त मार्ग का अनुसरण करनेवाला सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्र-स्वरूप मोक्षमार्ग में निरत—साधु लाखों में एक आध ही कोई प्राप्त होता है। तथा पाप-मल को नष्ट करनेवाला साधु तो कदाचित् ही प्राप्त होता है अथवा नहीं भी प्राप्त हो सके ॥ ४२ ॥

यह जिनेश्वरों का धर्म ऊँच और नीच दोनों ही प्रकार के प्राणियों से सदा ग्रथित है। कारण यह कि जिस प्रकार गृह कभी एक खम्भे के ऊपर नहीं रह सकता उसी प्रकार जिन-मत भी कभी एक पुरुष के ऊपर ऊँचमात्र के आश्रित नहीं रह सकता है, (ऐसा समझकर श्रावक को एक ही उत्तम साधु का आदर न कर के सब ही तपस्वियों का आदर करना चाहिये) ॥४३

नाम, स्थापना, द्रव्य और भाव निक्षेपों से सब मुनि चार प्रकार के हैं,जो दान—पूजा आदि कार्यों में तत्पर होते हैं ॥ ४३*१ ॥

जिनप्रतिमाओं के समान उपर्युक्त चार प्रकार के मुनियों के विषयमें की गई विधि गृहस्थों के पुण्योपार्जन में उत्तरोत्तर विशेषता को प्राप्त होती है। (अभिप्राय यह है कि जिस प्रकार नाम, स्थापना, द्रव्य और भाव के भेद से चार प्रकार के जिनों के विषय में की गई भक्ति उत्तरोत्तर—नामकी अपेक्षा स्थापना और स्थापना की अपेक्षा द्रव्य आदि के क्रम से—अधिकाधिक पुण्यसंचय का कारण होती है उसी प्रकार उपर्युक्त चार प्रकार के मुनियों के लिये यथायोग्य विधिपूर्वक दिया गया आहारादि भी उत्तरोत्तर गृहस्थों के अधिकाधिक पुण्य-संचय का कारण होता है) ॥ ४३*२ ॥

व्यवहारकार्य को सिद्ध करने के लिये मनुष्य की इच्छा के अनुसार जिन पदार्थों में जो गुण विद्यमान नहीं हैं तदनुरूप भी जो उन का नाम रखा जाता है, उसे नामनिक्षेप जानना चाहिये ॥ ४३*३ ॥

---

४३) 1 उत्तममध्यमजघन्यपात्रविशेषः. 2 एकस्मिन्. 3 गृहम्, D गृहम् अतद्गुणेषु भावेषु. 4 ददत् ।
४३*२) 1 पृथक् क्रियते ।

1476) साकारे वा निराकारे काष्ठादौ यन्निवेशनम् ।
सोऽयमित्यवधानेन[1] स्थापना सा निगद्यते ॥ ४३*४

1477) आगामिगुणयोग्यो ऽर्थो[1] द्रव्यं न्यासस्य गोचरः ।
तत्कालपर्याया[2]क्रान्तं वस्तु भावो ऽभिधीयते ॥ ४३*५

1478) यत्रातिथेयं स्वयमेव साक्षाज्ज्ञानादयो यत्र गुणाः प्रकाशाः ।
पात्राद्यवेक्षापरता च यत्र तत्सात्त्विकं दानमुदाहरन्ति ॥ ४४

1479) निजस्त-[illegible]लसैर[1]लससादरैः सान्तरं[2]
यशोलवसमाकुलैः कलितलोकसंप्रत्ययम् ।
सगर्वमविभावितातिथिगुणं च यद्दीयते
विहायित[3]मितीरितं मतिमतां मते राजसम्[4] ॥ ४५

1480) पात्रापात्रविचारणाविरहितं दूरादपास्तादरं[1]
भार्यासूनुनियोगिभिर्विरचितं चित्तादिशुद्धिच्युतम् ।
मात्सर्योपहतं विवेकविकलं यत्किंचनार्हे[2] ऽपि च
एतत्तामसमामनन्ति[3] मुनयो दानं गतप्रार्चनम्[4] ॥ ४६

तदाकार अथवा अतदाकार भी लकडी व पाषाण आदिमें जो 'वह यह है' ऐसा अवधानपूर्वक आरोप किया जाता है उसे स्थापनानिक्षेप कहते हैं ॥ ४३*४ ॥

आगामी गुणोत्पत्ति के योग्य पदार्थ को द्रव्यनिक्षेप का विषय जानना चाहिये । तथा वर्तमानकालीन पर्याय से युक्त वस्तु को भावनिक्षेप समझना चाहिये ॥ ४३*५ ॥

जिस दान में अतिथि का साक्षात् स्वयं आदर किया जाता है, जिस में दाता के आवश्यक श्रद्धा तुष्टि आदि गुण प्रकाशमान होते हैं, तथा जिस में पात्र व देय पदार्थ आदि के विचार की तत्परता के साथ पात्र की मार्गप्रतीक्षा की जाती है, उसे सात्त्विक दान कहते हैं ॥

अपनी स्तुति सुनने के अभिलाषी जो दाता आलस्य के साथ आदरयुक्त होकर कीर्ति की कामना से आतुर होते हुए गर्वपूर्वक अतिथि के लोगों को प्रत्यय उत्पन्न कराने के लिये जो दान देते हैं, उसे विद्वन्मान्य गणधरादि राजस दान कहते हैं ॥ ४५ ॥

पात्र-अपात्र के विचार से रहित, आदर से पूर्णतया निरपेक्ष, मन व वचनादि की विशुद्धि से विहीन, मात्सर्य भावसे सहित और विवेक से विरहित जो कुछ थोडासा दान पत्नी

४३*४) 1 अवधारणात्, D नामात् गुणा भवन्ति । ४३*५) 1 PD °योगार्थो द्रव्यं. 2 PD °पर्ययक्रान्तं वस्तु, D विद्यमानद्रव्यगुणाः । ४५) 1 निजश्लाघ्यवाञ्छकैः. 2 कदाचित् 3 दानम. 4 राजसं दानम् । ४६) 1 आदररहितम्. 2 योग्यपात्रे. 3 कथयन्ति. 4 श्लाघारहितम् ।

1481) उत्तमं सात्त्विकं दानं राजसं मध्यमं मतम् ।
सर्वेषामेव दानानां हीनं तामसमुच्यते ॥ ४७

1482) दत्तं परत्रैव फलत्यवश्यं नैकान्तिकं हन्त वचो यतो ऽमूः ।
गावः प्रयच्छन्ति न किं पयांसि[1] तृणानि तोयान्यपि संप्रभुज्य[2] ॥ ४८

1483) ये भक्तिभारविनताः किल शाकपिण्डं
संकल्पयन्ति समयानुगुणं[1] मुनिभ्यः ।
ते ऽगण्यपुण्यगुणसंततिसंनिवासा-
श्चिन्तामणिर्निगदिताविचला हि भक्तिः ॥ ४९

1484) अभिमानस्य रक्षार्थं विनयायागमस्य च ।
भोजनादिविधानेषु मौनमूचुर्मुनीश्वराः ॥ ४९*१

1485) लौल्यत्यागस्तपोवृद्धिः समभावनिदर्शनम् ।
ततश्च समवाप्नोति मनःसिद्धिं जगत्त्रये ॥ ४९*२

व पुत्र आदि के द्वारा पूजा के विना योग्य पात्र के लिये भी दिलाया जाता है उसे मुनिजन तामस दान मानते हैं ॥ ४६ ॥

इन सभी दानों में सात्त्विक दान उत्तम और राजस दान मध्यम माना गया है। तामस दानको सर्वत्र हीन ही कहा जाता है ॥ ४७ ॥

दिये हुए दान का फल परलोक में ही प्राप्त होना है, ऐसा जो मानते हैं; खेद है कि उनका वैसा कहना एकान्तरूप से योग्य नहीं है क्योंकि, गायें प्रत्यक्ष में घास और पानीका उपभोग कर के क्या दूध नहीं देती हैं ? अभिप्राय यह है कि जिस प्रकार गायें इसी भव में दूध रूप फलको देती हैं, उसी प्रकार दान का फल इहलोक में भी मिलता है ॥ ४८ ॥

जो भक्ति के बोझ से अतिशय झुककर– विनम्र हो कर– मुनियों के लिये आगमोक्त विधि के अनुसार शाक के भी आहार को देते हैं वे अपरिमित पवित्र गुणसमूह के निवास-स्थान–उससे संपन्न– होते हैं । सो ठीक भी है, क्यों कि, स्थिर भक्ति चिन्तामणि के समान अभीष्ट की देनेवाली होती है ॥ ४९ ॥

अभिमान की रक्षा व आगम की विनय के लिये भोजनादि कार्यों में मुनियोंने मौन को कहा है– उसका विधान किया है ॥ ४९*१ ॥

मौन से भोजनविषयक लोलुपता के हट जाने से तप की वृद्धि व समता भाव–राग द्वेष के अभाव–का दर्शन होता है । तथा इस समता भाव से प्राणी तीनों लोकों में मन की सिद्धि को प्राप्त होता है – (उस के ऊपर उसका पूर्णरूपसे नियंत्रण हो जाता है) ॥४९*२॥

---

४८) 1 दुग्धानि. 2 भक्षयित्वा । ४९) 1 यथा भवति, D आगमानुसारेण ।

1486) प्रश्रयाधिकतया[1] श्रुतस्य वै श्रेयसां च विभवस्य भाजनम् ।
संभवन्ति मनुजाः प्रसन्नतामेत्यतो भवभवे[2] सरस्वती ॥ ५०

1487) शारीरमानसानां तु सहजव्याधिबाधने ।
साधुः संयमिनां कार्यः प्रतीकारो गृहाश्रितैः ॥ ५०*१

1488) शारीरा ज्वरकुष्ठाद्याः क्रोधाद्या मानसाः स्मृताः ।
आगन्तवो ऽभिघातोत्थाः सहजाः क्षुत्तृषादयः ॥ ५१

1489) मुनीनां व्याधियुक्तानामुपेक्षायामुपासकैः ।
असमाधिर्भवेत्तेषां[1] स्वस्य[2] वा धर्मकर्मता ॥ ५१*१

1490) सौमनस्यं[1] सदा कार्यं व्याख्यात्सु च पठत्सु च ।
आवासपुस्तकादीनां सौकर्यादिविधानतः[2] ॥ ५१*२

1491) अङ्गपूर्वगचितप्रकीर्णकं वीतरागमुखपद्मनिर्गतम् ।
नश्यतीह सकलं सुदुर्लभं सन्ति न श्रुतधरा यदर्षयः ॥ ५२

मनुष्य विनय की अधिकतासे निश्चयतः आगमज्ञान, अनेक प्रकार के कल्याण और संपत्ति का भाजन होता है । तथा इस से जन्म जन्मान्तर में उन के ऊपर सरस्वती प्रसन्न होती है ॥५०॥

मुनियों के देह में शारीरिक, मानसिक आगन्तुक और स्वाभाविक रोग की बाधा के उपस्थित होने पर गृहस्थों को उन के रोगों का भली भाँति प्रतिकार करना चाहिये ॥५०*१॥

उन में ज्वर व कुष्ठ आदिक शारीरिक, क्रोधादिक, मानसिक, शीत व उष्ण वायु के अभिघात से उत्पन्न आगन्तुक तथा भूख व तृषा आदि को साहजिक रोग कहा जाता है ॥५१॥

श्रावकों के द्वारा रोगी मुनियों की उपेक्षा की जाने पर उन के समाधि–ध्यान या तपश्चरण– से च्युत हो जाने की सम्भावना है तथा श्रावक को उन की उपेक्षा करनेपर अधर्म कर्मता – धर्म–कर्म से भ्रष्ट होने का प्रसंग आता है ॥ ५१*१ ॥

जो महात्मा श्रुत का व्याख्यान करते हैं अथवा उसे पढते हैं उन के लिये निवास-स्थान और पुस्तकादि उपकरणों की सुलभता को निर्मित कर निरन्तर सौमनस्य – सुन्दर मन (सद्विचार) को प्रगट करना चाहिये ॥ ५१*२ ॥

यदि श्रुत के ज्ञाता महर्षि न होंगे तो वीतराग जिन के मुखरूप कमल से निकला हुआ – उन के द्वारा उपदिष्ट–आचारांगादि द्वादशांगस्वरूप अंगश्रुत, उत्पादपूर्वादि

---

५०) 1 विनय. 2 जन्मनि जन्मनि । ५१*१) 1 मुनीनाम्. 2 उपासकस्य । ५१*२) 1 सुन्दर-मानसत्वम्. 2 सुलभत्वादि ।

1492) तत्प्रश्रयोत्साहनयोग्यदानानन्दप्रमोदादिमहाक्रियाभिः ।
कुर्वन् मुनीनागमविद्धचित्तान् स्वयं नरः स्याच्छ्रुतपारगामी ॥ ५३

1493) श्रुतेन तत्त्वं पुरुषैः प्रबुध्यते श्रुतेन वृद्धिः समयस्य जायते ।
श्रुतप्रभावं यदि वर्णयेज्जिनः श्रुताद्विना सर्वमिदं विनश्यति ॥ ५४

1494) शस्त्राणि यद्वद्दधतो वराकाः क्लेशे हि बाह्ये सुलभा मनुष्याः ।
सुदुर्लभाः सन्ति सुडीरवच्च यथार्थविज्ञानघना जगत्याम् ॥ ५५

1495) सृणिर्विज्ञानमेवास्य वशायाशयदन्तिनः ।
तदुद्धते बहिःक्लेशः क्लेश एव परं भवेत् ॥ ५५*१

1496) बाह्यं तपो ऽप्रार्थितमेति पुंसो ज्ञानं स्वयं भावयतः सदैव ।
क्षेत्रज्ञरत्नाकरसंनिमग्ने बाह्याः क्रियाः सन्तु कुतः समस्ताः ॥ ५६

चौदह पूर्वों स्वरूप रचा गया पूर्वश्रुत और सामायिकादि स्वरूप प्रकीर्णक श्रुत; इस प्रकार अति दुर्लभ समस्त श्रुत ही यहाँ नष्ट हो जावेगा ॥५२॥

जो मनुष्य योग्य विनय, उत्साह, अनुकूल दान, आनन्द और प्रमोदादिरूप उत्तम क्रियाओं के द्वारा मुनियों के मन को आगम में संलग्न करता है वह स्वयं आगम का पारगामी– श्रुतकेवली – हो जाता है ॥५३॥

मनुष्य श्रुतज्ञान से जीवादि तत्त्वों के स्वरूप को जानते हैं, तथा उस श्रुत से जैन धर्म की वृद्धि होती है। यदि उस श्रुत के प्रभाव का कोई वर्णन कर सकता है तो वे जिन– वीतराग सर्वज्ञ देव– ही कर सकते हैं। यदि यह श्रुतज्ञान न होगा, तो उस के बिना यह सब ही नष्ट हो जायेगा ॥ ५४ ॥

जिस प्रकार शस्त्रों को दीन या कायर मनुष्य भी धारण कर के बाहिरी क्लेश को सहते है उसी प्रकार बाहिरी क्लेश के सहनेवाले मनुष्य बहुत-से सुलभ हैं, परंतु जिस प्रकार शस्त्रों को धारण कर के भी सुडीर – निर्भय शूरवीर के – समान बहुत-से सुभट दुर्लभ ही होते हैं उसी प्रकार लोक में ठोस यथार्थ आगमज्ञान से संपन्न मनुष्य दुर्लभ ही होते हैं ॥५५॥

मनरूप हाथी को वश करने के लिये विशिष्ट ज्ञान ही अंकुश के समान है। यदि विज्ञानरूप अंकुश के बिना मनरूप हाथी उद्धत – उन्मत्त– रहा तो फिर बाह्य जो उपवास आदि तप का क्लेश है वे केवल क्लेश ही – कोरे कष्ट ही – रहनेवाले हैं ॥ ५५*१॥

जो सदा स्वयं ज्ञान की भावना में निरत रहता है उस के पास बाह्य तप प्रार्थना के

५३) 1 विनय । ५५) 1 PD°शास्त्राणि यद्वद्°, D गुनक्लेशेन प्रचुराः. 2 दानशूरवत् । ५५*१) 1 P°शृणिर्विज्ञान, अङ्कुश . 2 वशहेतवे. 3 D तदुद्धते । ५६) 1 Dआत्मना. 2 P आत्मसमुद्र, Dआत्मसमुद्रे निमग्ने मनसि ।

प्रसिद्धं च—

1497) यदज्ञानी क्षपेत्कर्म बह्वीभिर्भवकोटिभिः ।
तं[1] ज्ञानवांस्त्रिभिर्गुप्तः क्षपेदन्तर्मुहूर्ततः ॥ ५७

1498) ज्ञानी पटु[1]स्तदैव स्याद्बहिः क्लेष्टुर्व्रते[2] सदा ।
ज्ञातुर्ज्ञानलवे ऽप्यस्य[3] न पटुत्वं युगैरपि ॥ ५७*१

1499) शब्दानुशासनसमभ्यसनान्न यस्य
नैतिह्यतो[1] ऽपि धिषणा न तथा नयेभ्यः ।
संप्राप्य शुद्धिमसमां स परप्रतीतेः
क्लिश्यन् पुमान् भवति नेत्रविहीनतुल्यः ॥ ५८

1500) स्वरूपं रचना शुद्धिर्भूषार्थश्च(स्व) समासतः[1] ।
प्रत्येकमागमस्यैतद्द्वैविध्यं प्रतिपद्यते ॥ ५८*१

बिना आता है। ठीक है—ज्ञान भावना में रत रहनेवाला पुरुष जब आत्मारूपी समुद्र में डूबता है तब समस्त बाह्य क्रियायें अलग कहाँ से रह सकती हैं ॥ ५६ ॥

यह प्रसिद्ध भी है—

अज्ञानी जीव जिस कर्म को अनेक कोटि परिमित भवों में क्षीण करता है उसे ज्ञानी जीव मनोगुप्ति आदि तीन गुप्तियों से रक्षित होकर अन्तर्मुहूर्त में ही क्षीण कर देता है ॥५७॥

सम्यग्ज्ञान के बिना बाह्य में क्लेश को सहनेवाले मनुष्य के व्रत में सम्यग्ज्ञानी तत्काल चतुर हो जाता है। परन्तु वह अज्ञानी मनुष्य सम्यग्ज्ञानी के ज्ञान के लेश में भी अनेक युगों के बीतने पर भी चतुरता नहीं प्राप्त कर सकता है ॥ ५७*१ ॥

जिसकी बुद्धि न शब्दशास्त्र के अभ्यास से असाधारण शुद्धि को प्राप्त हुई है, न इतिहास के द्वारा—कथाग्रन्थों के आश्रय से—शुद्धि को प्राप्त हुई है; और न नयों से भी उस शुद्धि को प्राप्त हुई है, वह मनुष्य चूंकि केवल दूसरों के ज्ञान के आश्रय से ही बाह्य में क्लेश को सहता है, अतएव उसे नेत्रों से रहित—अन्धे—मनुष्य के समान समझना चाहिये ॥५८॥

स्वरूप, रचना, शुद्धि, भूषा और अर्थ ये आगम के प्रत्येक संक्षेप से दो प्रकार के कहे गये हैं ॥५८*१॥

---

५७) 1 कर्म । ५७*१) 1 D तदा प्रकटत्वं ज्ञानस्य यदा व्रतमाचरति. 2 क्लेशयुक्त. 3 D बहिः-क्लेष्टुः । ५८) 1 वृत्तैतिह्यं पुरातनी. 2 बुद्धिः । ५८*१) 1 PD°भूषार्थे स्व° ।

तत्र स्वरूपं द्विविधम् । अक्षरमनक्षरं च । रचना द्विविधा । गद्यं पद्यं च । शुद्धिर्द्विविधा । प्रमादप्रयोगविरहो ऽर्थव्यञ्जनादिविकलता परिहारश्च । भूषा द्विविधा । वागलंकारो ऽर्थालंकारश्च । ओजःप्रसादमाधुर्यमसृणत्व[1]-समाधिसमतादिगुणानुरूपशब्दरचना वागलंकारः । सभेदवास्तवौपम्या-तिशयश्लेपप्रायो ऽर्थालङ्कारः । अर्थो द्विविधश्चेतनो ऽचेतनश्च ।

1501) उच्चैर्गोत्रं भुवनमहितं प्राश्नुते[1] नुप्रणामात्
भक्तेः कीर्ति मुदितजगतीं संस्तवं संस्तवाच्च ।
दानात्पद्मांस्त्रिभुवनमहोपासनां पर्युपास्ते-
रित्थं रत्नत्रितयकमलाप्राणनाथान् भजन्[4] सन् ॥ ५९

1502) परदातृव्यपदेशः सचित्तनिक्षेपतत्पिधाने च ।
कालस्यातिक्रमणं मात्सर्यं चेत्यतिथिदाने ॥ ५९*१

गद्य– उन में स्वरूप के दो भेद हैं – अक्षर और अनक्षर । रचना के दो भेद हैं – गद्य और पद्य । शुद्धि के दो भेद हैं–प्रमादप्रयोगविरह और अर्थ-व्यंजनादिविकलता – परिहार । भूषा दो प्रकार की है–शब्दालंकार और अर्थालंकार । ओज, प्रसाद माधुर्य,स्निग्धता,समाधि, और समता आदिक गुणों के अनुसरण करनेवाली शब्दरचना को शब्दालंकार और भेदसहित वास्तविकता, उपमा, अतिशय और श्लेष आदिरूप रचना को अर्थालंकार कहते है । अर्थ दो प्रकार का है – चेतन और अचेतन ।

इस प्रकार से जो मुनीश्वर रत्नत्रयरूपी कमला-लक्ष्मी – के प्राणनाथ है उनकी भक्ति करनेवाला श्रावक उन्हें प्रणाम करने से लोकपूजित उच्च गोत्र को, उनकी भक्ति से जगत को आनंदित करनेवाली कीर्ति को उन के गुणों का वर्णन करने से स्वयं स्तुति को,आहारा-दिका दान देने से लक्ष्मी को और उन की उपासना करने से त्रैलोक्य में स्वयं बडो उपासना को प्राप्त करता है ॥ ५९ ॥

अतिथि दान में परदातृव्यपदेश, सचित्तनिक्षेप, सचितपिधान, कालातिक्रम और मात्सर्य ये पाँच अतिथिदान के अतिचार हैं ।

१) परदातृव्यपदेश – अन्य दाता ने ये पदार्थ दिये हैं, ऐसा कह कर पात्र को अन्ना-दिक देना । दूसरे के ये पदार्थ हैं ऐसा कहने से ये शुद्ध ह वा अशुद्ध हैं; ऐसा संशय

गद्यम्) 1D कोमलत्वम् । ५९) 1 प्राप्नोति. 2 प्राप्नोति . 3 जिनात्. 4 सेवन् [सेवमानः] सन् ।

1503) वैराग्यसंयमतरुं रुरुक्षुधिया[1] हि येन
संगो निरासि[2] दुरितव्यसनैकमित्रम् ।
कृष्यादिकं वितनुकर्मसुतोत्थमित्थ-
मित्यादिकामनुमतिं स[4] कथं ददाति ॥ ६०

1504) ततः[1] कर्तुं कर्म प्रभवतु हतं मा प्रभवतात्
समुद्दिष्टा[2] हन्तानुमतिजनितैः पापनिवहैः ।
प्रवृद्धो ऽसौ सत्यं परिकलितदूरेण विचरन्
मृगो धावन् यद्वन्मृगयुभयतो[3] ऽशक्यकरणे ॥ ६१

1505) .... लोभावगतानुत्साहिनः
प्रवर्तयति मानवाननुमतिप्रदानाद् ध्रुवम् ।
विलोचनविवर्जितानिव हि यष्टिरेनोभरं
समर्जयति नन्दकश्रवणवासिमत्स्यो यथा ॥ ६२

उत्पन्न होनेपर मुनि उन्हें ग्रहण न करेंगे। अतः वे पदार्थ अपने उपयोग में आ जावेंगे, ऐसी तुच्छ बुद्धि दाता के मन में उत्पन्न होती है। इससे यह परदातृव्यपदेश अतिचार होता है। (२) सचित्त निक्षेप – सचित्त पद्मपत्रादिके ऊपर आहारको रखकर देना। (३) सचित्तपिधान– भाज्यपदार्थोंको कमलपत्रादि कों से ढँकना। (४) कालातिक्रम–अकाल में भोजन कराना। (५) मात्सर्य – आहार देते समय आदर नहीं रहना, अथवा अन्य दाताओं के गुणों को सहन न करना ॥ ५९*१ ॥

जिसने वैराग्य और संयमरूप वृक्षपर आरूढ होने की इच्छा से पाप और विपत्ति के अद्वितीय मित्रस्वरूप परिग्रह को दूर कर दिया है वह श्रावक हिंसादिजनक .... (?) खेती आदि आरम्भकार्य के विषय में कैसे अनुमति देगा ? ॥६०॥

इसलिये (श्रावक) पापकर्म के लिये स्वयं प्रवृत्त हो या न हो हिंसक की उद्दिष्ट हिंसा को अनुमति देने से उत्पन्न हुए पापभार से संपन्न होकर पापकर्म से दूर रहकर भी, व्याध के भय से रक्षणरूप अशक्य कार्य करनेवाले भागते हुए मृग के समान, पापी बन जाता है। (तात्पर्य, मृग जैसे भागो या न भागो वह व्याध की शिकार बन जाता है उसी तरह अनुमति-दाता स्वयं पापविरत होकर भी पापी बन जाता है) ॥ ६१ ॥

जैसे लाठी नेत्ररहित अन्धे मनुष्यों को चलाती है वैसे ही अनुमतिदाता जो लोभ के

६०) 1 आरोहणबुद्धया. 2 त्यक्तः. 3 हिंसाकर्म. 4 वैराग्यसंयमयुक्तः । ६१) 1 ततः निन्द्यकर्म कर्तुं प्रभवतु मा प्रभवतु. 2 उपदेशको ऽपि हन्ता भवति. 3 भिल्लभयत आखेटकभयतः, D भिल्ल ।

1506) निन्दन्ति के ऽपि च हसन्ति परे[1] द्विषन्ति
विज्ञापयन्त्युपदिशन्ति च नर्मणान्ये ।
षट्कर्मणामनुमतिं प्रददाति[2] पृष्टे
पृष्टः फलं हि लभते ऽत्र परत्र चान्यत् ॥ ६३

1507) नारिप्सते[1] परिजिघृक्षति[2] नैव किंचित्
कायस्थितेरपि कृते नितरामुदास्ते[3] ।
उत्तुङ्गसंयमध[4]राधरसंरुरुक्षु[5]–
र्यो ऽसौ[6] त्यजत्वनुमतिप्रसरं परत्र ॥ ६४

1508) आरम्भं पापतो ऽमुञ्चत् तत्रैवानुमतिं ददत् ।
लक्ष्यते सर्पभीत्येव नश्यन् शयुमुखे[1] पतन् ॥ ६५

वश में नहीं है और आरम्भकार्य में उत्साही भी नहीं है ऐसे मनुष्यों को अनुमति देकर आरम्भादिक में निश्चय से प्रवृत्त करता है वह नंदक महामत्स्य के कान में स्थित क्षुद्र मत्स्य के समान पापार्जन करता है ॥ ६२ ॥

कोई निंदा करते हैं, दूसरे कितने ही हसते हैं, कितने ही द्वेष करते हैं, कितने ही प्रार्थना करते हैं, कितने हो हँसी से उपदेश देते हैं तथा पूछे जानेपर कोई हँसी में असिमषि आदि छह कर्मों को अनुमति देता है । इस प्रकारसे पूछा गया वह इस लोक में फल को प्राप्त करता है और परलोक में अन्य फल को प्राप्त करता है ॥ ६३ ॥

जो संयमरूप पर्वत पर चढने का इच्छुक हो कर न इच्छा करता है और न कुछ ग्रहण भी करता है यहाँ तक कि, अपने शरीर को स्थित रखने के लिये जो आहार के ग्रहण में भी अतिशय उदासीन रहता है, उसे अन्य जन के लिये अनुमति देने का त्याग करना चाहिये ॥६४

जो पाप की भीति से स्वयं आरम्भ का त्याग करता है पर उसी के विषय में किसी अन्य के लिये अनुमति देता है वह सर्प के डर से भागकर अजगर के मुँह में पडते हुए मनुष्य के समान दिखता है ॥६५॥

---

६३) 1 PD °हसन्त्यपरे. 2 PD °प्रददत्त । ६४) 1 न वाञ्छते. 2 गृहीतुमिच्छति. 3 उदासान्तो [सीनो] भवति । 4 D °संयमधराधर°. 5 आरोढुमिच्छुः. 6 उत्तमः श्रावकः । ६५) 1 अ [ज] गरमुखे ।

1509) कश्चिच्चेन्न हि शक्नुयादनुमतिं स्थातुं विनापि क्षणं
दत्तामित्थमसौ तदा विरम रे पापाद्रमस्वागमे ।
तृष्णां छिन्द्धि भज क्षमां कुरु दयां मोहं विभिन्द्योद्धतं[1]
धर्मे धन्य धृतिं बधान नितरां त्वात्मसौख्ये सदा ॥ ६६

1510) एतां[1] व्रतैरपमलैः परिपाति पूर्वै-
र्वर्यः[2] कथंचिदिमकां[3] सततं व्रतानि ।
मध्यः सदा शबलितं युगलं[4] दधानः
सद्माश्रमीति[5] कथितो मुनिभिः कनिष्ठः ॥ ६७

1511) अचिन्तितं नाम परप्रक्लृप्तं[1] पात्राय दत्ते हि परप्रयुक्तः[2] ।
स्वयं च गृह्णाति तथैव यो ऽसौ उद्दिष्टनिर्हारपरः[3] प्रतीतः ॥ ६८

1512) धृतिश्रीर्हृदि विन्यस्ता धाटिताशापिशाचिका ।
उद्दिष्टत्यागिना पुंसा लौल्यव्याघ्रो ऽपि भीषितः[1] ॥ ६९

यदि कोई श्रावक अनुमति के विना क्षणभर भी नहीं रह सकता है तो वह अनुमति दे परन्तु उसे पाप से विरक्त होना चाहिये, आगम में रममाण होना चाहिये, तृष्णा को नष्ट करना चाहिये, क्षमा का आराधन करना चाहिये, प्राणियों पर दया करना चाहिये और उद्धत मोह को नष्ट करना चाहिये तथा धर्म में सन्तोष धारण करते हुए आत्मसुखमें सदा सन्तुष्ट रहना चाहिये ॥ ६६ ॥

जो पूर्वोक्त निर्दोष व्रतों के साथ इस प्रतिमा को धारण करता है वह उत्कृष्ट, जो व्रतों को सदा निर्मल पालता हुआ इस प्रतिमा का कभी निर्मलतया और कभी अनिर्मलतया पालन करता है वह मध्यम तथा जो पूर्वव्रत और इस प्रतिमा को शबलतया– सदोष रूप से – पालन करता है वह जघन्य श्रावक अनुमतिविरत मुनियों के द्वारा कहा गया है ॥ ६७ ॥

जो श्रावक पात्रविशेष के उद्देश से रहित दूसरे के लिये बनाये गये आहार को उनकी प्रेरणा पाकर पात्र के लिये देता है और स्वयं भी उसी प्रकार से ग्रहण करता है वह- उद्दिष्ट आहार का त्यागी प्रसिद्ध है ॥ ६८ ॥

उद्दिष्टत्यागी श्रावक सन्तोषरूप लक्ष्मी को अपने हृदय में स्थापित करता है, आशा- रूप पिशाची को दूर भगाता है और लोलुपतारूप व्याघ्रको भयभीत भी कर देता है – उसे नष्ट कर देता है ॥ ६९ ॥

---

६६) 1 P °विभिन्ध्युद्धतम् । ६७) 1 प्रतिमाम्. 2 उत्तमः श्रावकः. 3 D प्रतिमां समलां कथंचित् व्रतानि निर्मलानि· 4 दर्शनं व्रतानि च. 5 गृही । ६८) 1 D परकृतम्, P प्रक्लृप्तं कृतम्. 2 D एकादशप्रतिमाधारी श्रावकः श्रावकगृहात् आनीतं महात्मानं ददाति. P परेषां प्रयुक्तः. 3 अभाव । ६९) 1 D भयभीतः कृतः ।

1513) प्रायो निमज्जति जनो गुरुगृद्धिसिद्धउद्दिष्टभोजनमभीप्सुरपीन्द्रियाणाम्
चेतोयुजां[1] प्रसरतां तनुते ऽनिवार्यमारम्भमुख्यकलिलानि पुनश्चिनोति ॥
1514) अप्रासितो ऽपि ननु बन्धमुपैति जीव उद्दिष्टभोजनपरः प्रसृताभिलाषः ।
वारिप्रवेशमिव [1] द्विपः[2] दुरन्तं रत्युत्सवं तु सहवासि [3] ,याश्नुते[4] न ॥ ७१
1515) परमसमतामातन्वानो मतामतवस्तुषु[1]
प्र तकरणग्रामोद्दामप्रवृत्तिरनाकुलः ।
विदधदशनं त्यक्तोद्देशं वपुःस्थितिमात्रकं
व्रजति समयाभ्यासासक्तो गृही यतिदेश्यताम् ॥ ७२
1516) अवति[1] यो व्रतसंकलितामिमां[2] भवति स प्रवरो[3] विशदव्रतः ।
पुनरिमां[4] च कदाचन मध्यमः शबरुधीरुभयत्र[5] कनिष्ठकः ॥ ७३
इति धर्मरत्नाकरे उद्दिष्टान्तप्रतिमाप्रपञ्चनो[1] ऽष्टादशो ऽवसरः ॥ १८ ॥

जो मनुष्य भारी लोलुपता के वश तैयार किये गये उद्दिष्ट आहार की अभिलाषा करता है वह प्राय: डूबता है—पतित होता है या संसार समुद्र में गोता खाता है। मन से सम्बंध रखनेवाली इन्द्रियों के संचार को—उनकी विषयोन्मुखता को विस्तृत करता हैं, तथा अनिवार्य आरम्भ आदि पापों को संचित करता है ॥७०॥

जिस प्रकार वन का हाथी कामवासना को पूर्ण करने की इच्छा के वश होकर गड्ढे में प्रविष्ट होता हुवा वहां दुःसह दुख को सहता है, पर हथिनी के साथ संभोग के आनन्द को नहीं प्राप्त कर पाता है। उसी प्रकार उद्दिष्ट भोजन में आसक्त हुआ श्रावक अपनी अभिलाषा को विस्तृत करता हुआ इच्छानुसार उद्दिष्ट भोजन को न पाकर भी कर्मबन्धन को प्राप्त होता है। (तज्जन्य दुःख को सहता ही है) ॥७१॥

जो अपने उद्देश से निर्मित भोजन को छोडकर शरीर को स्थिर रखने के लिये अनुद्दिष्ट आहार को ग्रहण करता है वह उत्कृष्ट समता भाव को विस्तृत करता हुआ इष्ट—अनिष्ट वस्तुओं में चूंकि इन्द्रिय-समूह की उच्छृंखल प्रवृत्ति को रोक देता है, इसलिये निराकुल भाव को प्राप्त होता है। तथा इसी कारण से वह गृहस्थ आगम के अभ्यास में आसक्त हो कर मुनि जैसी अवस्था को प्राप्त कर लेता है ॥७२॥

जो पूर्व सर्व व्रतों के साथ इस प्रतिमा का निर्मलतापूर्वक पालन करता है वह निर्मल व्रत का धारक उत्कृष्ट श्रावक होता है। जिसके पूर्वव्रत निर्मल हैं तथा इस प्रतिमा को भी कदाचन धारण करता है वह मध्यम उद्दिष्टत्यागी श्रावक कहा जाता है। तथा जो पूर्वव्रत और इस प्रतिमा को सदोष रूप में धारण करता है वह इस प्रतिमा का धारक जघन्य श्रावक होता है ॥७३॥

इस प्रकार धर्मरत्नाकरमें उद्दिष्टान्त प्रतिमाओं का विस्तार कहनेवाला अठारहवां अवसर समाप्त हुवा ॥ १८ ॥

---

७०) 1 चित्तयुक्तानाम्. 2 D निरन्तरम्। ७१) 1 गर्ता. 2 कामक्रीडाम्. 3 हस्तिन्या. 4 न लभते। ७२) 1 PD इष्टानिष्ट। ७३) 1 रक्षति. 2 प्रतिमाम्. 3 धुर्यः. 4 प्रतिमाम्. 5 समल मिश्रित वा। ७४) 1 विस्तारकः।

[१९. एकोनविंशो ऽवसरः]

[सल्लेखनावर्णनम्]

1517) इत्थं व्रतेषु प्रतिमाभिराभिः संपूर्णतामण्डनमुद्वहत्सु ।
कालालिना[1]युर्मकरन्दपानं बुद्ध्वा विधत्तामनुरूपमस्यं[2] ॥ १

1518) तरुदलं[1]मिव परिपक्वं स्नेहविहीनं प्रदीपमिव देहम् ।
स्वयमेव विनाशोन्मुखमवबुध्य करोतु विधिमन्त्यम् ॥ १*१

1519) व्रजद्बलं भुक्तिमपास्यमानं गलत्प्रतीकारमहर्निशं च ।
यथा वपुर्भक्षयते ऽत्र का[1]लश्चारित्रमप्येतदहो जिघत्सुः[2] ॥ २

अणुव्रत, गुणव्रत और शिक्षाव्रत स्वरूप पूर्वोक्त व्रत इन ग्यारह प्रतिमाओं के साथ सम्पूर्णतारूप अलंकार को धारण करते हैं । अर्थात् उन व्रतों की परिपूर्णता इन प्रतिमाओं के द्वारा होती है । यमरूप भ्रमर को आयुरूप मकरन्द (पराग) का पान करते हुए देखकर– आयु की विनश्वरता को जानकर–श्रावक को प्रतिमा के अनुरूप कार्य करना चाहिये, अर्थात् आयुष्य की समाप्ति के समय सल्लेखना को धारण करना चाहिये ॥ १ ॥

जैसे वृक्ष का पका हुआ पत्ता स्वयमेव गिर जाता है अथवा तेल से रहित दीपक स्वयमेव बुझ जाता है वैसे ही आयु को स्वयं विनाश के सन्मुख देखकर योग्य श्रावक अन्तिम विधि अर्थात् सल्लेखना को पूर्ण करता है ॥ १*१ ॥

घातक यमराज यहाँ जिस प्रकार दिनरात निरन्तर– बल से विहीन हो कर भोजन का परित्याग करनेवाले व रोग की प्रतिकार शक्ति से रहित हुए ऐसे शरीर को अपना ग्रास बनाता है उसी प्रकार से वह इस चारित्रको भी अपना ग्रास बनाता है, यह खेद की बात है । (अभिप्राय यह है कि मृत्यु के निकट होने पर शरीर और संयम दोनों ही नष्ट होते हैं, अतः इस के लिये पूर्व से ही सावधान रहना चाहिये) ॥ २ ॥

---

१) 1 भ्रमरेण. 2 आयुर्मकरन्दस्य । १*१) 1 फल [पूर्ण] । २) 1 P°काले चरित्र°. 2 भक्षितुमिच्छुः, D ग्रसनशीलः धर्मः ।

1520) त्यागोऽङ्गयष्टेर्गहनं न गन्त्र्याश्चारित्रमेतद्गहनं[1] गरीयः ।
न नश्वरं स्थास्नु[2] न भेद्यभेदि तया[3] समं नेयमहो[4] कथं स्यात् ॥ ३

1521) अथाभिनीय स्मृतिमन्तराले तद्बालपाण्डित्यमारुरुक्षुः ।
आराधनोक्तक्रमवर्तनेन यथायथं संपरिणम्य चार्हे[1] ॥ ४

1522) लिङ्गे[1] सशिक्षाविनये[2] समाधौ[3] कश्चिद्विहारे[4] परिणामयुक्ते ।
संगोज्झिते[5] चारुगुणश्रयण्यां[6] संभावनायाम[7]शुभोज्झनेन ॥ ५

1523) सल्लेखनायाम[1]पि च क्षमायां विमार्गणायामपि सुस्थिते च ।
निरूपणे चाप्युपसर्पणेन प्रश्ने स्वयोग्ये परिपृच्छनायाम्[2] ॥ ६

गमनशील — नश्वर — शरीररूप लकडी को छोडना कठिन नहीं है; किन्तु इस महान् चारित्र का त्याग कठिन है। (उसका छोडना अतिशय कष्टदायक है) । जिस प्रकार वह शरीर नश्वर है उस प्रकार चारित्र नश्वर नहीं है किन्तु वह स्थायी है, तथा जिस प्रकार शरीर भेदा जानेवाला है उस प्रकार चारित्र भेदा जानेवाला नहीं है, किन्तु वह भेदनस्वभाव से रहित है। अतएव शरीर से सर्वथा भिन्न स्वभाववाले चारित्र को उस शरीर के साथ कैसे ले जाया जा सकता है ? (अर्थात् नश्वर शरीर के साथ कल्याणकारक चारित्र को छोडना योग्य नहीं है) ॥ ३ ॥

